M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 596

Title : Siddhantkaumudi
(Purvardha)

596

596

सिद्धांतकौमुदिः पूर्वार्धः Incomplete

Siddhānta Kaumudi Poorvārdha	Title
Bhattoji Dixit	Author
	Editor
	Year, Vols.
	Publisher
596 Begins ~~Ends~~ abruptly	Remarks

न्ना।दिष्टिविपरत्वान्सलोपः

नो० ताअऊ।तिवा।विङ्ङीन्स्याह॥शार्ङ्गरवी॥वैदी॥जातेरिस्त्रनुहृत्तेः पुंयोगेङीषेव॥नरयोर्हृद्धिश्चेतिगणसूत्रं॥नारी॥
यूनः श्चाप्॥यङंतात्स्त्रियांचाप्स्यात्॥यङःष्यङोः सामान्यग्रहणं॥आंबष्ठ्या॥कारीषगंध्या॥चाघनश्चाप्वाच्यः पौ
तिमाष्या॥आवट्याश्च॥अस्माच्चाप्॥गर्गादिङीषोपवादः॥अवटशब्दो गर्गादिः॥आवट्या॥तद्धिताः॥आपंचमस
माप्तेरधिकारोयं॥यूनस्तिः॥युवन्शब्दात्तिप्रत्ययःस्यात्सचतद्धितः॥लिंगविशिष्टपरिभाषया सिद्धेतद्धिताधि
कारउत्तरार्थः॥युवतिः॥अनुपसर्जनादित्येव॥बहवोयुवानोयस्यांसाबहुयुवानगरी॥ युवतीतितिप्रत्ययांतःशब्दांता ३
न्ङीपूर्वोप्ययं॥ ॥श्रीः॥ ॥इतिस्त्रीप्रत्ययाः॥ ॥प्रातिपदिकार्थलिंगपरिमाणवचनमात्रेप्रथमा॥ नियत
नो योपस्थितिकः प्रातिपदिकार्थः॥मात्रशब्दस्य प्रत्येकंयोगः॥प्रातिपदिकार्थमात्रेलिंगमात्राद्याधिक्ये परिमाणमा
त्रेसंख्यामात्रेचप्रथमास्यात्॥नियतलिंगाः उच्चैः नीचैः॥कृष्णः॥श्रीः॥ज्ञानं॥अलिंगानियतलिंगाश्च प्रातिपदिकार्थ
मात्र इत्यस्योदाहरणं॥अनियतलिंगास्तुलिंगमात्राद्याधिक्यस्य॥तटः॥तटी॥तटं॥परिमाणमात्रे॥द्रोणोव्रीहिः॥
द्रोणरूपंयत्परिमाणंतत्परिच्छिन्न इत्यर्थः॥प्रत्ययार्थेपरिमाणेप्रकृत्यर्थोऽभेदेनसंसर्गेणविशेषणं॥प्रत्ययार्थ

इहांतेश्रूयमाणंपदंप्रत्येकमभिसंबध्यते ४

[illegible]

स्त्वकपरिच्छेदपरिच्छेदकभावेनव्रीहौ विशेषणमिति विवेकः ॥ वचनं संख्या ॥ एकः ॥ द्वौ ॥ बहवः ॥ इह पूर्वकार्यत्वात् छत्रकेरप्रासोवचनं ॥ सं का०प्रथमा०
॥सि०पृ०॥ बोधने च ॥ इह प्रथमा स्यात् ॥ हे राम ॥ ॥ कारके ॥ इत्यधिकृत्य ॥ कर्तुरीप्सिततमं कर्म ॥ कर्तुः क्रियया यदाप्तुमिष्टतमं कारकं
कर्मसंज्ञं स्यात् ॥ कर्तुः किं ॥ माषेष्वश्वं बध्नाति ॥ कर्मण ईप्सिता माषाः न तु कर्तुः ॥ तमपग्रहणं किं ॥ पयसा ओदनं भुंक्ते ॥ कर्मेत्यनु
॥२२॥ वृत्तौ पुनः कर्मग्रहणमाधारनिवृत्त्यर्थं ॥ अन्यथा गेहं प्रविशतीत्यत्रैव स्यात् ॥ ॥ अनभिहिते इत्यधिकृत्य ॥ कर्मणि द्वितीया ॥
अनुक्ते कर्मणि द्वितीया स्यात् ॥ हरिं भजति ॥ अभिहिते तु कर्मणि प्रातिपदिकार्थमात्रे इत्यादिप्रथमैव ॥ अभिधानं च प्रायेण ति
ङ्कृत्तद्धितसमासैः ॥ तिङ् ॥ हरिः सेव्यते ॥ कृत् ॥ लक्ष्म्या सेवितः ॥ तद्धितः ॥ शतेन क्रीतः शत्यः ॥ समासः ॥ प्राप्त आनन्दो यं स प्राप्तानन्दः ॥ ३
क्वचिन्निपातेनाभिधानं ॥ ॥ यथा विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतं ॥ सांप्रतमित्यस्य युज्यत इत्यर्थः ॥ तथायुक्तं चानीप्सि
तं ॥ ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात् ॥ ग्रामं गच्छंस्तृणं स्पृशति ॥ विषं भुंक्ते ॥ अकथितं च ॥ अ ॥५२॥
अविवक्षितं [illegible]पादानादिविशेषैरकथितं कारकं कर्मसंज्ञं स्यात् ॥ दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषां ॥ कर्मयुक्स्यादक का०द्वि०
थितं तथा स्यान्नीहृकृष्वहां ॥ दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाकथितं कर्मेति परिगणनं कृ

प्रत्यवसानं भक्षणं ५ शब्दः कर्म येषां ६

तेव्यमित्यर्थः ॥ गां दोग्धि पयः ॥ बलिं याचते वसुधां ॥ अविनीतं विनयं याचते ॥ तण्डुलानोदनं पचति ॥ गर्गान् शतं दण्डयति ॥ व
जमवरुणद्धि गां ॥ माणवकं पन्थानं पृच्छति ॥ वृक्षमवचिनोति फलानि ॥ माणवकं धर्मं ब्रूते शास्ति वा ॥ शतं जयति देवदत्तं ॥ सुधां
क्षीरनिधिं मथ्नाति ॥ देवदत्तं शतं मुष्णाति ॥ ग्राममजां नयति हरति कर्षति वहति वा ॥ अर्थनिबन्धनेयं संज्ञा ॥ बलिं भिक्षते व
सुधां ॥ माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादि ॥ कारकं किं ॥ माणवकस्य पितरं पन्थानं पृच्छति ॥ अकर्मकधातुभिर्यो
गे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञ इति वाच्यं ॥ कुरून्स्वपिति ॥ मासमास्ते ॥ गोदोहमास्ते ॥ क्रोशमास्ते ॥ ग
तिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ ॥ गत्याद्यर्थानां शब्दकर्मकाणामकर्मकाणां चाणौ यः
कर्ता स णौ कर्म स्यात् ॥ ॥ शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत् ॥ आशयच्चामृतं देवान्वेदमध्यापयद्विधिं ॥ आस
यत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः ॥ ॥ गतीत्यादि किं ॥ पाचयत्योदनं देवदत्तेन ॥ अण्यन्तानां किं ॥ गमयति देवदत्तो
यज्ञदत्तं तमपरः प्रयुंक्ते गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः ॥ नीवह्योर्न ॥ नाययति वाहयति वा भारं भृत्येन ॥ नियन्तृ [illegible]
कर्तृकस्य वहेरनिषेधः ॥ वाहयति रथं वाहान्सूतः ॥ आदिखाद्योर्न ॥ आदयति खादयति वान्नं बटुना ॥ भक्षेरहिंसार्थस्य

[illegible]

॥सि०पू०॥ ना। भक्षयत्यन्नं बटुना॥ अहिंसार्थस्य किं॥ भक्षयति बलीवर्दान् सस्यं॥ ॥जल्पतिप्रभृतीनामुपसंख्यानं॥ जल्पयति का० ६०
भाषयति पुत्रं देवदत्तः॥ दृशेश्च॥ दर्शयति हरिं भक्तान्॥ सूत्रे सामान्यार्थानामेव ग्रहणं॥ न तु तद्विशेषार्थानामित्य श
॥ ५३ ॥ नेन ज्ञाप्यते। तेन स्मरतिजिघ्रतीत्यादीनां न॥ स्मारयति घ्रापयति देवदत्तेन॥ शब्दाययतेर्न॥ शब्दाययति देवदत्तेन॥
धात्वर्थसंगृहीतत्वेनाकर्मकत्वात् प्राप्तिः॥ येषां देशकालादिभिन्नं कर्म न संभवति तेऽत्राकर्मकाः॥ न त्वविवक्षितक अकथित
र्मणोऽपि॥ तेन मासमासयति देवदत्तमित्यादौ कर्मत्वं भवति॥ देवदत्तेन पाचयतीत्यादौ तु न॥ हृक्रोरन्यतरस्यां॥ हृ
क्रोरणौ यः कर्ता स णौ वा कर्म स्यात्॥ हारयति कारयति वा भृत्यं भृत्येन वा कटं॥ अभिवादिदृशोरात्मनेपदे वेति वाच्यं॥
अभिवादयते दर्शयते देवं भक्तं भक्तेन वा॥ अधिशीङ्स्थासां कर्म॥ अधिपूर्वाणामेषामाधारः कर्मसंज्ञः स्यात्॥ अ
धिशेते। अधितिष्ठति। अध्यास्ते वा वैकुंठं हरिः॥ अभिनिविशश्च॥ अभिनीत्येतत्संघातपूर्वस्य विशतेराधारः कर्म स्या
त्॥ अभि। धि। निविशते सन्मार्गं॥ परिक्रयणे संप्रदानमन्यतरस्यामिति सूत्रादिह मंडूकप्लुत्यान्यतरस्यां ग्रहणम ॥ ५३ ॥
नुवर्त्य व्यवस्थितविभाषाश्रयणात् क्वचिन्न॥ पापेऽभिनिवेशः॥ उपान्वध्याङ्वसः॥ उपादिपूर्वस्य वसतेराधारः

कर्मसंज्ञः स्यात्॥ उपवसति। अनुवसति। अधिवसति। आवसति वा वैकुंठं हरिः॥ अभुक्त्यर्थस्य तु न॥ वने उपवसति॥ उ
भसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु॥ द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते॥ उभयतः कृष्णं गोपाः॥ सर्वतः कृष्णं॥
धिक् कृष्णाभक्तं॥ उपर्युपरि लोकं॥ अध्यधि लोकं॥ अधोऽधो लोकं हरिः॥ अभितः परितः समया निकषा हा प्रति
योगेऽपि॥ अभितः कृष्णं॥ परितः कृष्णं॥ ग्रामं समया॥ निकषा॥ हा कृष्णाभक्तं॥ तस्य शोच्यत इत्यर्थः॥ बुभुक्षितं न प्रति
भाति किंचित्॥ ॥अंतरांतरेण युक्ते॥ आभ्यां योगे द्वितीया स्यात्॥ अंतरा त्वां मां हरिः॥ अंतरेण हरिं न सुखं॥ ॥क
र्मप्रवचनीयाः इत्यधिकृत्य॥ अनुर्लक्षणे॥ लक्षणे द्योत्ये अनुरुक्तसंज्ञः स्यात्॥ गत्युपसर्गसंज्ञापवादः॥ कर्मप्रवचनी
ययुक्ते द्वितीया॥ एतेन योगे द्वितीया स्यात्॥ जपमनु प्रावर्षत्॥ हेतुभूतजपोपलक्षणं वर्षणमित्यर्थः॥ परापि हेतौ
तृतीयानेन बाध्यते॥ लक्षणेत्थंभूताख्यानेत्यादिना सिद्धे पुनः संज्ञाविधानसामर्थ्यात्॥ तृतीयार्थे॥ अस्मिन्द्योत्ये
अनुरुक्तसंज्ञः स्यात्॥ नदीमन्ववसिता सेना॥ नद्या सह संबद्धेत्यर्थः॥ षिञ् बंधने क्तः॥ हीने॥ हीने द्योत्येऽनुः प्राग्वत्॥
अनु हरिं सुराः॥ हरेर्हीना इत्यर्थः॥ उपोऽधिके च॥ अधिके हीने च द्योत्ये उप इत्यव्ययं प्राग्वत्॥ अधिके सप्तमी वक्ष्यते॥ ही

॥सि०पृ०॥

ने॥ उपहरिं सुराः॥ लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः॥ एष्वर्थेषु विषयभूतेषु प्रत्यादय उक्तसंज्ञाः स्युः॥ ल का०टि०
क्षणे॥ वृक्षं प्रति पर्यनु वा विद्योतते विद्युत्॥ इत्थंभूताख्याने॥ भक्तो विष्णुं प्रति पर्यनु वा॥ भागे॥ लक्ष्मीर्हरिं प्रति पर्य
नु वा॥ हरेर्भाग इत्यर्थः॥ वीप्सायां॥ वृक्षं वृक्षं प्रति पर्यनु वा सिंचति॥ अत्रोपसर्गत्वाभावान्न षत्वं॥ एषु किं॥ परिषिंचति॥
॥५४॥ अभिरभागे॥ भागवर्ज्ये लक्षणादावभिरुक्तसंज्ञः स्यात्॥ हरिमभि वर्तते॥ भक्तो हरिमभि॥ देवं देवमभि सिंचति॥
अभागे किं॥ यदत्र ममाभि स्यात्तद्दीयतां॥ अधिपरी अनर्थकौ॥ उक्तसंज्ञौ स्तः॥ कुतोऽध्यागच्छति॥ कुतः पर्यागच्छति॥
गतिसंज्ञाबाधात् गतिर्गताविति निघातो न॥ सुः पूजायां॥ सुसिक्तं॥ सुस्तुतं॥ अनुपसर्गत्वान्न षः॥ पूजायां किं॥ सुषि
क्तं किं तवात्र॥ क्षेपोऽयं॥ अतिरतिक्रमणे च॥ अतिक्रमणे पूजायां चातिः कर्मप्रवचनीयसंज्ञः स्यात्॥ अति देवान् कृ
ष्णः॥ अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु॥ एषु द्योत्येष्वपिरुक्तसंज्ञः स्यात्॥ सर्पिषोऽपि स्यात्॥ संभा ॥५४॥
वनायां लिङ्॥ तस्या एव विषयभूते भवने कर्तृदौर्लभ्यप्रयुक्तं दौर्लभ्यं द्योतयन्नपिशब्दः स्यादित्यनेन संबध्यते॥
सर्पिष इति षष्ठी तु अपिशब्दबलेन गम्यमानस्य बिंदोरवयवावयविभावसंबंधे॥ इयमेव ह्यपिशब्दस्य पदार्थ

अवाङ्मनसगोचरं विष्णुमपि स्तुयादित्यधिकोक्तिः एतादृशस्यान्यदीयस्त वने सामर्थ्यमस्ति॥ अत्र किं वक्तव्यमिति भावः इह संभावनाद्योतकोऽपिशब्दः ३ पूर्वत्र तु संभावनविषये दौर्लभ्यद्योतक इति महान् भेदः एवमुत्तरत्रापि बोध्यं॰

द्योतकतानयम॥ द्वितीया तु नेह प्रवर्तते॥ सर्पिषोऽपि बिंदुना योगो न त्वपिनेत्युक्तत्वात्॥ अनुपसर्गत्वान्न षः॥ अपि स्तुया
प्रकटीकर्तुं द्राजं॥ संभावनं शक्त्युत्कर्षमाविष्कर्तुमत्युक्तिः॥ अपि स्तुहि॥ अन्ववसर्गः कामचारानुज्ञा॥ धिग्देवदत्तमपि स्तुया मासमधीते ३
निंदयस्तोहिवत्यर्थः ३ द्वृषलं॥ गर्हा॥ अपि सिंच॥ अपि स्तुहि॥ समुच्चये॥ कालाध्वनोरत्यंतसंयोगे॥ इह द्वितीया स्यात्॥ मासं कल्याणी॥ मासं गुणक्रियाद्रव्यैरि
गुडधानाः॥ क्रोशं कुटिला नदी॥ क्रोशमधीते॥ क्रोशं गिरिः॥ अत्यंतसंयोगे किं॥ मासस्य द्विरधीते॥ क्रोशस्यैकदेशे पर्व तिविस्ताद्बोध्यं २
तः॥ ॥इति द्वितीया॥ ॥स्वतंत्रः कर्ता॥ क्रियायां स्वातंत्र्येण विवक्षितोऽर्थः कर्ता स्यात्॥ साधकतमं करणं॥
क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्॥ तमब्ग्रहणं किं॥ गंगायां घोषः॥ कर्तृकरणयोस्तृतीया॥ अनभिहिते
कर्तरि करणे च तृतीया स्यात्॥ रामेण बाणेन हतो वाली॥ प्रकृत्यादिभ्य उपसंख्यानं॥ प्रकृत्या चारुः॥ प्रायेण याज्ञिकः॥ २७
विषमेणैति ३ गोत्रेण गार्ग्यः॥ समेनैति॥ द्विद्रोणेन धान्यं क्रीणाति॥ सुखेन दुःखेन वा यातीत्यादि॥ दिवः कर्म च॥ दिवः साधकतमं क
र्मसंज्ञं स्यात् करणसंज्ञं च॥ अक्षैरक्षान्वा दीव्यति॥ अपवर्गे तृतीया॥ अपवर्गः फलप्राप्तिस्तस्यां द्योत्यायां कालाध्वनो
रत्यंतसंयोगे तृतीया स्यात्॥ अह्ना क्रोशेन वाऽनुवाकोऽधीतः॥ अपवर्गे किं॥ मासमधीतो नायातः॥ सहयुक्तेऽप्रधा

॥सि०कृ०॥ ने॥ सहयुक्तेऽप्रधाने॥ सहार्थेन युक्तेऽप्रधाने कारके तृतीया स्यात्॥ पुत्रेण सहागतः पिता॥ एवं साकं सार्धं समं योगेऽपि॥ विनापि तद्योगं का०८०
तृतीया॥ वृद्धो यूनेति निर्देशात्॥ येनांगविकारः॥ येनांगेन विकृतेनांगिनो विकारो लक्ष्यते ततस्तृतीया स्यात्॥ अक्ष्णा
॥५५॥ काणः॥ अक्षिसंबंधिकाणत्वविशिष्ट इत्यर्थः॥ अंगेति किं॥ अक्षि काणमस्य॥ इत्थंभूतलक्षणे॥ कंचित्प्रकारं प्राप्तस्य
लक्षणे तृतीया स्यात्॥ जटाभिस्तापसः॥ जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः॥ संज्ञोऽन्यतरस्यां कर्मणि॥ संपूर्वस्य
जानातेः कर्मणि तृतीया स्यात्॥ पित्रा पितरं वा संजानीते॥ हेतौ॥ हेत्वर्थे तृतीया स्यात्॥ द्रव्यादिसाधारणं निर्व्या
पारसाधारणं च हेतुत्वं॥ करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च॥ दंडेन घटः॥ पुण्येन दृष्टो हरिः॥ फलमपीह हेतुः॥
अध्ययनेन वसति॥ गम्यमानापि क्रिया विभक्तौ प्रयोजिका॥ अलं श्रमेण॥ श्रमेण साध्यं नास्तीत्यर्थः॥ इह साध
नक्रियां प्रति श्रमः करणं॥ शतेन [illegible] वत्सान् पाययति पयः॥ शतेन परिच्छिद्येत्यर्थः॥ अशिष्टव्यवहारे दाणः प्र
योगे चतुर्थ्यर्थे तृतीया॥ दास्या संयच्छते कामुकः॥ धर्मे तु भार्यायै संयच्छति॥ ॥इति तृतीया॥ ॥कर्मणा य ॥५५॥
मभिप्रैति स संप्रदानं॥ दानस्य कर्मणा यमभिप्रैति स संप्रदानसंज्ञः स्यात्॥ चतुर्थी संप्रदाने॥ स्पष्टं॥ विप्राय गां
ददाति॥ अनभिहित इत्येव॥ दानीयो विप्रः॥ क्रियया यमभिप्रैति सोऽपि संप्रदानं॥ पत्ये शेते॥ यजेः कर्मणः करण

[illegible] संप्रदानं। [illegible] २ · दानस्य कर्मणेति· दानक्रियाकर्मणा कर्ता यं अभिप्रैति [illegible] संप्रदानसंज्ञः [illegible] इत्यर्थः १
स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादनं वा पुनर्ग्रहणं २

देवदत्ताय प्रीयमाण[illegible] ३ हरिः प्रीणयतीत्यर्थः २ [illegible] ॥ [illegible] तानभवति

संज्ञा संप्रदानस्य च कर्मसंज्ञा॥ पशुना रुद्रं यजते॥ पशुं रुद्राय ददातीत्यर्थः॥ रुच्यर्थानां प्रीयमाणः॥ रुच्यर्थानां धातू
नां प्रयोगे प्रीयमाणोऽर्थः संप्रदानसंज्ञः स्यात्॥ हरये रोचते भक्तिः॥ अन्यकर्तृकोऽभिलाषो रुचिः॥ हरिनिष्ठप्रीतेर्भक्तिः
कर्त्री॥ प्रीयमाण इति किं॥ देवदत्ताय रोचते मोदकः पथि॥ श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः॥ एषां प्रयोगे बोधयितुमि
ष्टः संप्रदानं स्यात्॥ गोपी स्मरात् कृष्णाय श्लाघते॥ ह्नुते॥ तिष्ठते॥ शपते वा॥ ज्ञीप्स्यमानः किं॥ देवदत्ताय श्लाघते पथि॥
कौ धारेरुत्तमर्णः॥ धारयतेः प्रयोगे उत्तमर्ण उक्तसंज्ञः स्यात्॥ भक्ताय धारयति मोक्षं हरिः॥ उत्तमर्णः किं॥ तत्काय धा
रयति ग्रामे॥ स्पृहेरीप्सितः॥ स्पृहयतेः प्रयोगे इष्टः संप्रदानं स्यात्॥ पुष्पेभ्यः स्पृहयति॥ ईप्सितः किं॥ पुष्पे
प्रकर्ष ४ भ्यो वने स्पृहयति॥ ईप्सितमात्रे इयं संज्ञा॥ विवक्षायां तु परत्वात्कर्मसंज्ञा॥ पुष्पाणि स्पृहयति॥ क्रुधद्रुहेर्ष्यासूया
र्थानां यं प्रति कोपः॥ क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स उक्तसंज्ञः स्यात्॥ हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति
यं प्रति कोपः किं॥ भार्यामीर्ष्यति॥ मैनामन्यो द्राक्षीदिति॥ क्रोधोऽमर्षः॥ द्रोहोऽपकारः॥ ईर्ष्याऽक्षमा॥ असूया गुणे
षु दोषाविष्करणं॥ द्रुहादयोऽपि कोपप्रभवा एव गृह्यंते॥ अतो विशेषणं सामान्येन यं प्रति कोप इति॥ क्रुधद्रुहोरुप

[illegible] इत्यर्थः [illegible] इत्यर्थः [illegible] इत्यर्थः [illegible] बोधयतीत्यर्थः ८

[illegible]

रनयो ॥ सि०५९ ॥ रुद्रुहोः कर्म ॥ सोपसर्गयोर्यं प्रति कोपस्तत्कारकं कर्मसंज्ञं स्यात् ॥ क्रूरमभिक्रुध्यति ॥ अभिद्रुह्यति ॥ राधीक्ष्योर्यस्य का० रत्नु०
विप्रश्नः ॥ एतयोः कारकं संप्रदानसंज्ञं स्याद्यदीयो विविधः प्रश्नः क्रियते ॥ कृष्णाय राध्यति ॥ ईक्षते वा ॥ पृष्टो गर्गः शुभा
॥ ५८ ॥ शुभं पर्यालोचयतीत्यर्थः ॥ प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता ॥ आभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्तनरूपव्यापारस्य
कर्ता संप्रदानं स्यात् ॥ विप्राय गां प्रतिशृणोति आशृणोति वा ॥ विप्रेण मह्यं देहीति प्रवर्तितः प्रतिजानीत इत्यर्थः
अनुप्रतिगृणश्च ॥ आभ्यां गृणातेर्योगे कारकं पूर्वव्यापारस्य कर्तृभूतमुक्तसंज्ञं स्यात् ॥ होत्रेऽनुगृणाति ॥ प्र
तिगृणाति ॥ होता प्रथमं शंसति तमध्वर्युः प्रोत्साहयतीत्यर्थः ॥ परिक्रयणे संप्रदानमन्यतरस्याम् ॥ नियतकालं भृ
त्यास्वीकरणं परिक्रयणं तस्मिन्साधकतमं कारकं संप्रदानसंज्ञं वा स्यात् ॥ शतेन शताय वा परिक्रीतः ॥ तादर्थ्ये
चतुर्थी वाच्या ॥ मुक्तये हरिं भजति ॥ क्लृपि संपद्यमाने च ॥ भक्तिर्ज्ञानाय कल्पते संपद्यते जायते इत्यादि ॥ उत्पा ॥ ५८ ॥
तेन ज्ञापिते च ॥ वाताय कपिला विद्युत् ॥ हितयोगे च ॥ ब्राह्मणाय हितं ॥ क्रियार्थोपपदस्य च कर्मणि स्थानिनः ॥ कि
यार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात् ॥ फलेभ्यो याति ॥ फला

[illegible]

न्याहर्तुं यातीत्यर्थः ॥ नमस्कुर्मो नृसिंहाय ॥ नृसिंहमनुकूलयितुमित्यर्थः ॥ एवं स्वयंभुवे नमस्कृत्येत्यादावपि ॥ तुम
र्थाच्च भाववचनात् ॥ भाववचनाच्चेति सूत्रेण यो विहितो यस्तदन्ताच्चतुर्थी स्यात् ॥ यागाय याति ॥ यष्टुं यातीत्यर्थः ॥ न
मःस्वस्तिस्वाहास्वधालंवषड्योगाच्च ॥ एभिर्योगे चतुर्थी स्यात् ॥ हरये नमः ॥ उपपदविभक्तेः कारकविभक्तिर्बली
यसी ॥ नमस्करोति देवान् ॥ प्रजाभ्यः स्वस्ति ॥ अग्नये स्वाहा ॥ पितृभ्यः स्वधा ॥ अलमिति पर्याप्त्यर्थ [illegible] ग्रहणं ॥ ते
न दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्यादि ॥ प्रभ्वादियोगे षष्ठ्यपि साधु ॥ तस्मै प्रभवति ॥ स एषां ग्रामणीरिति
निर्देशात् ॥ तेन प्रभुर्बुभूषुर्भुवनत्रयस्येति सिद्धं ॥ वषडिंद्राय ॥ चकारः पुनर्विधानार्थः ॥ तेनाशीर्विवक्षायां प
रामपि चतुर्थी आशिषीति षष्ठीं बाधित्वा चतुर्थ्येव भवति ॥ स्वस्ति गोभ्यो भूयात् ॥ मन्यकर्मण्यनादरे विभाषा
प्राणिषु ॥ प्राणिवर्ज्यं मन्यतेः कर्मणि चतुर्थी वा स्यात् तिरस्कारे ॥ न त्वां तृणं मन्ये तृणाय वा ॥ श्यना [illegible] निर्देशात्त
नादियोगे न ॥ न त्वां तृणं मन्वे ॥ अप्राणिष्वित्यपनीय नौकाकान्नशुकशृगालवर्ज्येष्विति वाच्यं ॥ तेन न त्वां
नावं मन्ये इत्यत्र अप्राणित्वेऽपि न चतुर्थी ॥ न त्वां शुने मन्ये इत्यत्र प्राणित्वेऽपि भवत्येव ॥ गत्यर्थकर्मणि द्वितीयाच
अन्नं श्वाने वा

जुगुप्सा पर्यर्थकानां धातूनां कारकमपादानसंज्ञं स्यादित्यर्थः जुगुप्सानिंदा यां विरामो विरतिः प्रमादो नववधनं संयोगपूर्वको विश्लेषो विभागः संयोगमानास्तीत्यतो वार्त्तिकारंभः ५

न
॥सि०पू०॥ तुर्ध्रौवेष्टायामध्वनि॥ अध्वनिलिंगे गत्यर्थानां कर्मणि एतेस्तश्चेष्टायां॥ ग्रामं ग्रामाय वा गच्छति॥ चेष्टायां किं॥ का०चं०
मनसा हरिं व्रजति॥ अनध्वनि किं॥ पंथानं गच्छति॥ गंत्राधिष्ठिते ऽध्वन्येवायं निषेधः॥ यदा तूत्पथात्पंथा एवा
॥९१॥ तिक्रमितुमिष्यते तदा चतुर्थ्यपि भवत्येव॥ उत्पथेन पथे गच्छति॥ ॥ इति चतुर्थी॥ ॥ ध्रुवमपायेऽपा
दानं॥ अपायो विश्लेषस्तस्मिन्साध्ये ध्रुवमवधिभूतं तत्कारकमपादानं संज्ञं स्यात्॥ अपादाने पंचमी
ग्रामादायाति॥ धावतोऽश्वात्पतति॥ कारकं किं॥ वृक्षस्य पर्णं पतति॥ ॥ जुगुप्साविरामप्रमादार्थानामुपसंख्यानं॥
पापाज्जुगुप्सते॥ विरमति॥ धर्मात्प्रमाद्यति॥ भीत्रार्थानां भयहेतुः॥ भयार्थानां त्राणार्थानां प्रयोगे भयहेतुरपा
दानं स्यात्॥ चोराद्बिभेति॥ चोरात्त्रायते॥ भयहेतुः किं॥ वने बिभेति॥ त्रायते वा॥ पराजेरसोढः॥ पराजेः प्रयोगे अ
सह्योऽर्थोऽपादानं स्यात्॥ अध्ययनात्पराजयते॥ ग्लायतीत्यर्थः॥ असोढः किं॥ शत्रून्पराजयते॥ अभिभवती ॥५१॥
त्यर्थः॥ वारणार्थानामीप्सितः॥ प्रवृत्तिविघातो वारणं॥ वारणार्थानां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात्॥ यवेभ्यो
गां वारयति॥ ईप्सितः किं॥ यवेभ्यो गां वारयति क्षेत्रे॥ अंतर्धौ येनादर्शनमिच्छति॥ व्यवधाने सति यत्कर्तृक

यवसंयोगात्त्रागेव गां निवारयतीति ध्रुवमपाय इत्यनेनासिद्धावयमारंभः २ भीत्रार्थेति किं व्याघ्रं पश्यति ४

अदर्शनप्रतियोगिकारणे ३ नियमपूर्वकेति नटस्योपयोगशब्दो न तद्भवभावः ३
ब्रह्मभवस्थानादिनिर्गमः ४

स्यात्मनो दर्शनस्याभावमिच्छति तदपादानं स्यात्॥ मातुर्निलीयते कृष्णः॥ अंतर्धौ किं॥ चौरान्न दिदृक्षते॥
इच्छतिग्रहणं किं॥ अदर्शने इच्छायां सत्यां सत्यपि दर्शने यथा स्यात्॥ आख्यातोपयोगे॥ नियमपूर्वकविद्यास्वी
कारे वक्ता प्राक्संज्ञः स्यात्॥ उपाध्यायादधीते॥ उपयोगे किं॥ नटस्य गाथां शृणोति॥ जनिकर्तुः प्रकृतिः॥ जा
यमानस्य हेतुरपादानं स्यात्॥ ब्रह्मणः प्रजाः प्रजायंते॥ भुवः प्रभवः॥ भवनं भूः॥ भूकर्तुः प्रभवस्तथा॥ हिमव भवनकर्तुः४
तो गंगा प्रभवति॥ तत्र प्रकाशत इत्यर्थः॥ ल्यब्लोपे कर्मण्यधिकरणे च॥ प्रासादात्प्रेक्षते॥ आसनात्प्रेक्षते॥
प्रासादमारुह्य आसने उपविश्य प्रेक्षत इत्यर्थः॥ श्वशुराज्जिह्रेति॥ श्वशुरं निरीक्ष्येत्यर्थः॥ गम्यमानापि क्रि
याकारकविभक्तीनां निमित्तं॥ कस्मात्त्वं नद्याः॥ यतश्चाध्वकालनिर्माणं तत्र पंचमी तद्युक्तादध्वनः प्रथमा नं
सप्तम्यौ कालात्सप्तमी च वक्तव्या॥ वनाद्ग्रामो योजने योजनं वा॥ कार्त्तिक्या आग्रहायणी मासे॥ ॥ अन्यारा
दितरर्त्ते दिक्शब्दांचूत्तरपदाजाहियुक्ते॥ एतैर्योगे पंचमी॥ अन्य इत्यर्थग्रहणं॥ इतरग्रहणं प्रपंचार्थं॥ अ
न्यो भिन्न इतरो वा कृष्णात्॥ आराद्वनात्॥ ऋते कृष्णात्॥ पूर्वो ग्रामात्॥ दिशि दृष्टः शब्दो दिक्शब्दस्तेन संप्र

आराद्दूरसमीपयोः पंचम्यर्थाभिन्न ... दिक्शब्दस्तेन ... ५

कुत्रस्याभेतत्ग्रासस्तेनउपादीयतेसप्रतिनिधिः ८ इत्तस्यभतिनिमतिनंप्रतिदानं ८

तिदेशःकालःइत्यनेनायोगेपिस्यात्। चैत्रात्पूर्वः फाल्गुनः। अवयववाचियोगेतु न। तस्यपरमाम्रेडितम्। इतिनिर्देशात्। का० पंच०

॥सि० पू०॥ पूर्वंकायस्य। अंतरान्तरपदस्यादिकशब्दलोपेपिपञ्चमीतसर्पसलयेनेनिषिद्धीवाधितुं एपग्रहणं। प्राक्प्रत्यग्वाग्रामात्।

आवृत्। दक्षिणाग्रामात्। आहि। दक्षिणाहिग्रामात्। अपादानेपंचमीतिसूत्रेकार्तिक्याःप्रभृतीतिभाष्यप्रयोगात्।

॥ ५९ ॥ प्रभृत्यर्थयोगेपंचमी। भवात्प्रभृतिभवाद्यारभ्यवासेभ्योहरिः। अपपरिबहिरितिसमासविधानाज्ज्ञापकात्।

बहिर्योगेपंचमी। ग्रामाद्बहिः। अपपरीवर्जने। एतौवर्जनेकर्मप्रवचनीयौस्तः। आङ्मर्यादावचने। आङ्मर्या

दायामुक्तसंज्ञःस्यात्। वचनग्रहणादभिविधावपि। पंचम्यपाङ्परिभिः। एतैःकर्मप्रवचनीयैर्योगेपंचमीस्या

त्। अपहरेः संसारः। परिहरेः परिरत्रवर्जने। लक्षणादौतुहरिंपरि। आमुक्तेःसंसारः। आसकलाद्ब्रह्म। प्रतिःप्र लक्षणेत्थंभूताख्यानादौतु

तिनिधिप्रतिदानयोः। एतयोरर्थयोःप्रतिरुक्तसंज्ञःस्यात्। प्रतिनिधिप्रतिदानेचयस्मात्। अत्रकर्मप्रवचनी

येर्योगेपंचमीस्यात्। प्रद्युम्नः कृष्णात्प्रति। तिलेभ्यःप्रतियच्छतिमाषान्। अकर्तर्यृणेपंचमी। कर्तृवर्जितंयदृणं

हेतुस्ततःपंचमीस्यात्। शताद्बद्धः। अकर्तरीतिकिं। शतेनबंधितः। विभाषागुणेऽस्त्रियां। गुणेहेतावस्त्रीलिंगेपं ॥ ५९ ॥

चमीवास्यात्। जाड्याज्जाड्येनवाबद्धः। गुणेतिकिं। धनेनकुलं। अस्त्रियांकिं। बुध्यामुक्तः। विभाषेतियोगविभा

हरिःहरिंवेत्यर्थः ५ कृष्णप्रतिनिधिःप्रद्युम्नइत्यर्थः २ माषान्ददातिकानुद्दातीत्यर्थः २ कुत्रिंमर्यादीकृत्येत्यर्थः ५ सकलंअभिव्याप्येत्यर्थः ५

हरिकस्तानावर्जनेइत्यर्थः २ अनायासेनमुक्तइत्यर्थः ४ ८ षष्ठीहेतुप्र० अत्रहेतावित्यनुवर्त्ततदाह हेतोर्घोत्ये इति अन्नस्योतिहेताविति तृतीयायांप्राप्तायामनेनषष्ठी हेतुप्रयोगेकिं अन्नेनवसति। हेतोर्घोत्येकिं अन्नशब्दात्षष्ठीस्यादित्येके। अन्नस्यहेतोरस्तुप्येन ... सम्बन्धे ॥ ८ ॥

गादगुणेस्त्रियांचक्वचित्। धूमादग्निमान्। नास्तिघटोनुपलब्धेः। पृथग्विनानानाभिस्तृतीयान्यतरस्यां। एभि

र्योगेतृतीयास्यात्पंचमीद्वितीयेच। अन्यतरस्यांग्रहणंसमुच्चयार्थं। पंचमीद्वितीयेअनुवर्त्तेते। पृथग्रामेणरामा

द्रामंवा। एवंविनानाना। करणेचस्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य। एभ्योऽद्रव्यवचनेभ्यःकरणेतृतीया

पंचम्यौस्तः। स्तोकेनस्तोकाद्वामुक्तः। द्रव्येतुस्तोकेनविषेणहतः। दूरांतिकार्थेभ्योद्वितीयाच। एभ्योद्वितीयास्याच्चा

४ सर्वप्रातिपदिकमात्रहरस्तेन० त्पंचमीतृतीये। प्रातिपदिकमात्रेविधिरयं। ग्रामस्यदूरंदूराद्दूरेणवा। अंतिकमंतिकादंतिकेनवा। असत्ववच सत्वे

नस्येत्यनुवृत्तेर्नेह। दूरःपंथाः। ॥ इति पंचमी ॥ षष्ठीशेषे। कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः

संबंधःशेषस्तत्रषष्ठीस्यात्। राज्ञःपुरुषः। कर्मादीनामपिसंबंधमात्रविवक्षायांषष्ठ्येव। सतांगतं। सर्पिषोजा

नीते। मातुःस्मरति। एधोदकस्योपस्कुरुते। भजेशंभोश्चरणयोः। फलानांतृप्तः। षष्ठीहेतुप्रयोगे। हेतुशब्दस्यप्र

योगेहेतौद्योत्येषष्ठीस्यात्। अन्नस्यहेतोर्वसति। सर्वनाम्नस्तृतीयाच। सर्वनाम्नोहेतुशब्दस्यप्रयोगेहेतौद्यो

त्येषष्ठीस्यात्तृतीयाच। केनहेतुनावसति। कस्यहेतोः। निमित्तपर्यायप्रयोगेसर्वासांप्रायदर्शनं। किंनिमित्तं

निमित्तपर्यायेषुनेनवार्तिकेनषष्ठीहेतुप्रयोगेसर्वनाम्नस्तृतीयाचेतिसूत्रद्वयंगतार्थमितिबोध्यं ८ सर्पिषःसंबंधिज्ञानमित्यर्थः १ सर्पिःसंबंधिस्मरणमित्यर्थः

वसति॥ केननिमित्तेन॥ कस्मैनिमित्तायेत्यादि॥ एवं किं कारणं॥ किं प्रयोजनं॥ को हेतुरित्यादि॥ प्रायग्रहणात्सर्वनाम्नः शे०प०
॥सि०पू०॥ प्रथमाद्वितीयेन स्तः॥ ज्ञानेन निमित्तेन हरिः सेव्यः॥ ज्ञानाय निमित्तायेत्यादि॥ षष्ठ्यतसर्थप्रत्ययेन॥ एतद्योगे षष्ठी
॥ ५९ ॥ स्यात्॥ दिक्शब्देति पंचम्या अपवादः॥ ग्रामस्य दक्षिणतः पुरस्तात्॥ उपर्युपरिष्टात्॥ एनपा द्वितीया॥ एनबंतेन यो पु०
गे द्वितीया स्यात्॥ एनपेति योगविभागात्षष्ठ्यपि॥ दक्षिणेन ग्रामं ग्रामस्य वा॥ एवमुत्तरेण॥ दूरांतिकार्थैः षष्ठ्यन्यत
रस्यां॥ एतैर्योगे षष्ठी स्यात्पंचमी च॥ दूरं निकटं वा ग्रामस्य ग्रामाद्वा॥ ज्ञोऽविदर्थस्य करणे॥ जानातेर ज्ञानार्थस्य
करणे कारके शेषत्वेन विवक्षिते षष्ठी स्यात्॥ सर्पिषो ज्ञानं॥ अधीगर्थदयेशां कर्मणि॥ एषां कर्मणि शेषे षष्ठी
स्यात्॥ मातुः स्मरति॥ सर्पिषो दयनं॥ ईशनं वा॥ कृञः प्रतियत्ने॥ कृञः कर्मणि शेषे षष्ठी स्यात्॥ प्रतियत्नो गुणा
धानं॥ एधोदकस्योपस्करणं॥ रुजार्थानां भाववचनानामज्वरेः॥ भावकर्तृकाणां ज्वरवर्जितानां रुजार्थानां ॥ ५९ ॥
कर्मणि शेषे षष्ठी स्यात्॥ चौरस्य रोगस्य रुजा॥ अज्वरिसंताप्योरिति वाच्यं॥ रोगस्य चौरं ज्वरः॥ चौरं संतापयति वा
रोगकर्तृकं चौरसंबंधि ज्वरादिकमित्यर्थः॥ आशिषि नाथः॥ आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी॥ सर्पिषो

कर्तृकर्मणोरिति रोगपाद्व्यात्षष्ठीस्वरुजायां कर्त्री। चौरज्वरयति रुजचौरशब्दात् रुजार्थानामिति षष्ठ्या अप्रवृत्तेः षष्ठी शेषत्वेन षष्ठी समासो भवसमभावः २

माणवकनाथनं १ जसुहिंसायां नत्वौ वा दिक्रुस्य जसमोक्षणस्य २ क्राथहिंसायां ३ पिषु संचूर्णने ४ इंतेल्लपर्वस्य २

नाथनं॥ आशिषीति किं॥ नत्संबंधिनीयाच्ञेत्यर्थः॥ जासिनिप्रहणनाटक्राथपिषां हिंसायां॥ हिंसार्थानामेषां शे
षे कर्मणि षष्ठी॥ चौरस्योज्जासनं॥ निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा॥ चौरस्य निप्रहणनं॥ प्रणिहननं॥ निहननं॥ प्रह
णनं वा॥ नट अवस्यंदने चुरादिः॥ चौरस्योन्नाटनं॥ चौरस्य क्राथनं॥ वृषलस्य पेषणं॥ हिंसायां किं॥ धानापेषणं॥ व्यव
हृपणोः समर्थयोः॥ शेषे कर्मणि षष्ठी॥ द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता॥ शतस्य व्यवहरणं॥ पणनं वा॥ स
मर्थयोः किं॥ शलाकाव्यवहारः॥ गणनेत्यर्थः॥ ब्राह्मणपणनं॥ स्तुतिरित्यर्थः॥ दिवस्तदर्थस्य॥ द्यूतार्थस्य क्रयविक्र
यरूपव्यवहारार्थस्य दिवः कर्मणि षष्ठी॥ शतस्य दीव्यति॥ तदर्थस्य किं॥ ब्राह्मणं दीव्यति स्तौतीत्यर्थः॥ विभाषोपस
र्गे॥ पूर्वयोगापवादः॥ शतस्य शतं वा प्रदीव्यति॥ प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने॥ देवतासंप्रदानके प्वर्तमान
योः प्रेष्यब्रुवोः कर्मणो हविर्विशेषस्य वाचकात् शब्दात्षष्ठी स्यात्॥ अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य अ
नुब्रूहि वा॥ प्रेष्यब्रुवोरिति किं॥ अग्नये छागं हविर्वपां मेदो जुहुधि॥ कृत्वोर्थप्रयोगे कालेऽधिकरणे॥ कृत्वोर्था
नां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यात्॥ पंचकृत्वोऽह्नो भोजनं॥ द्विरह्नो भोजनं॥ शेषे किं॥ द्विरह्न्यध्ययनं॥
ह्न्य

कर्तृकर्मणोः कृति ॥ कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात् ॥ कृष्णस्य कृतिः ॥ जगतः कर्त्ता कृष्णः ॥ गुणकर्मणि वेष्यते ॥ ने शे० प०
ताश्वस्य स्रुघ्नं स्रुघ्नस्य वा ॥ कृति किं ॥ तद्धिते मा भूत् ॥ कृतपूर्वी कटं ॥ उभयप्राप्तौ कर्मणि ॥ उभयोः प्राप्तिर्यस्मि
॥सि० कौ०॥ न्तत्र कर्मण्येव षष्ठी ॥ आश्चर्यो गवां दोहो ऽगोपेन ॥ स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः ॥ भेदिका बिभित्सा वा निषेधः २
॥ ६० ॥ रुद्रस्य जगतः ॥ शेषे विभाषा ॥ स्त्रीप्रत्यय इत्येके ॥ विचित्रा जगतः कृतिर्हरेर्हरिणा वा ॥ केचिदविशेषेण विभाषा
मिच्छन्ति ॥ शब्दानामनुशासनमाचार्येणाचार्यस्य वा ॥ क्तस्य च वर्तमाने ॥ वर्तमानार्थस्य क्तस्य योगे षष्ठी ॥ न लो
केति निषेधस्यापवादः ॥ राज्ञां मतः ॥ बुद्धः पूजितो वा ॥ अधिकरणवाचिनश्च ॥ क्तस्य योगे षष्ठी स्यात् ॥ इदमेषा
मासितं शयितं ॥ न लोकाव्ययनिष्ठाखलर्थतृनां ॥ एषां प्रयोगे षष्ठी न ॥ लादेशाः ॥ कुर्वन् कुर्वाणो वा सृष्टिं हरिः ॥ उ दा
हरिं दिदृक्षुः ॥ अलंकरिष्णुर्वा ॥ उकः ॥ दैत्यान् घातुको हरिः ॥ कमेरनिषेधः ॥ लक्ष्म्याः कामुकः ॥ अव्ययं ॥ जगत्सृष्ट्वा सु ॥ ६० ॥
खं कर्तुं ॥ निष्ठा ॥ दैत्यान् हतवान् ॥ विष्णुना हता दैत्याः ॥ खलर्थः ॥ ईषत्करः प्रपञ्चो हरिणा ॥ तृन्निति प्रत्याहारः ॥ शत्
शानचाविति तृशब्दादारभ्य आ तृनो नकारात् ॥ शानन् ॥ सोमं पवमानः ॥ चानश् ॥ आत्मानं मण्डयमानः ॥ शतृ तृन्: सतो: शानच्

जिघांक्षितरूपविनाशप्रसंगात्तनामियसन्तृणत्वं न कर्तुं ४

दमधीयन् ॥ तृन् ॥ कर्ता लोकान् ॥ द्विषः शतुर्वा ॥ मुरस्य मुरं वा द्विषन् ॥ सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः ॥ शेषषष्ठी शे० प०
तु स्यादेव ॥ ब्राह्मणस्य कुर्वन् ॥ नरकस्य जिष्णुः ॥ अकेनोर्भविष्यदाधमर्ण्ययोः ॥ भविष्यत्यकस्य भविष्यदाधम
र्ण्यार्थेनश्च योगे षष्ठी न स्यात् ॥ सतः पालकोऽवतरति ॥ व्रजं गामी ॥ शतं दायी ॥ कृत्यानां कर्तरि वा ॥ षष्ठी स्या
त् ॥ मया मम वा सेव्यो हरिः ॥ कर्तरि किं ॥ गेयो माणवकः साम्नां ॥ भव्यगेयप्रवचनीयेति कर्तरि यद्विधानादिह न
तं कर्म ॥ अत्र योगो विभज्यते ॥ कृत्यानां ॥ उभयप्राप्ताविति नेति चानुवर्तते ॥ नेतव्या व्रजं गावः कृष्णेन ॥ ततः
कर्तरि वा ॥ उक्तोऽर्थः ॥ तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्यां ॥ तुल्यार्थैर्योगे तृतीया वा स्यात् पक्षे षष्ठी ॥ तुल्यः
सदृशः समो वा कृष्णस्य कृष्णेन ॥ अतुलोपमाभ्यां किं ॥ तुला उपमा वा कृष्णस्य नास्ति ॥ चतुर्थी चाशिष्यायुष्य
मद्रभद्रकुशलसुखार्थहितैः ॥ एतदर्थैर्योगे चतुर्थी वा स्यात्पक्षे षष्ठी ॥ आशीरर्थे आयुष्यं चिरंजीवितं कृष्णस्य
कृष्णाय वा भूयात् ॥ एवं मद्रं भद्रं कुशलं निरामयं सुखं शं ॥ प्रयोजनं हितं पथ्यं वा भूयात् ॥ आशिषि किं ॥ देवदत्त ते
स्यायुष्यमस्ति ॥ व्याख्यानात्सर्वत्रार्थग्रहणं ॥ मद्रभद्रयोः पर्यायत्वादन्यतरो न पठनीयः ॥ ॥ इति षष्ठी ॥ ॥
॥ आधारोऽधिकरणं ॥ कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यात् ॥ सप्तम्यधि

का॰ स॰

करणेन॥ अधिकरणे सप्तमी स्यात्॥ चकाराद्दूरांतिकार्थेभ्यः॥ औपश्लेषिको वैषयिको ऽभिव्यापकश्चेत्याधा
॥ सि॰ फ़॰ ॥ रस्त्रिधा॥ कटे आस्ते॥ स्थाल्यां पचति॥ मोक्षे इच्छास्ति॥ सर्वस्मिन्नात्मास्ति॥ वनस्य दूरे अंतिके वा॥ दूरांति
कार्थेभ्य इति॥ विभक्तित्रयेण सह द्वितीया विकल्पः फलितः॥ क्तस्येन्विषयस्य कर्मण्युपसंख्यानं॥ अधीती योगविशेषे
॥ ६२ ॥ व्याकरणे॥ अधीतं व्याकरणमनेनेति विग्रहः॥ इष्टादिभ्यश्चेति कर्त्तरीनिः॥ निमित्तात्कर्मयोगे॥ निमित्त
मिह फलं॥ योगः संयोगः समवायात्मकः॥ ॥ चर्मणि द्वीपिनं हंति दंतयोर्हंति कुंजरं॥ बालेषु चमरीं हंति
सीम्नि पुष्कलको हतः॥१॥ हेतुतृतीयात्र प्राप्ता॥ सीमांडकोशः॥ पुष्कलको गंधमृगः॥ योगविशेषे तिं किं॥
वेतनेन धान्यं लुनाति॥ यस्य च भावेन भावलक्षणं॥ यस्य क्रियया क्रियांतरं लक्ष्यते ततः सप्तमी स्यात्॥ गो
षु दुह्यमानासु गतः॥ साध्वसाधुप्रयोगे च॥ साधुः कृष्णो मातरि॥ असाधुर्मातुले॥ अर्हाणां कर्तृत्वे ऽनर्हा
णामकर्तृत्वे तद्वैपरीत्ये च॥ सत्सु तरत्सु असंत आसते॥ असत्सु तिष्ठत्सु संतस्तरंति॥ सत्सु तिष्ठत्सु अ ॥ ६२ ॥
संतस्तरंति॥ असत्सु तरत्सु संतस्तिष्ठंति॥ षष्ठी चानादरे॥ अनादराधिके भावलक्षणे षष्ठीसप्तम्यौ
स्तः॥ रुदति रुदतो वा प्राव्राजीत्॥ रुदंतं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः॥ स्वामीश्वराधिपतिदा

याद साक्षि प्रतिभू प्रसूतैश्च॥ एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः॥ षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं
वचनं॥ गवां गोषु वा स्वामी॥ गवां गोषु वा प्रसूतः॥ गा एवानुभवितुं जात इत्यर्थः॥ आयुक्तकुशलाभ्यां
चासेवायां॥ आभ्यां योगे षष्ठीसप्तम्यौ स्तस्तात्पर्येऽर्थे॥ आयुक्तो व्यापारितः॥ आयुक्तः कुशलो वा हरि
पूजने हरिपूजनस्य वा॥ आसेवायां किं॥ आयुक्तो गौः शकटे॥ ईषद्युक्त इत्यर्थः॥ यतश्च निर्धारणं॥ जा
तिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः॥ नृणां
नृषु वा ब्राह्मणः श्रेष्ठः॥ गवां गोषु कृष्णा गौः संपन्नक्षीरा॥ गच्छतां गच्छत्सु वा धावन् शीघ्रः॥ छात्राणां छात्रे
वा षु वा मैत्रः पटुः॥ पंचमी विभक्ते॥ विभागो विभक्तं॥ निर्धार्यमाणस्य यत्र भेद एव तत्र पंचमी स्यात्॥
माथुराः पाटलिपुत्रेभ्य आढ्यतराः॥ साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः॥ आभ्यां योगे सप्तमी
स्यात्॥ अर्चायां न तु प्रतेः प्रयोगे॥ मातरि साधुर्निपुणो वा॥ अर्चायां किं॥ निपुणो राज्ञो भृत्यः॥ इह
तत्त्वकथने तात्पर्यं॥ अप्रत्यादि[भि]रिति वक्तव्यं॥ साधुर्निपुणो वा मातरं प्रति पर्यनु वा॥ प्रसितो
भि

भ्या स्य स्या

तत्कर्कास्यात्ततीयाच॥ आयुक्तांयोगे तृतीयास्यात्सप्तमी॥ प्रसित उत्सुको वा हरिणा हरौ वा॥ नक्षत्रे — का० सत०
॥ सि० पू० ॥ च लुपि॥ नक्षत्रे प्रकृत्यर्थे सति यो लुप् तद्रूपा लुप्यमानात् प्रत्ययार्थस्तत्र वर्त्तमानात्तृतीयासप्तम्यौ स्तो
ऽधिकरणे॥ मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्॥ मूले श्रवणे इति वा॥ लुपि किं पुष्ये शनिः॥ सप्तमीपंचम्यौ
॥ ६२ ॥ कारकमध्ये॥ शक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्यामेते स्तः॥ अद्य भुक्त्वायं द्व्यहे द्व्यहाद्वा भोक्ता॥ कर्तृ
शक्त्योर्मध्येयं कालः॥ इहस्थोयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत्॥ कर्तृकर्मशक्त्योर्मध्येयं देशः॥ अधिक
शब्देन योगे सप्तमीपंचम्यौ विध्येते॥ तदस्मिन्नधिकमिति यस्मादधिकमिति च सूत्रनिर्देशात्॥ लोके लो
काद्वाधिको हरिः॥ अधिरीश्वरे॥ स्वस्वामिसंबंधेधिः कर्मप्रवचनीयः स्यात्॥ यस्मादधिकं यस्य चेश्वर
वचनं तत्र सप्तमी॥ अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात्॥ उप परार्धे हरेर्गुणाः॥ परार्धादधिका इ — ॥ ६२ ॥
त्यर्थः॥ ऐश्वर्ये तु स्वस्वामिपर्यायेण सप्तमी॥ अधि भुवि रामः॥ अधि रामे भूः॥ सप्तमी शौण्डैरिति
समासपक्षे तु रामाधीना॥ अषडक्षेत्यादिना खः॥ विभाषा कृञि॥ अधिःकरोतौ प्राक्संज्ञो वा स्यादी

श्वरोऽर्थे॥ यदत्र मामधिकरिष्यति॥ विनियोक्ष्यत इत्यर्थः॥ इह विनियोक्तुरीश्वरत्वं गम्यते॥ अगतित्वात्तिङि
चोदात्तवतीति निघातो न॥ ॥ कर्ता कर्म च करणं संप्रदानं तथैव च॥ अपादानाधिकरणमित्याहुः कारका
णि षट्॥ १ ॥ ॥ इति सप्तम्यंता विभक्त्यर्थाः॥ ॥ समर्थः पदविधिः॥ पदसंबंधी यो विधिः स समर्था
श्रितो बोध्यः॥ प्राक्कडारात्समासः॥ कडाराः कर्मधारय इत्यतः प्राक् समास इत्यधिक्रियते॥ सह सुपा॥ स
हेति योगो विभज्यते॥ सुबंतं समर्थेन सह समस्यते॥ योगविभागस्येष्टसिद्ध्यर्थत्वात् क्वचित्तिङंता
नेनापि समासः॥ समर्थः इत्येव॥ पर्यभूषयत्॥ अनुव्यचलत्॥ सुपा॥ सुप् सुपा सह समस्यते॥ समासत्वा
त्प्रातिपदिकत्वं॥ सुपो धातुप्रातिपदिकयोः॥ एतयोरवयवस्य सुपो लुक् स्यात्॥ भूतपूर्वे चरडिति निर्देशा
त्पूर्वनिपातः॥ पूर्वं भूतो भूतपूर्वः॥ इवेन सह समासो विभक्त्यलोपश्च॥ जीमूतस्येव वासवति॥ ॥ इति
केवलसमासः॥ ॥ अव्ययीभावः॥ अधिकारोयं प्राक्तत्पुरुषात्॥ ॥ अव्ययं विभक्तिसमीपसमृद्धि
व्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यांतवच

नेषु॥ अव्ययमिति योगो विभज्यते॥ अव्ययं समर्थेन समस्यते सोऽव्ययीभावः॥ प्रथमानिर्दिष्टं समास समा॰ अ
॥सि॰ पू॰॥ उपसर्जनं॥ समासशास्त्रे प्रथमानिर्दिष्टं तदुपसर्जनसंज्ञं स्यात्॥ उपसर्जनं पूर्वं॥ समासे उपसर्जनं प्राक्प्र
योज्यं॥ एकविभक्ति चापूर्वनिपाते॥ विग्रहे यन्नियतविभक्तिकं तदुपसर्जनं स्यान्न तु तस्य पूर्वनिपातः॥ गो
॥६२॥ स्त्रियोरुपसर्जनस्य॥ उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात्॥ अव्ययी
भावश्चेत्यव्ययत्वं॥ नाव्ययीभावादतोऽम्त्वपंचम्याः॥ अदन्तादव्ययीभावात्सुपो न लुक् तस्य पंचमीं विना
अमादेशश्च॥ दिशयोर्मध्यमपदिशं॥ क्लीबाव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियां॥ अमरः॥ तृतीयास
प्तम्योर्बहुलं॥ अदन्तादव्ययीभावात्तृतीयासप्तम्योर्बहुलममभावः स्यात्॥ अपदिशं॥ अपदिशेन॥ अप
दिशे॥ बहुलग्रहणात्सुमद्रं सुमद्रं उन्मत्तगंगमित्यादौ सप्तम्या नित्यममभावः॥ विभक्तौ त्यादिर्यमर्थः॥ विभ ॥६३॥
क्त्यादिषु वर्त्तमानं अव्ययं सुबन्तेन सह समस्यते सोऽव्ययीभावः॥ विभक्तौ तावत्॥ हरौ इत्यधिहरि
सप्तम्यर्थस्यैवात्र द्योतकोऽधिः॥ हरि ङि अधि इत्यलौकिकं विग्रहवाक्यं॥ अत्र निपातेनाभिहितत्वेऽधिक

तावच्छब्दः क्रमार्थः २

रणे वचनसामर्थ्यात्सप्तमी॥ अव्ययीभावश्च॥ अयं नपुंसकं स्यात्॥ ह्रस्वो नपुंसके प्रातिपदिकस्य॥ क्लीबे प्रातिपदिक
स्य ह्रस्वः स्यात्॥ गोपायतीति गाः पातीति वा गोपाः तस्मिन्नित्यधिगोपं॥ समीपे॥ कृष्णस्य समीपे उपकृष्णं॥ समया ग्रामं नि
कषा लंकां॥ आरादूरादित्यादिस्तत्र तु नाव्ययीभावः॥ अभितः परितः॥ अन्यारा॥ दिति द्वितीयापंचम्योर्विधानसामर्थ्यात्॥
मद्राणां समृद्धिः सुमद्रं॥ यवनानां व्यृद्धिः दुर्यवनं॥ विगता ऋद्धिः व्यृद्धिः॥ मक्षिकाणामभावो निर्मक्षिकं॥ हिमस्यात्ययो
तिहिमं॥ अत्ययो ध्वंसः॥ निद्रा संप्रति न युज्यत इत्यतिनिद्रं॥ हरिशब्दस्य प्रकाश इति हरि॥ विष्णोः पश्चादनुविष्णु॥ हरिरितिशब्दः ५
पश्चादिह स्यात्तु नायं समासः॥ ततः पश्चात्स्रंस्यते इति भाष्यप्रयोगात्॥ योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि
यथार्था॥ रूपस्य योग्यमनुरूपं॥ रूपस्य योग्यमित्यर्थः॥ अर्थमर्थं प्रतीति प्रत्यर्थं॥ प्रतिशब्दस्य वीप्सायां कर्मप्रवच
नीयसंज्ञाविधानसामर्थ्यात् तद्योगे द्वितीयागर्भं वाक्यमपि॥ शक्तिमनतिक्रम्य इति यथाशक्ति॥ हरेः सादृश्यं
सहरि॥ वक्ष्यमाणेन सहस्य सः॥ ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं॥ चक्रेण युगपदिति विग्रहे॥ अव्ययीभावे चाकाले॥ स
हस्य सः स्यादव्ययीभावे न तु काले॥ सचक्रं॥ काले तु सहपूर्वाह्णं॥ सदृशः सख्या ससखि॥ यथार्थत्वेनैव सिद्धे प

॥ सि॰ कौ॰ ॥ नः सादृश्यग्रहणं गुणभूतेपि सादृश्ये यथा स्यादित्येवमर्थं ॥ क्षत्राणां संपत्तिः सक्षत्रं ॥ ऋद्धेराधिक्यं समृद्धिः ॥ अनुरूप ॥ स॰ अव्य॰
आत्मभावः संपत्तिरिति केचित् ॥ तृणमप्यपरित्यज्य सतृणमत्ति ॥ साकल्येनेत्यर्थः ॥ न लवणमसकलेनेत्यर्थः ॥ अंते ॥
अग्निग्रंथपर्यंतमधीते साग्नि ॥ यथाऽसादृश्ये ॥ असादृश्ये एव यथाशब्दः समस्यते ॥ तेनेह न ॥ यथा हरिस्तथा हरः ॥
॥ ६४ ॥ हरेरुपमानत्वं यथाशब्दो द्योतयति ॥ तेन सादृश्ये इति वा यथार्थप्राप्तं निषिध्यते ॥ यावदवधारणे ॥ यावंतः श्लोका
स्तावंतोऽच्युतप्रणामा यावच्छ्लोकं ॥ सुप्प्रतिना मात्रार्थे ॥ शाकस्य लेशः शाकप्रति ॥ मात्रार्थे किं ॥ वृक्षं प्रति विद्योत
ते विद्युत् ॥ अक्षशलाकासंख्याः परिणा ॥ द्यूतव्यवहारे पराजय एवायं समासः ॥ अक्षेण विपरीतं वृत्तं अक्षपरि ॥ श
लाकापरि ॥ एकपरि ॥ विभाषा ॥ अधिकारोयं ॥ एतत्सामर्थ्यादेव प्राचीनानां समासानां नित्यसमासत्वं सिद्धं ॥
सुप्प्रत्येति तु न नित्यसमासः ॥ अव्ययमित्यादिना समासविधानात् ज्ञापकात् ॥ अपपरिबहिरंचवः पंचम्या ॥ अप
विष्णु संसारः ॥ अपविष्णोः ॥ परिविष्णु ॥ परिविष्णोः ॥ बहिर्वनं ॥ बहिर्वनात् ॥ प्राग्वनं ॥ प्राग्वनात् ॥ आङ्मर्यादाभि ॥ ६४ ॥
विध्योः ॥ एतयोराङ् पंचम्यंतेन वा समस्यते सोऽव्ययीभावः ॥ आमुक्ति संसारः ॥ आमुक्तेः ॥ आबालं हरिभक्तिः

आबालेभ्यः ॥ लक्षणेनाभिप्रती आभिमुख्ये ॥ आभिमुख्यद्योतकावभिप्रती चिह्नवाचिना सह प्राग्वत् ॥ अभ्यग्नि
शलभाः पतंति ॥ अग्निमभि ॥ प्रत्यग्नि ॥ अग्निं प्रति ॥ अनुर्यत्समया ॥ यं पदार्थं समया तेन लक्षणभूतेनानुः समस्यते
सोऽव्ययीभावः ॥ अनुवनमशनिर्गतः ॥ वनस्य समीपं गत इत्यर्थः ॥ यस्य चायामः ॥ यस्य दैर्घ्यमनुना द्योत्यते तेन लक्षणभू
तेनानुः समस्यते सोऽव्ययीभावः ॥ अनुगंगं वाराणसी ॥ गंगाया अनु ॥ गंगादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः ॥ तिष्ठद्गुप्र
भृतीनि च ॥ एतानि निपात्यंते ॥ तिष्ठंति गावो यस्मिन्काले स तिष्ठद्गु दोहनकालः ॥ आयांति गावो यस्मिन्स आयतीग
वं ॥ इह शत्रादेशः पुंवद्भावविरहः समासांतश्च निपात्यते ॥ इत्यादि ॥ पारे मध्ये षष्ठ्या वा ॥ पारमध्यशब्दौ षष्ठ्यंतेन सह वा
समस्येते ॥ एदंतत्वं चानयोर्निपात्यते ॥ पक्षे षष्ठीतत्पुरुषः ॥ पारेगंगं ॥ पारेगंगादानय ॥ गंगापारात् ॥ मध्येगंगं ॥ मध्ये
गंगात् ॥ गंगामध्यात् ॥ महाविभाषया वाक्यमपि ॥ गंगायाः पारात् ॥ गंगाया मध्यात् ॥ संख्या वंश्येन ॥ वंशो द्विधा ॥ वि
द्यया जन्मना च ॥ तत्र भवो वंश्यः ॥ तद्वाचिना सह संख्या वा समस्यते ॥ द्वौ मुनी वंश्यौ द्विमुनि ॥ व्याकरणस्य त्रिमुनिः
विद्यातद्वतामभेदविवक्षया त्रिमुनि व्याकरणं ॥ एकविंशति भारद्वाजं वंश्याय स्य तत् एकविंशति भारद्वाजं ॥

द्विमुनीति ॥ पाणिनिकात्यायनौ ॥ त्रिमुनीति तेरो पतंजलिश्चेति त्रयो वंश्याः व्याकरणस्य त्रिमुनिरिति संबंधे षष्ठी ॥ अपदार्थप्राधान्य एवायं समासः मह
त्यन्यपदार्थप्राधान्यविवक्षायां त्रयो मुनयो वंश्या यस्मात् तदा बहुव्रीहिरेव स्यात् ॥

अग्नेः समीपमित्यर्थः ६ लक्षणेनाभिप्रती आभिमुख्ये इत्यनेन समासः अक्ष्णोः आभिमुख्यमि अग्निं प्रति अभिमुखं लक्षणेनाभिप्रती इति समासः ४
सर्वे लक्षणेनाभिप्रती इति समासः ६

निमु

नदीभिश्च ॥ नदीभिः संख्या प्राग्वत् ॥ समाहारे चायमिष्यते ॥ सप्तगंगं ॥ द्वियमुनं ॥ अन्यपदार्थे च संज्ञायां ॥ अ स० अव्य०
॥ सि० कौ० ॥ न्यपदार्थे वर्त्तमानं सुबंतं नदीभिः सह समस्यते संज्ञायां ॥ विभाषाधिकारेपि वाक्येन संज्ञानवगमादिह नित्यस
समासः ॥ उन्मत्तगंगं नाम देशः ॥ लोहितगंगं ॥ समासांताः ॥ इत्यधिकृत्य ॥ अव्ययीभावे शरत्प्रभृतिभ्यः ॥ शरदा
॥ ६९ ॥ दिभ्यष्टच् स्यात्समासांतोऽव्ययीभावे ॥ शरदः समीपं उपशरदं ॥ प्रतिविपाशं ॥ शरद् ॥ विपाश् ॥ अनस् ॥ मनस् ॥
उपानह् ॥ दिव् ॥ हिमवत् ॥ अनडुह् ॥ दिश् ॥ दृश् ॥ विश् ॥ चेतस् ॥ चतुर् ॥ त्यद् ॥ तद् ॥ यद् ॥ कियत् ॥ जराया जरश्च ॥ उ
पजरसं ॥ प्रतिपरसमनुभ्योऽक्ष्णः ॥ यस्येति च ॥ प्रत्यक्षं ॥ अक्ष्णः परमिति विग्रहे समासांतविधानसामर्थ्यादव्य अक्ष्णोयत्नं
यीभावः ॥ परोक्षे लिडिति निपातनात् परस्यौकारादेशः ॥ परोक्षं ॥ परोक्षा क्रियेत्यादौ तु अर्शआद्यच् ॥ समक्षं ॥
अन्वक्षं ॥ अनश्च ॥ अन्नंतादव्ययीभावाट्टच् स्यात् ॥ नस्तद्धिते ॥ नांतस्य भस्य टेर्लोपस्तद्धिते परे ॥ उपराजं ॥ अध्यात्मं ॥ ॥ ६९ ॥
नपुंसकादन्यतरस्यां ॥ अन्नंतं यत् क्लीबं तदंतादव्ययीभावाट्टज्वा स्यात् ॥ उपचर्मं ॥ उपचर्म ॥ नदीपौर्णमास्याग्रहा
यणीभ्यः ॥ टज्वा स्यात् ॥ उपनदं ॥ उपनदि ॥ उपपौर्णमासं ॥ उपपौर्णमासि ॥ उपाग्रहायणं ॥ उपाग्रहायणि ॥ झयः ॥

अनक्षमिति अक्ष्णः पश्चादित्यर्थे अव्ययीभावः ३ परोक्षमिति अविषय इत्यर्थः इंद्रियविषये आश्रितः इंद्रियमात्रपरः ४ आत्मनि अध्यात्मं विभक्त्यर्थे अव्ययीभावसमासः ३

झयंतादव्ययीभावाट्टज्वा स्यात् ॥ उपसमिधं ॥ उपसमित् ॥ गिरेश्च सेनकस्य ॥ गिर्यंतादव्ययीभावाट्टज्वा स्यात् ॥ सेन
कग्रहणं पूजार्थं ॥ उपगिरं ॥ उपगिरि ॥ ॥ इत्यव्ययीभावः ॥ ॥ तत्पुरुषः ॥ अधिकारोयं प्राग्बहुव्रीहेः ॥ द्विगुश्च ॥ द्वि
गुरपि तत्पुरुषसंज्ञः स्यात् ॥ इदं सूत्रं त्यक्तुं शक्यं ॥ संख्यापूर्वो द्विगुश्चेति पठित्वा चकारबलेन संज्ञासमावेशस्य सुवच
त्वात् ॥ समासांतः प्रयोजनं ॥ द्विगोस्तत्पुरुषसंज्ञाविधानफलं समासांत इत्यर्थः ॥ पंचराजं ॥ द्वितीया श्रितातीतप
तितगतात्यस्तप्राप्तापन्नैः ॥ द्वितीयांतं श्रितादिप्रकृतिकैः सुबंतैः सह वा समस्यते स तत्पुरुषः स्यात् ॥ कृष्णं श्रितः
कृष्णश्रितः ॥ दुःखातीतः ॥ कूपपतितः ॥ ग्रामगतः ॥ गम्यादीनामुपसंख्यानं ॥ ग्रामं गमी ग्रामगमी ॥ अन्नं बुभुक्षुरन्न
बुभुक्षुः ॥ स्वयं क्तेन ॥ द्वितीयेति न संबध्यते ॥ अयोग्यत्वात् ॥ स्वयं कृतस्यापत्यं स्वायंकृतिः ॥ खट्वा क्षेपे ॥ खट्वा
प्रकृतिकं द्वितीयांतं क्तांतप्रकृतिकेन सुबंतेन समस्यते निंदायां ॥ खट्वारूढो जाल्मः ॥ नित्यसमासोयं ॥ न हि वाक्ये
न निंदा गम्यते ॥ सामि ॥ सामीत्येतदव्ययं क्तांतेन सह समस्यते ॥ सामिकृतं ॥ कालाः ॥ क्तेनेत्येव ॥ अनत्यंतसं
योगार्थं वचनं ॥ मासप्रमितः प्रतिपच्चंद्रः ॥ मासं परिच्छेत्तुमारब्धवान् ॥ अत्यंतसंयोगे च ॥ काला इत्येव ॥ अ[illegible]

सामिशब्दोऽयं अर्धपर्याय २ कूपपतितः दुःखातीतः दुःखापन्नः ६ जाल्मोऽसमीक्ष्यकारी स्यादित्यमरः ब्रह्मचर्यव्रतभूमिशयनादिधर्मरहितः खट्वारोहति स जाल्मः ३

शंकुलया खंड इति करणे तृतीया [illegible] उत्पादनः एवं तु शब्दः [illegible] गुणं दर्शितवा [illegible] लक्षणवान् [illegible]
[illegible] गुणवचनो भवति २ — शद्वे — [illegible] प्रयोजने करणे तृतीया २

ता तार्थवचनं॥ मुहूर्त्तसुखं मुहूर्त्तसुखं॥ तृतीया तत्कृतार्थेन गुणवचनेन॥ तत्कृतेति लुप्ततृतीयाकं॥ तृतीयांतं तृती स० तत्पु०
॥ सि० पू० ॥ यांतार्थकृतगुणवचनेन अर्थेन च सह प्राग्वत्॥ तत्पुरुषसंज्ञकः स्यादित्यर्थः॥ शंकुलया खंडः शंकुलाखंडः॥ धान्येनार्थो
धान्यार्थः॥ तत्कृतार्थेति किं॥ अक्ष्णा काणः॥ पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः॥ तृतीयांतमेतैः प्रा
॥ ६६ १ ग्वत्॥ मासेन पूर्वः मासपूर्वः॥ मातृसदृशः॥ पितृसमः॥ ऊनार्थे॥ माषोनं कार्षापणं॥ माषविकलं॥ वाक्कलहः॥
आचारनिपुणः॥ गुडमिश्रः॥ आचारश्लक्ष्णः॥ मिश्रग्रहणे सोपसर्गस्यापि ग्रहणं॥ मिश्रं चानुपसर्गमसंधा
३ वित्यत्रानुपसर्गग्रहणाज्ज्ञापकात्॥ गुडसंमिश्रा धानाः॥ अवरस्योपसंख्यानं॥ मासेनावरो मासावरः॥ कर्तृ
करणे कृता बहुलं॥ कर्त्तरि करणे च तृतीया कृदंतेन बहुलं प्राग्वत्॥ हरिणा त्रातो हरित्रातः॥ नखैर्भिन्नो नखभि
न्नः॥ कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं॥ नखनिर्भिन्नः॥ कृतादि किं॥ काष्ठैः पचतितरां॥ कृत्यैरधिकार्थवचने॥ ॥ ६६ ॥
स्तुतिनिंदाफलकमर्थवादवचनमधिकार्थवचनं तत्र कर्त्तरि करणे च तृतीया कृत्यैः सह प्राग्वत्॥ काकपेया न
दी॥ वातच्छेद्यं तृणं॥ अन्नेन व्यंजनं॥ संस्कारद्रव्यवाचकं तृतीयांतमन्नेन प्राग्वत्॥ दध्ना ओदनो दध्योदनः॥

२ पूर्णतोया नदी काकैरपि पातुं शक्यत इति स्तुतिः॥ अल्पतोयत्वेन निंदा वा॥ कोमलत्वाद्वातेनापि छेत्तुं शक्यत इति स्तुतिः॥ वातेनापि छेत्तुं शक्यते निर्बलत्वादिति निंदा वा २

चतुर्थीति [illegible] प्रत्ययग्रहणान्नांतग्रहणं॥ चतुर्थ्यंतेन सामर्थ्यात् [illegible] चतुर्थ्यंतं [illegible]
द्वयवद्यर्थादिति [illegible] चतुर्थ्यंतं समस्यत इत्यर्थः॥ हितसुखग्रहणं ज्ञापकं तद्योगे चतुर्थी आशिषीति अतादर्थ्येऽपि चतुर्थीसंभवादिति [illegible] चतुर्थी २

द्रव्यांतर्भूतोपसेकक्रियाद्वारा सामर्थ्यं॥ भक्ष्येण मिश्रीकरणं॥ गुडेन धानाः गुडधानाः॥ मिश्रक्रियाद्वारा सामर्थ्यं॥
चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः॥ चतुर्थ्यंतार्थाय यत्तद्वाचिना अर्थादिभिश्च चतुर्थ्यंतं वा प्राग्वत्॥ तदर्थे
२ दारुरूपप्रकृतेः न प्रकृतिविकृतिभाव एव॥ बलिरक्षितग्रहणाज्ज्ञापकात्॥ यूपाय दारु यूपदारु॥ नेह॥ रंधनाय स्थाली॥ अश्व
घासादयस्तु षष्ठीतत्पुरुषाः समासाः॥ अर्थेन नित्यसमासो विशेष्यलिंगता चेति वक्तव्यं॥ द्विजायायं द्विजार्थः
सूपः॥ द्विजार्था यवागूः॥ द्विजार्थं पयः॥ भूतेभ्यो बलिः भूतबलिः॥ गोहितं॥ गोसुखं॥ गोरक्षितं॥ पंचमी भयेन॥ पंचमी
भयेन वा समस्यते॥ चोराद्भयं चोरभयं॥ भयभीतभीतिभीभिरिति वक्तव्यं॥ वृकाद्भीतिः वृकभीतिः॥ अपेतापोढमु
क्तपतितापत्रस्तैरल्पशः॥ एतैः सहाल्पं पंचम्यंतं समस्यते स तत्पुरुषः॥ सुखादपेतः सुखापेतः॥ कल्पनापोढः॥ च
क्रमुक्तः॥ स्वर्गपतितः॥ तरंगापत्रस्तः॥ अल्पशः किं॥ प्रासादात्पतितः॥ स्तोकांतिकदूरार्थकृच्छ्राणि क्तेन॥ स्तोका
न्मुक्तः॥ अल्पान्मुक्तः॥ अंतिकादागतः॥ अभ्याशादागतः॥ दूरादागतः॥ विप्रकृष्टादागतः॥ कृच्छ्रादागतः॥ पंचम्या
स्तोकादिभ्यः इत्यलुक्॥ षष्ठी॥ षष्ठ्यंतं सुबंतेन सह वा समस्यते॥ राज्ञः पुरुषो राजपुरुषः॥ याजकादिभिश्च॥

राजपुरुष इति राजन् अस् पुरुष सु इति अलौकिकविग्रहे समासे कृते सुपो लुकि अंतर्वर्तिनीं विभक्तिमाश्रित्य पदत्वान्नलोपः २

३ कर्तृकर्मणोः कृतीति कृत्संज्ञानयोगेन कर्तर्यर्थः प्रतिपदविधानेत्य स्यबाधनायारंभव्यं ३

याजक। पूजक। परिचारक। परिषेचक। स्नातक। अध्यापक। उत्सादक। होतृ। पोतृ। भर्तृ। रथगणक। पत्तिगणक। इत्यादि २

एतैः षष्ठ्यंतं समस्यते। तृजकाभ्यां कर्तरीत्यस्य प्रतिप्रसवोयं। ब्राह्मणयाजकः। देवपूजकः। गुणात्तरेण तरलोप स० तत्पु०
॥ सि० प्र ॥ श्चेति वक्तव्यं। तरबंतं यद्गुणवाचि तेन समासस्तरप्प्रत्ययलोपश्च। न निर्धारण इति पूरणगुण इति च निषेधस्याय
प्रतिप्रसवोयं। सर्वेषां श्वेततरः सर्वश्वेतः। सर्वेषां महत्तरः सर्वमहान्। कृद्योगा च षष्ठी समस्यत इति वाच्यं। व्रश्च्यते
॥ ६ ॥ छिद्यतेनेनेति प्रव्रश्चनः। कुठारादिः करणे ल्युट्। इध्मस्य प्रव्रश्चन इध्मप्रव्रश्चनः। न निर्धारणे। निर्धारणे या षष्ठी सा प्र४
न समस्यते। नृणां द्विजः श्रेष्ठः। प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यं। सर्पिषो ज्ञानं। पूरणगुणसुहिता
दव्ययतव्य र्थसदव्ययतव्यसमानाधिकरणेन। पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते। पूरणे। सतां षष्ठः। गुणे। काकस्य कार्ष्ण्यं। ब्राह्मण
स्य शुक्लाः। यदा प्रकरणादिना दंता इति विशेष्यं ज्ञातं तदेदमुदाहरणं। अनित्योयं गुणेन निषेधः। संज्ञाप्रमा
त्यादि णत्वादिनिर्देशात्। तेनार्थगौरवं बुद्धिमांद्यमित्यादि सिद्धं। सुहितार्थास्तृप्त्यर्थाः। फलानां सुहितः। तृप्त इत्यर्थः ॥ ६९ ॥
तृतीयासमासस्त्वस्त्येव। स्वरे विशेषः। सत्। द्विजस्य कुर्वन् कुर्वाणो वा। किंकर इत्यर्थः। अव्यये। ब्राह्मणस्य
कृत्वा। पूर्वोत्तरसाहचर्यात्कृदव्ययमेव गृह्यते। तेन तदुपरीत्यादि सिद्धमिति रक्षितः। तव्य। ब्राह्मणस्य कर्तव्यं॥

५ पदं पदं प्रति विहिता प्रतिपदविधाना षष्ठी शेषे इति विहितान्येन ज्ञो विदर्थस्येत्यादिना विहिता सर्वैव षष्ठीत्यर्थः। धातुकारकविशेषं गृहीत्वैव ज्ञोविदर्थस्येत्यादिना षष्ठी विधीयत इति भवति तस्याः प्रतिपदविधानत्वं ५

सोप्यनेनेति। षष्ठीसमासेन पोटायुवतीति समासो वारितः सोपि षष्ठीसमासः पूरणगुणेत्यनेन वार्यत इत्यर्थः ३

तव्यता तु भवत्येव। निरनुबंधग्रहणे न सानुबंधकस्येति परिभाषया स्वकर्तव्यं। स्वरे भेदः। समानाधिकरणे। त
क्षकस्य सर्पस्य। विशेषणसमासस्त्विह बहुलग्रहणान्न। गोर्धेनोरित्यादिषु पोटायुवतीत्यादीनां विषयत्वं तत्र चरिता ॥ ६८ ॥
र्थानां परत्वाद्बाधकः षष्ठीसमासः प्राप्तः सोप्यनेन वार्यते। क्तेन च पूजायां। मतिबुद्धीति सूत्रेण विहितो यः क्तस्तदंतेन
षष्ठी न समस्यते। राज्ञां मतः बुद्धः पूजितो वा। राजपूजित इत्यादौ तु भूते क्तः। तेन सह तृतीयांतस्य समासः। अधिकरण
वाचिना च। क्तेन षष्ठी न समस्यते। इदमेषामासितं गतं भुक्तं वा। कर्मणि च। उभयप्राप्तौ कर्मणीति या षष्ठी सा न सम
स्यते। आश्चर्यो गवां दोहो ऽगोपेन। तृजकाभ्यां कर्तरि। कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः। अपां स्रष्टा। वज्रस्य भर्ता। ओ
न दनस्य पाचकः। कर्तरि किं। इक्षूणां भक्षणमिक्षुभक्षिका। पत्यर्थभर्तृशब्दस्य याजकादित्वात्समासः। भूभर्ता। कथं तर्हि
घटानां निर्मातुस्त्रिभुवनविधातुश्च कलह इति। शेषषष्ठ्या समास इति कैयटः। कर्तरि च। कर्तरि षष्ठ्या अकेन न समासः। भ सि
वतः शायिका। नेह तृजनुवर्तते। तद्योगे कर्तुरभिहितत्वेन कर्तृषष्ठ्या अभावात्। नित्यं क्रीडाजीविकयोः। एतयोरर्थ
योरकेन नित्यं षष्ठी समस्यते। उद्दालकपुष्पभंजिका। क्रीडाविशेषस्य संज्ञा। संज्ञायामिति ण्वुल्। जीविकायां।
दंतलेखकः। तत्र क्रीडायां विकल्पे जीविकायां तृजकाभ्यां कर्तरीति निषेधे प्राप्ते वचनं। पूर्वापराधरोत्तरमेकदेशिनै

पूर्वं नाभेरिति । नाभेरर्थः पूर्वो भागः स कायस्यावयवस्त्वर्थः । नाभेस्तु दिग्योगे लक्षणा पंचमी अन्यारादिति सूत्रे दिक्शब्दः शब्दो दिक्शब्दैरिति व्याख्यानेन । तेनात्र पूर्वस्य भागस्य नाभिरवधिः न त्वेकदेशिनीति तेनास्य सह समासो न तत्र भाः । कायेन तु स्यादेव पूर्वकायो नाभेरिति २
छात्राणामेकदेशित्वेनस्वावयवत्वैकदेश्यभावान्न समासः ३

॥ सि० कौ० ॥ काधिकरणे ॥ अवयविना सह पूर्वादयः समस्यंते ॥ एकत्वसंख्याविशिष्टश्चेदवयवी ॥ ष स० तत्पु०
ष्ठी ॥ षष्ठ्यंतं सुबंतेन समस्यते तस्यापवादः ॥ पूर्वं कायस्य पूर्वकायः ॥ अपरकायः ॥ एकदेशिना किं ॥ पूर्वं नाभेः कायस्य ॥
एकाधिकरणे किं ॥ पूर्वं छात्राणां ॥ सर्वोप्येकदेशो ह्ना समस्यते ॥ संख्याविसायेति ज्ञापकात् ॥ मध्याह्नः सायाह्नः ॥ केचि
॥ ६९ ॥ त्तु सर्व एकदेशः कालेन समस्यते न तु देशैः ॥ ज्ञापकस्य सामान्यापेक्षत्वात् ॥ तेन मध्यरात्रः ॥ उपारताः पश्चिमरात्रगोचरादि
त्यादि सिद्धमित्याहुः ॥ अर्द्धं नपुंसकं ॥ समांशवाच्यर्द्धशब्दो नित्यं क्लीबे स प्राग्वत् ॥ एकविभक्तावषष्ठ्यंतवचनं ॥ एकदे
तेनार्द्धपिप्पली सादौ ह्रस्वत्वं ५ शिना समासविषये उपसर्जनसंज्ञानिषेधः ॥ तेन नपुंसकह्रस्वत्वादि सिध्यति ॥ अर्द्धं पिप्पल्या अर्धपिप्पली ॥ क्लीबे
किं ॥ ग्रामार्द्धः ॥ द्रव्यैक्य एव ॥ अर्द्धं पिप्पलीनां ॥ द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां ॥ एतान्येकदेशिना सह प्राग्वत् वा ॥
द्वितीयं भिक्षाया द्वितीयभिक्षा ॥ एकदेशिना किं ॥ द्वितीयं भिक्षाया भिक्षुकस्य ॥ अन्यतरस्यांग्रहणसामर्थ्यात्पूरणगु ॥ ६९ ॥
णेति निषेधं बाधित्वा पक्षे षष्ठीसमासः ॥ भिक्षाद्वितीयं ॥ प्राप्तापन्ने च द्वितीयया ॥ पक्षे द्वितीया श्रितेति समासः ॥ प्राप्तो
जीविकां प्राप्तजीविकः ॥ जीविकाप्राप्तः ॥ आपन्नजीविकः ॥ जीविकापन्नः ॥ इह सूत्रे द्वितीयया अ इति च्छित्वा अकारो
प्राप्तजीविकेत्यत्र अ स्यैतिह्नस्वः विधीयते ॥ तेन जीविकां प्राप्ता स्त्री प्राप्तजीविका ॥ आपन्नजीविका ॥ कालाः परिमाणिना ॥ परिच्छेद्यवाचिना सु

द्वितीयया अ इति प्राप्तास्त्रीति । एकादेशस्य पूर्वान्तत्वेन ग्रहणात् लिंगविशिष्टपरिभाषया वा टाबंतयोरपि प्राप्तापन्नयोः समासः ४

कण्ठेर्किं मासे देया भिक्षा । कृत्यग्रहणं नियोगोपलक्षणार्थं । आवश्यके किं ७

सुबंतेन सह कालाः समस्यंते ॥ मासो जातस्य यस्य स मासजातः ॥ द्व्यहजातः ॥ द्वयोरह्नोः समाहारो द्व्यहः ॥ द्व्यहो जातस्येति
विग्रहः ॥ उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानं ॥ द्व्यहनी जातस्य यस्य स द्व्यह्नजातः ॥ अ
द्वयोरह्नोस्सर ह्नोह्न इति वक्ष्यमाणो ह्नादेशः ॥ पूर्वत्र तु न संख्यादेः समाहार इति तन्निषेधः ॥ सप्तमी शौंडैः ॥ सप्तम्यंतं शौंडादिभिः प्राग्व
शौंडप्रवीणः त् ॥ अक्षेषु शौंडः अक्षशौंडः ॥ अधिशब्दोत्र पठ्यते ॥ अध्युत्तरपदादिति खः ॥ ईश्वराधीनः ॥ सिद्धशुष्कपक्वबंधैश्च ॥
एतैः सप्तमी प्राग्वत् ॥ सांकाश्यसिद्धः ॥ आतपशुष्कः ॥ स्थालीपक्वः ॥ चक्रबंधः ॥ ध्वांक्षेण क्षेपे ॥ ध्वांक्षवाचिना सह सप्तम्य
तं प्राग्वन्निंदायां ॥ तीर्थे ध्वांक्ष इव तीर्थध्वांक्षः ॥ तीर्थकाक इत्यर्थः ॥ कृत्यैरृणे ॥ सप्तम्यंतं कृत्यप्रत्ययांतैः सह प्राग्वदाव क्षेपकिं तीर्थेध्वांक्षः
श्यके ॥ मासे देयमृणं ॥ पूर्वाह्णे गेयं साम ॥ संज्ञायां ॥ सप्तम्यंतं सुपा प्राग्वत्संज्ञायां ॥ वाक्येन संज्ञानवगमान्नित्यसमा सुखितिष्ठति ५
तत्पुरुषेकृतीत्यलुक् सोयं ॥ अरण्येतिलकाः ॥ वनेकसेरुकाः ॥ हलदंतात्सप्तम्या इत्यलुक् ॥ क्तेनाहोरात्रावयवाः ॥ अह्नो रात्रेश्चावयवाः सप्त
म्यंताः क्तांतेन सह प्राग्वत् ॥ पूर्वाह्णकृतं ॥ अपररात्रकृतं ॥ अवयवग्रहणं किं ॥ अह्नि दृष्टं ॥ तत्र ॥ तत्रेत्येतत्सप्तम्यंतं क्तां
तेन सह प्राग्वत् ॥ तत्रभुक्तं ॥ क्षेपे ॥ सप्तम्यंतं क्तांतेन सह प्राग्वन्निंदायां ॥ अवतप्तेनकुलस्थितं त एतत् ॥ पात्रेसमिता

अवतप्तइति । नकुलेन स्थितं नकुलस्थितं कर्तृकरणे कृतेति समासः । कृद्ग्रहणपरिभाषयाऽनकुलस्थितशब्दोपि क्तांत इति तेन सह सप्तम्यंतस्य स
मासस्तत्पुरुषे कृतीति सप्तम्या अलुक् अव्यवस्थितत्वप्रतिपत्त्यात्रापि दाव गम्यते ९

पूर्वकालस्त्सर्वनिर्देशः

॥सि॰ कृ॰॥ दयश्च ॥ एते निपात्यंते क्षेपे ॥ पात्रेसमिताः ॥ भोजनसमय एव संगताः ॥ न तु कार्ये ॥ गेहेशूरः ॥ गेहेनर्दी ॥ आकृतिग स॰ तत्पु॰
णोयं ॥ चकारोवधारणार्थः ॥ तेनैषां समासांतरे घटकतया प्रवेशो न ॥ पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समाना
॥ ६९ ॥ धिकरणेन ॥ विशेषणं विशेष्येणेति सिद्धे पूर्वनिपातनियमार्थं सूत्रं ॥ एकदेशस्यादिक्त्वेप्यसंज्ञायामिति नियमबाधना
र्थं च ॥ पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः ॥ एकनाथः ॥ सर्वयाज्ञिकाः ॥ जरन्नैयायिकाः ॥ पुराणमीमांसकाः ॥ नव
पाठकाः ॥ केवलवैयाकरणः ॥ दिक्संख्ये संज्ञायां ॥ समानाधिकरणेनेत्यापादसमाप्तेरधिकारः ॥ संज्ञायामेवेति
१ पूर्वश्चासौ इषुकामशमीति विग्रहः १ नियमार्थं सूत्रं ॥ पूर्वेषुकामशमी ॥ सप्तर्षयः ॥ नेह ॥ उत्तरा वृक्षाः ॥ पंच ब्राह्मणाः ॥ तद्धितार्थोत्तरपदसमाहारे च ॥ त
द्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत् ॥ पूर्वस्यां शालायां भवः पौर्वशालः ॥ समासे
कृते दिक्पूर्वपदादसंज्ञायां ञ इति ञः ॥ सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः ॥ आपरशालः ॥ पूर्वा शाला प्रिया यस्येति ॥ ६९ ॥
त्रिपदे बहुव्रीहौ कृते प्रियाशब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः ॥ तेन शालाशब्दे आकार उदात्तः ॥ पूर्वशालाप्रियः ॥ दि
क्समाहारो [illegible] नास्त्यनभिधानात् ॥ संख्यायास्तद्धितार्थे तु षण्णां मातॄणामपत्यं षाण्मातुरः ॥ पंचगावो धनं

उपमीयतेनत उपमाने येनवस्त्वंतरं सादृश्येनपरिच्छिद्यते तेतदुपमानमित्यर्थः १

यस्येति त्रिपदे बहुव्रीहौ आवांतरतत्पुरुषस्य विकल्पे प्राप्ते ॥ द्वंद्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनं ॥ गोरत
द्धितलुकि ॥ गोंतात्तत्पुरुषाट्टच् स्यात्समासांतो न तु तद्धितलुकि ॥ पंचगवधनः ॥ पंचानां गवां समाहारः ॥ संख्यापूर्वो द्विगुः
त तद्धितार्थेत्यत्रोक्तः संख्यापूर्वो द्विगुः स्यात् ॥ द्विगुरेकवचनं ॥ द्विग्वर्थः समाहार एकवत्स्यात् ॥ स नपुंसकमिति नपुंस
कत्वं ॥ पंचगवं ॥ कुत्सितानि कुत्सनैः ॥ कुत्स्यमानानि कुत्सनैः सह प्राग्वत् ॥ वैयाकरणखसूचिः ॥ मीमांसकदुर्दुरूढः
पापाणके कुत्सितैः ॥ पूर्वसूत्रापवादः ॥ पापनापितः ॥ अणककुलालः ॥ उपमानानि सामान्यवचनैः ॥ घनइव श्यामः
घनश्यामः ॥ इह पूर्वपदं तत्सदृशे लाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः प्रयुज्यते ॥ पूर्वनिपातनियमार्थं सू
त्रं ॥ उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ॥ उपमेयं व्याघ्रादिभिः सह प्राग्वत् साधारणधर्मस्याप्रयोगे सति ॥ वि
शेष्यस्य पूर्वनिपातार्थं सूत्रं ॥ पुरुषोव्याघ्र इव पुरुषव्याघ्रः ॥ नृसोमः ॥ व्याघ्रादिराकृतिगणः ॥ सामान्याप्रयोगे किं ॥ पु
रुषो व्याघ्र इव शूरः ॥ विशेषणं विशेष्येण बहुलं ॥ भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्वत् ॥ नीलमुत्पलं नीलो

नञ्समासाभावे तन्नञ्रहितैः समस्यते इति सूत्रार्थः ॥ एकदेशाकरणादकृतं ॥ एकदेशान्तरस्याकरणात्कृतं ४

त्वं ॥ बहुलग्रहणात्क्वचिन्नित्यं ॥ कृष्णसर्पः ॥ क्वचिन्न ॥ रामो जामदग्न्यः ॥ पूर्वापरप्रथमचरमजघन्यसमानमध्य स० तत्पु०
॥ सि० कौ० ॥ मध्यमवीराश्च ॥ पूर्वनिपातनियमार्थं सूत्रं ॥ पूर्ववैयाकरणः ॥ अपराध्यापकः ॥ अपरस्यार्द्धे पश्चभावो वक्तव्यः ॥ अपर
श्चासावर्धश्च पश्चार्धः ॥ कथमेकवीर इति ॥ पूर्वकालैकेति बाधित्वा परत्वादनेन समासे वीरैक इति हि स्यात् ॥ एकवी
॥ १०१ ॥ र इत्यत्र पूर्वकालैकसूत्रं यद्यपि पूर्वं तथापि विते नैव समासः ॥ बाहुलकाद्भविष्यति ॥ श्रेण्यादयः कृतादिभिः ॥ श्रेण्यादिषु
च्व्यर्थवचनं कर्तव्यं ॥ अश्रेणयः श्रेणयः कृताः श्रेणीकृताः ॥ क्तेन नञ्विशिष्टेनानञ् ॥ कृतं च तदकृतं च कृताकृतं ॥
शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानं ॥ शाकप्रियः पार्थिवः शाकपार्थिवः ॥ देवपूजको ब्राह्मणः ॥
देवब्राह्मणः ॥ सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ॥ सद्वैद्यः ॥ महावैयाकरणः ॥ वक्ष्यमाणेन महत आकारः ॥ पूज्य
मानैः किं ॥ उत्कृष्टो गौः ॥ पंकादुद्धृत इत्यर्थः ॥ वृन्दारकनागकुञ्जरैः पूज्यमानं ॥ गोवृन्दारकः ॥ व्याघ्रादेराकृतिगण ॥ १०१ ॥
त्वादेव सिद्धे सामान्यप्रयोगार्थं वचनं ॥ कतरकतमौ जातिपरिप्रश्ने ॥ कतरकठः ॥ कतमकलापः ॥ गोत्रं च चरणैः स

शाकः प्रियो यस्य सः शाकप्रियः इति बहुव्रीहिः तस्य पार्थिवशब्देन समासे कृते पूर्वस्मिन् समासे य उत्तरपदं प्रिय इति तस्य लोपः ४ तथा देवब्राह्मण इत्यत्र देवस्य पूजको देवपूजक
इति पूर्वस्मिन् षष्ठीसमासे य उत्तरपदं पूजक इति तस्य लोपो ज्ञेयः ४

राजा॰ महेति जातित्वं ॥ किं क्षेपे ॥ कुत्सितो राजा किं[illegible] ॥ यो न रक्षति ॥ पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कय किंसखा॰
णीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ॥ तत्पुरुषः समानाधिकरणः कर्मधारयः ॥ पुंवत्कर्मधारयजातीयदेशीयेषु ॥ कर्म
धारये जातीयदेशीययोश्च परतो भाषितपुंस्कात्परं ऊङभावो यस्मिंस्तथाभूतं पूर्वं पुंवत् ॥ पूरणीप्रियादिष्वप्राप्तः पुंव
द्भावो विधीयते ॥ महानवमी ॥ कृष्णचतुर्दशी ॥ महाप्रिया ॥ तथा कोपधादेः प्रतिषिद्धः पुंवद्भावः कर्मधारयादौ प्रतिप्र
सूयते ॥ पाचकस्त्री ॥ दत्तभार्या ॥ पंचमभार्या ॥ स्रौघ्नभार्या ॥ सुकेशभार्या ॥ ब्राह्मणभार्या ॥ एवं पाचकजातीया पाचक
देशीयेत्यादि ॥ इभपोटा ॥ पोटा स्त्रीपुंसलक्षणा ॥ इभयुवतिः ॥ अग्निस्तोकः ॥ उदश्वित्कतिपयं ॥ गृष्टिः सकृत्प्रसूता तक्रं
गोगृष्टिः ॥ धेनुर्नवप्रसूतिका ॥ गोधेनुः ॥ वशा वन्ध्या ॥ गोवशा ॥ वेहद्गर्भघातिनी ॥ गोवेहत् ॥ बष्कयणी तरुणवत्सा ॥
गोबष्कयणी ॥ कठप्रवक्ता ॥ कठश्रोत्रियः ॥ कठाध्यापकः ॥ कठधूर्तः ॥ प्रशंसावचनैश्च ॥ एतैः सह जातिः प्राग्वत् ॥ गोमत
ल्लिका ॥ गोमचर्चिका ॥ गोप्रकाण्डं ॥ गवोद्धः ॥ गोतल्लजः ॥ प्रशस्ता गौरित्यर्थः ॥ मतल्लिकादयो नियतलिंगा न तु विशेष्य

अवद्यस्फोटायनस्य मते षड् भाषणः

तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलमित्यमरः ४

युवखलतीति क्वस्कारादित्वान्ङीष् पुंवत्कर्मधारयेति युवतिशब्दस्य पुंवद्भावः जरतीति जीर्यतेरतृन् उगितश्चेति ङीप् ३

॥ सि॰ पृ॰ ॥ युवजरती ॥ ७१ ॥

निपुणः ॥ जातिः किं । कुमारी मतल्लिका ॥ युवा खलति पलित वलिन जरतीभिः ॥ खलत्यादिभिः समानाधिकरणैर्युवशब्दः समस्यते । पूर्वनिपातनियमार्थं सूत्रं ॥ लिंगविशिष्टपरिभाषया युवतिशब्दोपि समस्यते ॥ युवा खलतिः युवखलतिः ॥ युवतिः खलती युवखलती ॥ युवत्यामेव जरतीधर्मोपलंभेन तद्रूपारोपात् सामानाधिकरण्यं ॥ कृत्यतुल्याख्या अजात्या ॥ कृत्यप्रत्ययांतास्तुल्यपर्यायाश्चायोजातिवाचिना समस्यंते ॥ भोज्योष्णं ॥ तुल्यश्वेतः ॥ सदृशश्वेतः ॥ अजात्या किं । भोज्य ओदनः ॥ प्रतिषेधसामर्थ्याद्विशेषणसमासोपि न ॥ वर्णो वर्णेन ॥ समानाधिकरणेन सह प्राग्वत् ॥ कृष्णसारंगः ॥ कडाराः कर्मधारये ॥ कडारादयः शब्दाः कर्मधारये वा पूर्वं प्रयोज्याः ॥ कडारजैमिनिः ॥ जैमिनिकडारः ॥ कुमारः श्रमणादिभिः ॥ श्रमणादिभिः सह कुमारशब्दः समस्यते ॥ अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः ॥ कुमारी श्रमणा कुमारश्रमणा ॥ इह गणे श्रमणा प्रव्रजिता गर्भिणी सापत्यः स्त्रीलिंगाः पठ्यंते । लिंगविशिष्टपरिभाषाया एतदेव ज्ञापकं बोध्यं ॥ चतुष्पादो गर्भिण्या ॥ मंडूकप्लुत्या जातिरित्यनुवर्तते ॥ चतुष्पाज्जातिवाचिनो गर्भिणीशब्देन प्राग्वत् ॥ गोगर्भिणी ॥ जातिः किं । कालाक्षी गर्भिणी ॥ चतुष्पादः किं । ब्राह्मणी गर्भिणी ॥ मयूरव्यंसकादयश्च ॥ एते निपात्यंते ॥ मयूरो व्यंसको मयूरव्यंसकः ॥ व्यंसको धूर्त्तः ॥ उद

मयूर॰ चकारो जातेः अवधारणार्थः । तेन परममयूरव्यंसक इत्यादि समासांतरं न भवति [illegible]

समानाधिकरणेन वर्णवाचिना वर्णवाचि समस्यत इत्यर्थः ६ सह

सु॰ तत्पु॰

रो

सारंगश्चित्रवर्णो [illegible]

रो॰ ७१ ॥

उत्तरकोष्ठादित्वादि उत्तरात्सजेसेनावानेव विग्रहः । उत्तरे उत्तरस्य विवरणं देहानि । कोष्ठादिति तृखरेरस्या काङ्क्षापूरणार्थमुक्तं ३

अतिक्रोऽप्रनिति आभीक्ष्ण्येन पञ्च आह समाहृतोऽः ५ ॥ तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ॥ अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ५ ॥ तेषु पर्युदासे लिंगानि सह अन्यस्य [illegible]

[illegible] इति तत्पुरुषस्योत्तरपदार्थप्रधानत्वात् [illegible] एवमग्रेऽपि २ । राजांतरमिति [illegible]

[illegible] ५

तिडंते॰

कृत अकृतम् इत्यादि [illegible] निश्चितं च प्रचितं च निश्चप्रचं ॥ नास्ति किंचन यस्य स अकिंचनः ॥ आख्यातमाख्यातेन क्रियासातत्ये ॥ अश्नीतपिबता ॥ पचतभृज्जता ॥ खादतमोदता ॥ एहीडादयोन्यपदार्थे ॥ एहीड इति यस्मिन् कर्मणि तदेहीडं ॥ एहियवं ॥ उद्धरोत्सृज ॥ उद्धर उत्सृज इति यस्यां क्रियायां सा उद्धरोत्सृजा ॥ उद्धमविधमा ॥ असान्त्यार्थं वचनं ॥ जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति ॥ जहीत्येतत् कर्मणा बहुलं समस्यते आभीक्ष्ण्ये गम्ये समासेन चेत् कर्त्ताभिधीयत इत्यर्थः ॥ जहिजोडः ॥ जहिस्तंबः ॥ नास्ति कुतो भयं यस्य स अकुतोभयः ॥ अन्यो राजा राजांतरं ॥ चिदेव चिन्मात्रं ॥ ईषत्कडारः ॥ ईषदित्ययं शब्दः कडारादिना समस्यते ॥ ईषत्पिंगलः ॥ ईषद्गुणवचनेनेति वक्तव्यं ॥ ईषद्रक्तं ॥ ॥ नञ् ॥ नञ् सुपा समस्यते ॥ नलोपो नञः ॥ नञो नस्य लोपः स्यादुत्तरपदे ॥ अब्राह्मणः ॥ तस्मान्नुडचि ॥ लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः स्यात् ॥ अनश्वः ॥ अपर्यायं च यदि तावेन सहार्थं विकल्प्यते ॥ रक्षोहागमलघ्वसंदेहाः प्रयोजनमिति ॥ अदुताया असंहितमिति च भाष्यवार्त्तिक प्रयोगात् ॥ ते नानुपलब्धिरविवादेः विघ्नमित्यादि सिद्धं ॥ नञो नलोपस्तिङि क्षेपे ॥ अपचसि त्वं जाल्म ॥ नैकधेत्यादौ तु नशब्देन सह सु

तिङंते न समासाभावान्नलोपे वचनं १ कुत्सितं पचसीत्यर्थः १

नत्विघ्नाभावो विघ्नमिति [illegible] अव्ययीभावस्य [illegible] अन्यथा [illegible] । भर्याभावे अव्ययीभावेन सहेत्यादि । अविघ्नमिति । यद्यप्यविघ्नमानविघ्नाय [illegible] अव्ययीभावस्वर [illegible] सिध्यति निभावः ८

कुप्राद्यो नाव्ययतत्पुरुषः … स्यादितिसाहसवर्ति

शिमिवासंगत्योः सुहृदादिः कारसंबंधने आदिः

सत्सुसाधवः सत्साः

॥सि०कौ०॥ सुपेतिसमासः॥ नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषुप्रकृत्या॥ पादितिशवंतः॥ वेदाइसमु स०तत्पु०

न्नतं॥ नसत्याअसत्याः॥ नअसत्यानासत्याः॥ नमुंचतीतिनमुचिः॥ नकुलमस्य॥ नखमस्य॥ नस्त्रीपुमान्॥ स्त्रीपुंसयोः पुंसक

त्वोनिपातनात्॥ नक्षरतीतिनक्षत्रं॥ क्षीयतेः क्षरतेर्वाक्षत्रमितिनिपात्यते॥ नक्रामतीतिनक्रः॥ क्रमेर्डः॥ नअकमस्मिन्नि

॥७२॥ तिनाकः॥ नगोप्राणिष्वन्यतरस्यां॥ नगइत्यत्रनञ्वाप्रकृत्या॥ नगाः॥ अगाः॥ पर्वताः॥ अप्राणिषुकिं॥ अगोवृषलःशीतेन॥

निसंज्ञोडेस्ततोनित्यमित्यनुवर्त्तमाने॥ कुगतिप्रादयः॥ एतेसमर्थेननित्यंसमस्यंते॥ कुत्सितः पुरुषः कुपुरुषः॥ गतिश्चेत्य

नुवर्त्तमाने॥ ऊर्यादिच्विडाचश्च॥ एतेक्रियायोगेगतिसंज्ञाःस्युः॥ ऊरीकृत्य॥ उररीकृत्य॥ शुक्लीकृत्य॥ पटपटाकृत्य॥ कारिका

शब्दस्योपसंख्यानं॥ कारिकाक्रिया॥ कारिकाकृत्य॥ अनुकरणंचानितिपरं॥ खाट्कृत्य॥ अनितिपरंकिं॥ खाडितिकृत्वानि

रष्ठीवत्॥ आदरानादरयोःसदसती॥ सत्कृत्य॥ असत्कृत्य॥ भूषणेलं॥ अलंकृत्य॥ भूषणेकिं॥ अलंकृत्वोदनंगतः॥ पर्या ॥७२॥

प्तमित्यर्थः॥ अनुकरणमित्यादित्रिसूत्रीस्वभावात्कृञ्विषया॥ अंतरपरिग्रहे॥ अंतर्हत्य॥ मध्येहत्वेत्यर्थः॥ अपरिग्रहे

किं॥ अंतर्हत्वागतः॥ हतंपरिगृह्यगतइत्यर्थः॥ कणेमनसीश्रद्धाप्रतीघाते॥ कणेहत्यपयःपिबति॥ मनोहत्य॥ कणेशब्दःस

अत्यंतं अभिलष्य तं … पिबतीत्यर्थः तथात्र …

अंतर्धौकिं तिरोभूत्वास्थितः पार्श्वयोर्भूत्वेत्यर्थः ४ गतित्वाभावपक्षेतिरसोन्यतरस्यामितिसत्वमपिनभवतिमहिद्योगविग्रहणनन्

कुअंग्रेःकृतोवा४ समीपनिरूपकोनिपातोऽभिलाषातिशयेवर्तते॥ मनसाहृत्यैवेत्यर्थः॥ पुरोऽव्ययं॥ पुरस्कृत्य॥ अस्तं च॥ अस्तमितिमांतमव्ययंग

तिसंज्ञंस्यात्॥ अस्तंगत्य॥ अच्छगत्यर्थवदेषु॥ अच्छेत्यव्ययंगत्यर्थवदेषुप्राग्वत्॥ अच्छगत्य॥ अच्छोद्य॥ अभिमुखंगत्वा उक्त्वा

चेत्यर्थः॥ अव्ययंकिं॥ उदकमच्छंगच्छति॥ अदोनुपदेशे॥ अदःकृत्य॥ अदःकृतं॥ अनुपदेशेकिं॥ अदःकृत्वेदंकुरु॥ परंप्रतिपदे

शोयत्कस्तदाहरणं॥ तिरोंतर्धौ॥ तिरोभूय॥ विभाषाकृञि॥ तिरःकृत्य॥ तिरस्कृत्य॥ तिरःकृत्वा॥ उपाजेऽन्वाजे॥ एतौकृञिवाग दिसऊजीयसः

तिसंज्ञौस्तः॥ उपाजेकृत्य॥ अन्वाजेकृत्य॥ उपाजेकृत्वा॥ अन्वाजेकृत्वा॥ दुर्बलस्यबलमाधायेत्यर्थः॥ साक्षात्प्रभृतीनिच

कृञिवागतिसंज्ञानिस्युः॥ च्व्यर्थइतिवक्तव्यं॥ साक्षात्कृत्य॥ साक्षात्कृत्वा॥ लवणंकृत्य॥ लवणंकृत्वा॥ मांतत्वंनिपात

नात्॥ अनत्याधानउरसिमनसी॥ उरसिकृत्य॥ उरसिकृत्वा॥ अभ्युपगम्येत्यर्थः॥ मनसिकृत्य॥ मनसिकृत्वा॥ निश्चित्येत्यर्थः॥

अत्याधानमुपश्लेषः तत्रन॥ उरसिकृत्वापाणिंशेते॥ मध्येपदेनिवचनेच॥ एतेकृञिवागतिसंज्ञाःस्युरनत्याधाने॥ मध्ये

कृत्य॥ मध्येकृत्वा॥ पदेकृत्य॥ पदेकृत्वा॥ निवचनेकृत्य॥ निवचनेकृत्वा॥ वाचंनियम्येत्यर्थः॥ नित्यंहस्तेपाणावुपयमने॥ कृञि॥ हस्ते

उपयमनंविवाहः॥ स्वीकारमात्रमित्यन्ये॥ हस्तेकृत्य॥ पाणौकृत्य॥ प्राध्वंबंधने॥ प्राध्वमित्यव्ययं॥ प्राध्वंकृत्य॥ बंधनेनानु

असाक्षात्कृतं यथा साक्षात्कृतं तथाकृत्वेत्यर्थः

उपयमनेकिं हस्तेकृत्वाकार्षापणंगतः

॥सि॰कौ॰॥ कूल्यं कृत्वेत्यर्थः॥ प्रार्थनादिलानुकूल्यकरणे प्राध्वं कृत्वा॥ जीविकोपनिषदावौपम्ये॥ जीविकामिव कृत्वा जीविकाकृत्य॥ उप स॰तत्पु॰
निषदमिव कृत्वा उपनिषत्कृत्य॥ औपम्ये किं॥ जीविकां कृत्वा॥ प्रादिग्रहणमगत्यर्थं॥ सुपुरुषः॥ अत्र वार्त्तिकानि॥ प्रादयो
तै॰ ७२॥ गताद्यर्थे प्रथमया॥ प्रगत आचार्यः प्राचार्यः॥ अत्यादयः क्रांताद्यर्थे द्वितीयया॥ अतिक्रांतो मालामतिमालः॥ अवादयः क्रु
ष्टाद्यर्थे तृतीयया॥ अवक्रुष्टः कोकिलया अवकोकिलः॥ पर्यादयो ग्लानाद्यर्थे चतुर्थ्या॥ परिग्लानोऽध्ययनाय पर्यध्य
यनः॥ निरादयः क्रांताद्यर्थे पंचम्या॥ निष्क्रांतः कौशांब्या निष्कौशांबिः॥ कर्मप्रवचनीयानां निषेधः॥ वृक्षं प्रति॥ तत्रो
पपदं सप्तमीस्थं॥ सप्तम्यंते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं कुंभादि तद्वाचकं पदमुपपदसंज्ञं स्यात् तस्मिंश्च सत्येव
वक्ष्यमाणः प्रत्ययः स्यात्॥ उपपदमतिङ्॥ उपपदं सुबंतं समर्थेन नित्यं समस्यते अतिङंतश्चायं समासः॥ कुंभं करोतीति कुं
भकारः॥ इह कुंभ अस् कार इत्यलौकिकं विग्रहवाक्यं॥ अतिङ् किं॥ मा भवान्भूत्॥ माङि लुङिति सप्तमीनिर्देशान्मा ॥७२॥
ङ् उपपदं॥ अतिङ्ग्रहणं ज्ञापयति॥ सुपेत्येतन्नेहानुवर्त्तते इति॥ पूर्वसूत्रेपि गतिग्रहणं पृथक् कृत्स अतिङ्ग्रहणं
तत्रापकृष्यते सुपेति वा निवृत्तं॥ तथा च गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति सिद्धं॥

स्वेकृत्वामि कुमारस्व: गतिः इतियोगविभज्य कुप्रादयः सुबंताः सुबंतेन समस्यंते गतिस्तु सुबंतमतिङंतेन समस्यत इत्याख्येयमित्यर्थः तथाचेति यद्यप्यकृत्वारीत्यागस्तुपपदस्योर [illegible]
वितयविषयणी [illegible] परिभाषा [illegible] कारकाणीतु कर्तृकरणे कृतेति सूत्रस्थबहुलग्रहणानुक्तार्थसाधकमित्यपिमनोरमायां [illegible]
पूर्वसमासद्वयं॥

भाष्री॥ अस्व कृत्वी॥ कृत्य॥ अमैवाव्ययेन॥ अमैव तुल्यविधानं यदुपपदं तदेवाव्ययेन सह समस्यते॥ स्वादुंकारं॥ नेह॥ कालस
मयवेलासु तुमुन्॥ कालः समयो वेला वा भोक्तुं॥ अमैवेति किं॥ अग्रेभोजं॥ अग्रे भुक्त्वा॥ विभाषाग्रेप्रथमपूर्वेषु इति क्त्वाण
तृत्य मुलौ॥ अमा चान्येन च विधानमेतत्॥ तृतीयाप्रभृतीन्यन्यतरस्यां॥ उपदंश स्तृतीयायामित्यादीन्युपपदान्यमंतेना
व्ययेन सह वा समस्यंते॥ मूलकेनोपदंशं भुंक्ते मूलकोपदंशं॥ क्त्वा च॥ तृतीयाप्रभृतीन्युपपदानि क्त्वांतेन सह वा समस्यंते॥
तै उच्चैःकृत्य॥ उच्चैः कृत्वा॥ अव्ययेऽयथाभिप्रेताख्याने इति क्त्वा॥ तृतीयाप्रभृतीनीति किं॥ अलंकृत्वा॥ खलु कृत्वा॥ तत्पुरुषस्यांगु अलंखल्वोः प्रति
लेः संख्याव्ययादेः॥ संख्याव्ययादेरंगुल्यंतस्य तत्पुरुषस्य समासांतोऽच् स्यात्॥ द्वे अंगुली प्रमाणमस्य द्व्यंगुलं षेधयोरिति क्त्वा॰
दारु॥ निर्गतमंगुलिभ्यो निरंगुलं॥ अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः॥ एभ्यो रात्रेरच् स्यात् चात्संख्याव्ययादेः॥ अह
र्ग्रहणं द्वंद्वार्थं॥ अहश्च रात्रिश्चाहोरात्रः॥ सर्वा रात्रिः सर्वरात्रः॥ पूर्वं रात्रेः पूर्वरात्रः॥ संख्यातरात्रः॥ पुण्यरात्रः॥ द्वयो रात्र्योः
समाहारो द्विरात्रं॥ अतिक्रांतो रात्रिमतिरात्रः॥ राजाहःसखिभ्यष्टच्॥ एतदंतात्तत्पुरुषाट्टच् स्यात्॥ परमराजः॥ अति
राजी॥ कृष्णसखः॥ अह्नोऽह्न एतेभ्यः॥ अह्न इत्यादेशः स्यात् टिलोपो नान्यत्र॥ उत्तमाहः॥ द्वे अहनी भूतो द्व्यहीनः॥ तद्धितार्थो

पूर्वकालैकेति समासः पूर्वापराधरोत्तरमित्येकदेशि समासः नलोपसिनेटेनाटिलोपः

॥ सि०कौ० ॥ ॥ ७४ ॥ स०तत्पु०

स्थितमप्यंतत्वाद्धृतमिति टचः समासांतत्वात्तदंतस्य नपुंसकत्वं प्राप्नोतीति भावः ३

एकदेशस्योदाहरणं

द्विगु॥ तमधीष्ट इत्यधिकारे द्विगुर्वेत्यनुवृत्तौ राज्यहःसंवत्सराच्चेति नित्यं॥ लिंगविशिष्टपरिभाषया अनित्यत्वान्नेह॥ मद्राणां राज्ञीम
द्रराज्ञी॥ अह्नोऽह्न एतेभ्यः॥ सर्वादिभ्यः परस्याह्नशब्दस्याह्नादेशः स्यात्समासांते परे॥ अह्नोऽदंतात्॥ अदंतपूर्वपदस्थाद्रेफात्परस्या
ह्नो नस्य णः स्यात्॥ सर्वाह्णः॥ पूर्वाह्णः॥ संख्याताह्नः॥ द्वयोरह्नोर्भवः॥ कालाट्ठञ्॥ द्विगोर्लुगनपत्य इति ठञो लुक्॥ द्व्यह्नः॥ त्रियाम
दंतत्वाद्दृष्टः॥ द्व्यह्नः॥ द्व्यह्नप्रिया॥ अत्यह्नः॥ क्षुभ्नादिषु च॥ एषु णत्वं न स्यात्॥ दीर्घाह्नी प्रावृट्॥ एवं नैदर्घमह्न इत्यदंतानुकरणस्या०
न कर्तव्यः॥ प्रातिपदिकांतेति णत्ववारणाय क्षुभ्नादिपाठस्यावश्यकत्वात्॥ अह्नोऽदंतादिति तपरकरणान्नेह॥ परागतमहः
पराह्णः॥ न संख्यादेः समाहारे॥ समाहारे वर्तमानस्य संख्यादेरह्नादेशो न स्यात्॥ संख्यादेरिति स्पष्टार्थं॥ द्वयोरह्नोः समा
हारो द्व्यहः॥ उत्तमैकाभ्यां च॥ आभ्यामह्नादेशो न स्यात्॥ उत्तमशब्दोंऽत्यार्थः पुण्यशब्दमाह॥ पुण्यैकाभ्यामित्येव सूत्रयितुमुचि
तं॥ पुण्याहः॥ एकाहः॥ उत्तमग्रहणमुपांत्यस्यापि संग्रहार्थमित्येके॥ संख्याताहः॥ अग्राख्यायामुरसः॥ टच् स्यात्॥ अश्वानामुर
इवाश्वोरसं॥ मुख्योऽश्व इत्यर्थः॥ अनोश्मायःसरसां जातिसंज्ञयोः॥ टच् स्यात्॥ उपानसं॥ अमृताश्मः॥ कालायसं॥ मंडूकसरस
मिति जातिः॥ महानसं॥ पिंडाश्मः॥ लोहितायसं॥ जलसरसमिति संज्ञा॥ ग्रामकौटाभ्यां च तक्ष्णः॥ ग्रामस्य तक्षा ग्रामतक्षः॥

संख्यादिभिन्नस्य तत्पुरुषस्य समाहारे वृत्त्यसंभवादाह॥ स्पष्टार्थमिति ४ अग्राख्यायामिति पंचम्यर्थे सप्तमी॥ अयं भावः अग्रनाची यदुरःशब्दः तदंतात्तत्पुरुषाट्टच् स्यात् ३

व्यह्नप्रियः

पुण्यशब्दिनेति क्लीबत्वं ३

३ अह्नः सर्वैकदेशे त्रिपुरुषशाह्णस्यापि०

४

उपमितं व्याघ्रादिभिरिति समासः॥ आकृष्यतेऽनेनेत्याकर्षः आकर्षेण खलादिगतं धान्यमिति आकर्षः॥ काष्ठादिविशेषः २
श्वानमतिक्रांतोऽतिश्व इत्यर्थः १ नीचार्थः
स्वार्थिकत्वात्तदंतादि द्विगाद्रित्यर्थः ६

साधारण इत्यर्थः॥ कुट्यां भवः कौटः॥ स्वतंत्रः॥ स चासौ तक्षा च कौटतक्षः॥ अतेःशुनः॥ अतिश्वो वराहः॥ अतिश्वी सेना॥ उपमानादप्रा
णिषु॥ अप्राणिविषयकोपमानवाचिनः शुनष्टच् स्यात्॥ आकर्षः श्वेव आकर्षश्वः॥ अप्राणिषु किं॥ वानरः श्वेव वानरश्वा॥ उत्तर
मृगपूर्वाच्च सक्थ्नः॥ चादुपमानात्॥ उत्तरसक्थं॥ मृगसक्थं॥ पूर्वसक्थं॥ फलकमिव सक्थि फलकसक्थं॥ नावो द्विगोः॥ नौ
शब्दांताद्द्विगोष्टच् स्यान्न तु तद्धितलुकि॥ द्वाभ्यां नौभ्यामागतो द्विनावरूप्यः॥ द्विगोर्लुगनपत्य इत्यत्राचीत्यपकर्षणाल्लुगादेर्न
लुक्॥ पंचनावप्रियः॥ द्विनावं॥ त्रिनावं॥ अतद्धितलुकीति किं॥ पंचभिर्नौभिः क्रीतः पंचनौः॥ अर्धाच्च॥ अर्धान्नावष्टच् स्यात्॥
नावोऽर्धं अर्धनावं॥ क्लीबत्वं लोकात्॥ खार्याः प्राचां॥ द्विगोरर्धाच्च खार्यांतष्टज्वा द्विखारं॥ द्विखारि॥ अर्धखारं॥ अर्धखारि॥ द्वि
त्रिभ्यामंजलेः॥ टज्वा स्याद्द्विगौ॥ द्व्यंजलं॥ द्व्यंजलि॥ अतद्धितलुकीत्येव॥ द्वाभ्यामंजलिभ्यां क्रीतः द्व्यंजलिः॥ ब्रह्मणो जान
पदाख्यायां॥ ब्रह्मांतात्तत्पुरुषा [illegible] कुत्सितो ब्रह्मा कुब्रह्मः॥ कुब्रह्मा॥ आन्महतः समानाधिकरणजातीय
योः॥ महत आकारोंऽतादेशः स्यात्समानाधिकरणे उत्तरपदे जातीये च परे॥ महाब्रह्मो॥ महाब्रह्मः॥ महादेवः॥ महाजातीयः॥
समानाधिकरणे किं॥ महतः सेवा महत्सेवा॥ लाक्षणिकं विहाय प्रतिपदोक्तः सन्महदिति समासोऽत्र गृह्यत इति नेह॥

इत्यस्या समासेन जानपदत्वमाख्यायते चेत्॥ सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः॥ कुमहद्भ्यामन्यतरस्यां॥ आभ्यां ब्रह्मणो वा टच् स्यात्तत्पुरुषे ३

आन्महत इत्याकारोच्चारणार्थो न तु तकारस्य सार्थः ... आकारांतादेश इति ३

परिमाणांतादुत्तरस्य धयोस्तलुक् ०

महाबाहुरिति बहुव्रीहिरयं समससामान्यप्रात्यनिर्दिष्टत्वाल्लाक्षणिक इति भावः

॥ सि०कौ० ॥ महाबाहुर्न स्यात् ॥ तस्मात् लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति परिभाषा नेह प्रवर्त्तते ॥ समानाधिकरणसामर्थ्यात् ॥ आदि स० तत्पु०

तियोगविभागादात्वं ॥ प्रागेकादशभ्य इति निर्देशात् ॥ द्वा० एकादश ॥ महतीशब्दस्य पुंवत्कर्मधारयेति पुंवद्भावे कृते ॥ आत्वं ॥ महा

॥ ७५ ॥ जातीययोः ॥ महदात्वे घासकरविशिष्टेषूपसंख्यानं पुंवद्भावश्च ॥ अ० सामानाधिकरण्यार्थमिदं ॥ महतो महत्या वा घासो म

हाघासः ॥ महाकरः ॥ महाविशिष्टः ॥ अष्टनः कपाले हविषि ॥ अष्टाकपालं ॥ गवि च युक्ते ॥ गोशब्दे परे युक्ते इत्यर्थे गम्ये

अष्टन आत्वं वक्तव्यमित्यर्थः ॥ अष्टागवं शकटं ॥ अत्र त्वैस्त्वाऊतियोगविभागाद् बहुव्रीहावप्यत्र ॥ अष्टानां गवां समाहारो

अष्टानां गवां समाहार इत्यर्थः ५ अष्टगवं ॥ तद्युक्तत्वाच्छकटमष्टागवमिति वा ॥ द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः ॥ आत्स्यात् ॥ द्वौ च दश च द्वादश ॥ अधिकार

शतिर्वा ॥ अष्टादश ॥ द्वाविंशतिः ॥ अष्टाविंशतिः ॥ द्वात्रिंशत् ॥ अष्टात्रिंशत् ॥ अबहुव्रीह्यशीत्योः किं ॥ द्वित्राः ॥ द्व्यशी

त्रयादेशः तिः ॥ प्राक्शतादिति वक्तव्यं ॥ नेह ॥ द्विशतं ॥ द्विसहस्रं ॥ त्रेस्त्रयः ॥ त्रयः स्यात्पूर्वविषये ॥ त्रयोदश ॥ त्रयोविंशतिः ॥ बहुव्रीहौ तु त्रिदशाः ॥ ॥ ७५ ॥

दशाः ॥ सुजर्थे बहुव्रीहिः ॥ अशीतौ तु त्र्यशीतिः ॥ प्राक्शतादित्येव ॥ त्रिशतं ॥ त्रिसहस्रं ॥ विभाषा चत्वारिंशत्प्रभृतौ सर्वेषां ॥

द्व्यष्टनोस्त्रेश्च प्रागुक्तं वा स्यात् चत्वारिंशदादौ परे ॥ द्विचत्वारिंशत् ॥ द्वाचत्वारिंशत् ॥ अष्टचत्वारिंशत् ॥ अष्टाचत्वारिंशत् ॥ त्रि

परवल्लिंगं द्वन्द्वतत्पुरुषयोरिति नसप्तमीनिर्दिष्टवचनं तथात्वेद्वन्द्वतत्पुरुषे च यत्प्रत्ययस्तल्लिंगं पूर्वपदस्यापि तिदिष्टयेन परपदस्य संबंधिशब्देन पूर्वपदाक्षेपकत्वात् । नमयूरीकु टावित्यत्र पूर्वपदे ईकारनिवृत्तिप्रसंगः । कुक्कुटमयूर्यौ अर्धपिप्पलीत्यादौ तु पूर्वपदस्त्रीप्रत्ययउत्पद्येत । किंतु षष्ठी द्विवचनमित्याशयेनाह । एतयोरिति । द्वन्द्वत त्पुरुषार्थयोरित्यर्थः एवंचानुभयोरपि तद्वल्लिंगसिद्धिः ४

त्वारिंशत् ॥ त्रयश्चत्वारिंशत् ॥ एवं पंचाशत्षष्टिसप्ततिनवतिषु ॥ एकादिश्चैकस्य चादुक् ॥ एकादिर्नञ् प्रकृत्या स्यादेक

स्यादुगागमश्च ॥ नञो विंशत्या समासे कृते एकशब्देन सह तृतीयेति योगविभागात्समासः ॥ अनुनासिकविकल्पः ॥ एकेन

नविंशतिः ॥ एकान्नविंशतिः ॥ एकाद्नविंशतिः ॥ एकोनविंशतिरित्यर्थः ॥ षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च धासु वेति

उगिदचामितिनुम्० वाच्यं ॥ षोडन् ॥ षोडश ॥ षोढा ॥ षड्धा ॥ परवल्लिंगं द्वन्द्वतत्पुरुषयोः ॥ एतयोः परपदस्येव लिंगं स्यात् ॥ कुक्कुटमयूर्याविमे ॥ मयूरीकुक्कुटाविमौ ॥ अर्द्धपिप्पली ॥ द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः ॥ पंचसु कपालेषु संस्कृ

तः पंचकपालः पुरोडाशः ॥ प्राप्तो जीविकां प्राप्तजीविकः ॥ आपन्नजीविकः ॥ अलं कुमार्यै अलंकुमारिः ॥ अत एव ज्ञापका

समासः ॥ निष्कौशाम्बिः ॥ पूर्ववदश्ववडवौ ॥ द्विवचनमतंत्रं ॥ अश्ववडवौ ॥ अश्ववडवान् ॥ अश्ववडवैः ॥ रात्राह्नाहाः पुंसि ॥

एतदंतौ द्वन्द्वतत्पुरुषौ पुंस्येव ॥ अनंतरत्वात्परवल्लिंगतापवादोप्ययं परत्वात्समाहारनपुंसकतां बाधते ॥ अहोरात्रः ॥ रा

पूर्वभागः त्रेः पूर्वरात्रः ॥ पूर्वाह्णः ॥ द्व्यहः ॥ संख्यापूर्वं रात्रं क्लीबं ॥ द्विरात्रं ॥ त्रिरात्रं ॥ गणरात्रं ॥ अपथं नपुंसकं ॥ तत्पुरुष इत्येव ॥ अ

न्यत्र तु अपथो देशः ॥ कृतसमासांतनिर्देशान्नेह ॥ अपंथाः ॥ अर्द्धर्चाः पुंसि च ॥ अर्द्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः ॥

षडूर्ध्वाः अस्य षोडन् । न च मिदंतं स्यादिति वाच्यं ॥ १ गणानां बहूनां रात्रीणां समाहार इति विग्रहः २ तत्पुरुष इत्येवेति । द्वन्द्वग्रहणं नानुवर्त्तते । अयोग्यत्वादिति भावः २

४ गतिसमासेष्विति गतिग्रहणमादीनामुपलक्षणं मुख्यस्य गतेरसंभवादित्याशयेनोदाहरति निष्कौशाम्बिरिति ४

बहुव्रीहिसमासप्रतिपादनप्रस्तावात्तत्पुरुषोऽपि ... एकोऽप्यपर्यायवाची ... इति ... ब्राह्मणा पूज्या इति ९

भर्द्धर्चं ॥ अर्द्धर्चः ॥ ध्वजं ॥ ध्वजः ॥ एवं तीर्थशरीरमंडपपद्मदेहअंकुशकुलिशादयः ॥ आत्माख्याऽध्यात्मेकस्मिन्बहुवचनं स॰ तत्पु॰
सि॰ ७५ । मन्यतरस्यां ॥ एकोऽप्यर्थो वा बहुवत्स्यात् ॥ ब्राह्मणाः पूज्याः ॥ ब्राह्मणः पूज्यः ॥ अस्मदो द्वयोश्च ॥ एकत्वे द्वित्वे च विवक्षिते अ
स्मदो बहुवचनं वा स्यात् ॥ वयं ब्रूमः ॥ आवां ब्रूव इति वा ॥ पक्षे अहं ब्रवीमि ॥ सविशेषणस्य प्रतिषेधः ॥ पटुरहं ब्रवीमि ॥ फल्गुनी
।७६। प्रोष्ठपदानां च नक्षत्रे ॥ द्वित्वे बहुत्वप्रयुक्तं कार्यं वा स्यात् ॥ पूर्वे फल्गुन्यौ ॥ पूर्वाः फल्गुन्यः ॥ पूर्वे प्रोष्ठपदे पूर्वाः प्रोष्ठपदाः ॥ न
क्षत्रे किं ॥ फल्गुन्यौ माणविके ॥ तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यं ॥ बहुत्वं द्वित्ववद्भवति ॥ तिष्यश्च पुनर्व
सू च तिष्यपुनर्वसू ॥ तिष्येति किं ॥ विशाखानुराधाः ॥ नक्षत्रे किं ॥ तिष्यपुनर्वसवो माणवकाः ॥ स नपुंसकं ॥ समाहारे द्विगु
७ द्वंतात्त्र ओशाच ४ द्वंद्वश्च नपुंसकं स्यात् ॥ परवल्लिंगापवादः ॥ पंचगवं ॥ दंतोष्ठं ॥ अकारांतोत्तरपदो द्विगुः स्त्रियामिष्टः ॥ पंचमूली ॥ आबंतो वा ॥ पं ।७६।
स्त्रियां द्विगुरिति ३ चखट्वी ॥ पंचखट्वं ॥ अनो नलोपश्च वा च द्विगुः स्त्रियां ॥ पंचतक्षं ॥ पंचतक्षी ॥ पात्राद्यंतस्य न ॥ पंचपात्रं ॥ त्रिभुवनं ॥ चतुर्युगं ॥
पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा ॥ पुण्याहं ॥ सुदिनाहं ॥ सुदिनाशब्दः प्रशस्तवाची ॥ पथः संख्याव्ययादेः ॥ संख्याव्य
यरूपादेः परः कृतसमासांतः पथशब्दः क्लीबमित्यर्थः ॥ त्रयाणां पंथाः त्रिपथं ॥ विरूपः पंथाः विपथं ॥ कृतसमासांतग्रहणा

इह वा शब्दः स्त्रियास्त्रियेनेन संबध्यते न तु पूर्वेणेतेनानितो नलोपः ३

अनियतलिंगविषयकमिदं । तेनादिपत्रानिप्राग्रादिरिति पुंस्त्वमेव १ नञ्रहितस्तत्पुरुषः कर्मधारयश्चेन्न स तत्पुरुषो न पुंसकं स्यादित्यधिकारोऽयं ।
नञ्समासकर्मधारयाभिन्नतत्पुरुषो ... भवति । ...

नेह ॥ सुपंथा ॥ अतिपंथाः ॥ सामान्येन पुंसकं ॥ मृदु पचति ॥ प्रातः कमनीयं ॥ तत्पुरुषोऽनञ्कर्मधारयः ॥ अधिकारोऽयं ॥ संज्ञायां कंथो
त शीनरेषु ॥ कंथांतस्तत्पुरुषः क्लीबं स्यात् ॥ सा च उशीनरदेशोत्पन्नायाः कंथायाः संज्ञा ॥ सुशमस्यापत्यानि सौशमयः ॥ तेषां कंथा सौश
मिकंथं ॥ संज्ञायां किं ॥ वीरणकंथा ॥ उशीनरेषु किं ॥ दाक्षिणकंथा ॥ उपज्ञोपक्रमं तदाद्याचिख्यासायां ॥ उपज्ञांत उपक्रमांतश्च तत्पु
रुषो नपुंसकं स्यात् तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः प्राथम्यं चेदाख्यातुमिष्यते ॥ पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रंथः
नंदोपक्रमं द्रोणः ॥ छाया बाहुल्ये ॥ छायांतस्तत्पुरुषो नपुंसकं स्यात् पूर्वपदार्थबाहुल्ये ॥ इक्षूणां छाया इक्षुच्छायं ॥ विभाषा से
नेति विकल्पस्यायमपवादः ॥ इक्षुच्छायानिषादिन्य इति तु आसमंतान्निषादिन्य इति आङ्प्रश्लेषाद्बोध्यं ॥ सभा राजामनु
ष्यपूर्वा ॥ राजपर्यायपूर्वोऽमनुष्यपूर्वश्च सभांतस्तत्पुरुषो नपुंसकं स्यात् ॥ इनसभं ॥ ईश्वरसभं ॥ पर्यायस्यैवेष्यते ॥ नेह
स्रा राजसभा ॥ चंद्रगुप्तसभा ॥ अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह ॥ रक्षःसभं ॥ पिशाचसभं ॥ अशाला च ॥ संघातार्था या
सभा तदंतस्तत्पुरुषः क्लीबं स्यात् ॥ स्त्रीसभं ॥ स्त्रीसंघात इत्यर्थः ॥ अशाला किं ॥ धर्मसभा ॥ धर्मशालेत्यर्थः ॥ विभाषा सेना
सुराच्छायाशालानिशानां ॥ एतदंतस्तत्पुरुषः क्लीबं वा स्यात् ॥ ब्राह्मणसेनं ॥ ब्राह्मणसेना ॥ यवसुरं ॥ यवसुरा ॥ कुड्यच्छायं ॥

अराजात्‌ ... क्लीबत्वं ... अमनुष्यसंघातवाच्यनोऽवधीयते इत्याह संघातार्थेति १

[illegible]

सि० पू० कुम्भस्य ग्रामे । गोशालं । गोशाला । श्वनिशं । श्वनिशा । तत्पुरुषोऽनञ्कर्मधारयः इत्यनुवृत्तेर्नेह । दृढसेनो राजा । असेना । परम स० बहु०
सेना ॥ ॥ इति तत्पुरुषः ॥ ॥ शेषो बहुव्रीहिः ॥ अधिकारोऽयं । द्वितीयाश्रितेत्यादिना यस्य त्रिकस्य विशिष्य समासो नो
क्तः प्रथमान्त इत्यर्थः ॥ अनेकमन्यपदार्थे ॥ अनेकं प्रथमान्तमन्यपदार्थे वर्त्तमानं समस्यते स बहुव्रीहिः ॥ अप्रथमाविभक्त्यर्थे ब
हुव्रीहिरिति समानाधिकरणानामिति फलितं । प्राप्तमुदकं यं प्राप्तोदको ग्रामः । ऊढरथोऽनड्वान् । उपहृतपशू रुद्रः । उद्धृतौदना
स्थाली । पीतांबरो हरिः । वीरपुरुषको ग्रामः ॥ प्रथमार्थे तु न ॥ वृष्टे देवे गतः ॥ व्यधिकरणानामपि न ॥ पंचभिर्भुक्तमस्य ॥ प्रादिभ्यो
धातुजस्य वा च्यो वा चोत्तरपदलोपः ॥ प्रपतितपर्णः प्रपर्णः ॥ नञोऽस्त्यर्थानां वा च्यो वा चोत्तरपदलोपः ॥ अविद्यमानः पुत्रः अपुत्रः । अस्तीति
विभक्तिप्रतिरूपकमव्ययं । अस्तिक्षीरा गौः ॥ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ॥
भाषितपुंस्कादनूङ् ऊङोऽभावो यस्यामिति बहुव्रीहिः । निपातनात्पंचम्या अलुक् षष्ठ्याश्च लुक् । तुल्ये प्रवृत्तिनिमित्ते यदु १२२
क्तपुंस्कं तस्मात्पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकस्य पुंवाचकस्येव रूपं स्यात्समानाधिकरणे स्त्रीलिंगे उत्तरपदे न तु पू
रण्यां प्रियादौ च परतः । गोस्त्रियोरिति ह्रस्वः । चित्रा गावो यस्येति लौकिके विग्रहे चित्रा अस् गो अस् इत्यलौकिकविग्रहे चित्रगुः ।

[illegible]

[illegible]

रूपवद्भार्यः । चित्रा जरती गौर्यस्येति विग्रहे अनेकोक्तेर्बहूनां बहुव्रीहिः । अत्र केचित् । चित्राजरतीगुः । जरतीचित्रागुर्वा । एवं तन्वी
दीर्घाजंघः । दीर्घातन्वीजंघः । त्रिपदे बहुव्रीहौ प्रथमं न पुंवत् । उत्तरपदस्य मध्यमेन व्यवधानात् । द्वितीयमपि न पुंवत् । पूर्वप
दत्वाभावात् । उत्तरपदशब्दो हि समासस्य चरमावयवे रूढः । पूर्वपदशब्दस्तु प्रथमावयवे इति वदंति । तस्येह पूर्वप
दमाक्षिप्यते । आनङ् ऋतो द्वन्द्वे यथा । तेनोपात्तस्य पुंवद्भावः । चित्राजरद्गुरित्यादि । अत एव चित्रा जरत्यो गावो यस्येति द्वन्द्वग
र्भेऽपि चित्राजरद्गुरिति भाष्यं । कर्मधारयपूर्वपदे तु द्वयोरपि पुंवत् । चित्रजरद्गुः । कर्मधारयोत्तरपदे तु चित्रजरद्गवीकः । स्त्रि
याः किं । ग्रामणि कुलं दृष्टिरस्य ग्रामणिदृष्टिः । भाषितपुंस्कात्किं । गंगाभार्यः । अनूङ् किं । वामोरूभार्यः । समानाधिकरणे किं ।
कल्याण्याः माता कल्याणीमाता । स्त्रियां किं । कल्याणी प्रधानं यस्य स कल्याणीप्रधानः । पूरण्यां तु । अप्पूरणीप्रमाण्योः । पूर
णार्थप्रत्ययांतं यत्स्त्रीलिंगं तदंतात्प्रमाण्यंताच्च बहुव्रीहेरप् स्यात् । कल्याणी पंचमी यासां रात्रीणां ताः कल्याणीपंचमा रात्रयः ।
स्त्री प्रमाणी यस्य स स्त्रीप्रमाणः । पुंवद्भावनिषेधोऽप्रधानपूरण्यामेव । रात्रिः पूरणी वाच्या चेत् ... एकदेशोदाहरणमस्मा
अन्यत्र तु । नद्यृतश्च । नद्यन्तादृदंतोत्तरपदाद्बहुव्रीहेः कप् स्यात् । पुंवद्भावः । णके । के परे अणो ह्रस्वः स्यात् । इति प्राप्ते

[illegible]

[illegible]

इत्यपि। अदीर्घ लिङ्ग निमित्त परत्वाज्जातेर्ह्रस्वप्रयोगात् लिङ्गविशेषविवक्षेति भावः लिङ्गविशेष विवक्षायां तु दृष्टा भाविरित्यादि सिध्यये प्रियादिषु भाविति प्रश्नपाठः २

नकपि॥ कपिपरे अणोह्रस्वो नःस्यात्॥ कल्याणी पंचमी यस्य सः कल्याण पंचमीकः पक्षः॥ अत्र तिरोहितास्यवत्सेरस्य पक्षस्य अन्य स॰ ४७०

॥ सि॰ मू॰ ॥ परार्थ तया रात्रिरप्रधानं॥ बहुकर्तृकः॥ अप्रियादिषु किं॥ कल्याणी प्रियः॥ प्रिया॥ मनोज्ञा॥ कल्याणी॥ सुभगा॥ दुर्भगा॥ भक्तिः॥

सचिवा॥ स्वसा॥ कांता॥ क्षांता॥ क्षमा॥ चपला॥ दुहिता॥ वामा॥ अबला॥ तनया॥ सामान्येन पुंसकं॥ दृढं भक्तिर्यस्य स दृढभक्तिः

॥ ७७ ॥ स्त्रीत्वविवक्षायां तु दृढभक्तिः॥ तसिलादिष्वाकृत्वसुचः॥ तसिलादिषु कृत्वसुजंतेषु परतः स्त्रियाः पुंवत्स्यात्॥ परिगणनं कृ

तं वं॥ अव्याप्त्यतिव्याप्ति वारणाय तत्र तसौ॥ तरप्तमपौ॥ चरट् जातीयरौ॥ कल्पप् देशीयरौ॥ रूपप्पाशपौ॥ थाल् तिल् थ्यनो ५

श्चिति बहीबहुत्र॥ बह्वीष्विति बहुत॥ दर्शनीयतरा॥ दर्शनीयतमा॥ घरूपेति वक्ष्यमाणो ह्रस्वः॥ परत्वात्सुवद्भावं बाधते॥

पट्वितरा॥ पट्वितमा॥ पटुचरी॥ पटुजातीया॥ दर्शनीयकल्पा॥ दर्शनीय देशीया॥ दर्शनीय रूपा॥ दर्शनीय पाशा॥ बहुप्रका

रमिति बहुधा॥ प्रशस्ता हेक्की हेकंति॥ अजाष्याहिना अजथ्या॥ शसि बह्वल्पार्थस्य पुंवद्भावो वक्तव्यः॥ बह्वीभ्यो देहि बहुशः॥ ॥ ७८ ॥

अल्पशः॥ त्वतलोर्गुणवचनस्य॥ शुक्लायाः भावः शुक्लत्वं॥ शुक्लता॥ गुणवचनस्य किं॥ कत्र्याभावः कत्रीत्वं॥ शरदः कृतार्थं

ते सादौ तु सामान्येन पुंसकं॥ भस्याढे तद्धिते॥ हस्तिनीनां समूहो हास्तिकं॥ अढे किं॥ रौहिणेयः॥ स्त्रीभ्यो ढगिति ढगग्

अनपूर्वेसरट् प्रकारवचने जातीयर् प्रशस्तायां रूपप् याप्ये पाशप् प्रकार वचने थाल् तव किंसर्वनाम बहुभ्यस्त्वधिकृतं इदकं निषधाभ्यां तिल् तातिल्यादि विज्ञेया अजा विभ्यां थ्यन् ४।२ शसि बह्वल्पार्थ॰

बह्वल्पार्थाच्छस्कारकादन्यतरस्यां तसिलादिवृत्तानाम् अर्थः यत्तसादिषु परिगणनं कर्तव्यमिति यावत् ३

ष्यते॥ अग्नेर्ढगिति ढकि तु पुंवदेव॥ अग्नायी देवतास्य स्थालीपाकस्य आग्नेयः॥ आग्नेयी॥ सपत्नी शाब्दस्त्रिधा॥ शात्रुपर्यायः सपत्न

श॰ शब्दो ङीरवादित्वान्ङीप्॥ समानः पतिर्यस्या इति विग्रहे विवाहनिबंधनं पतिशब्दमाश्रित्य नित्यस्त्रीलिंगाद्द्वितीयः॥ स्वामि

पर्याय पतिशब्देन ताषितपुंस्कस्तृतीयः॥ आद्ययोः शिवाद्यण्॥ सपत्न्या अपत्यं सापत्नः॥ तृतीया तु लिंगविशिष्टपरिभा

षया पत्युत्तरपदलक्षणोण्यएव॥ नत्वण्॥ शिवादौ रूढ्योरेव ग्रहणात्॥ सापत्यः पुंवत्॥ ठक्छसोश्च॥ पुंवद्भावः स्यात्

साश्छत्त्रः भावत्काः॥ सर्वदीयाः॥ एतद्दाणिक मेक तद्धिते नेति सूत्रं न कर्तव्यं॥ सर्वनाम्नो वृत्तिमात्रे तिषाष्पकारे ह्याग

तार्पत्वात्॥ सर्वमयः॥ सर्वकाम्यति॥ सा कौ विभार्या यस्य सर्वकभार्यः॥ सर्वप्रियइत्यादि॥ पूर्वपदस्यैवेदं॥ सिद्धत्वात्प्राइति

लिंगात्॥ तेनाकचि एकशेषप्रवृत्तौ च न॥ सर्विका॥ सर्वाः॥ कुक्कुटादीनामंडादिषु॥ कुक्कुट्या अंडं कुक्कुटांडं॥ मृग्याः पदं॥

मृगपदं॥ मृगक्षीरं॥ काकशावः॥ क्यङ्मानिनोश्च॥ एतयोः परतः पुंवत्॥ एनीवाचरति एतायते॥ श्येनीवाचरति श्येनायते वर्णादनुदात्तात्तो पधात्तोनः॥ ४।१।३९ र॥

ते॥ स्वभिन्नां कांचिद्दर्शनीयां मन्यते दर्शनीयमानिनी॥ दर्शनीयांमात्मानं मन्यते दर्शनीयमानी चैत्रः॥ न कोपधायाः॥ कोप

[illegible] ... इति भावः ... [illegible]

॥सि०कौ०॥ धायाः स्त्रियाः न पुंवत्। पाचिकाभार्यः। रसिकाभार्यः। मद्रिकायते। मद्रिकामानिनी। कोपधप्रतिषेधे तद्धितवुग्ग्रहणं। नेह। कौ०
॥६२॥ पाकाभार्या यस्य पाकभार्यः। संज्ञापूरण्योश्च। अनयोर्न पुंवत्। दत्ताभार्यः। दत्तामानिनी॥ दानक्रियानिमित्तः स्त्रियां पुंसि स० ब० ५०
च संज्ञाभूतोयमिति भाषितपुंस्कत्वमस्ति। पंचमीभार्यः। पंचमीपाशा॥ वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे। वृद्धिशब्दे
न विहिताया वृद्धेर्हेतुर्यस्तद्धितोऽरक्तविकारार्थस्तदंतास्त्री न पुंवत्। स्रौघ्नीभार्यः। माथुरीयते। माथुरीमानिनी।
वृद्धिनिमित्तस्य किं। मध्यमभार्यः। तद्धितस्य किं। काण्डलावभार्यः। वृद्धिशब्देन किं। तावद्भार्यः। रक्ते तु काषायी कंथा यस्य स
काषायकंथः। विकारे तु हैमी मुद्रिका यस्य स हैममुद्रिकः। वृद्धिशब्देन वृद्धिं प्रति फलोपधानाभावादिह पुंवत्। वैयाकर
णभार्यः। सौवश्वभार्यः। स्वांगाच्चेतः। स्वांगाद्य ईकारस्तदंतास्त्री न पुंवत्। सुकेशीभार्यः। स्वांगात्किं। पटुभार्यः। ईतः किं।
अकेशभार्यः। अमानिनीति वक्तव्यं। सुकेशमानिनी। सुकेशमानी। जातेश्च। जातेः परो यः स्त्रीप्रत्ययस्तदंतं न पुं ॥७९॥
वत्। शूद्राभार्यः। ब्राह्मणीभार्यः। सौत्रस्यैवायं निषेधः। तेन हस्तिनीनां समूहो हास्तिकमित्यत्र भस्याढे इति पुंवत्वं। सं
ख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये। संख्येयार्थया संख्ययाऽव्ययादयः समस्यंते स बहुव्रीहिः। दशानां समीपे ये सं ये।

[illegible] ... इति भावः ...
[illegible] ... ब्राह्मणीभार्यः ... [illegible]
सौत्रस्यैवेति व्याख्यानात् ... निषेध इति भावः ... [illegible]

नु ... विषये सप्तम्यंते समस्येते प्रहरणविषये तृतीयांते ... विषयविशेषः ... [illegible] ... इति ५ ... [illegible] ४

ति ते उपदशाः। नव एकादश वेत्यर्थः। बहुव्रीहौ संख्येये डजिति वक्ष्यमाणो डच्। तिविंशतेर्डिति। विंशतेर्भस्य तिशब्दस्य लोपः स्याड्डिति॥
आसन्नविंशाः। त्रिंशन्नरासन्ना इत्यर्थः। अदूरत्रिंशाः। अधिकचत्वारिंशाः। द्वौ वा त्रयो वा द्वित्राः। द्विरावृत्ता दश द्विदशाः। विंशतिरित्य
र्थः। दिङ्नामान्यन्तराले। दिशो नामान्यन्तराले वाच्ये प्राग्वत्। दक्षिणस्याः पूर्वस्याश्च दिशोन्तरालं दक्षिणपूर्वा। विदिगित्यर्थः।
नामग्रहणाद्यौगिकानां न। ऐंद्र्याः कौबेर्याश्चांतरालं। तत्र तेनेदमिति सरूपे। सप्तम्यंते ग्रहणविषये सरूपे पदे तृतीयांते च प्रह गृह्यते इति ग्रहणं केशादि
कर्मव्यतिहारः पर स्पर ... ग्रहणं ५ रणविषये इदं युद्धं प्रवृत्तमित्यर्थे समस्येते कर्मव्यतिहारे स बहुव्रीहिः। इतिशब्दात्स्वं विषयविशेषो लभ्यते। अन्येषा
मपि दृश्यते। दीर्घ इत्यनुवर्त्तते। इति कर्मव्यतिहारबहुव्रीहौ पूर्वपदांतस्य दीर्घः। इच् समासांतो वक्ष्यते। तिष्ठद्गुप्रभृतीनि च
इच्प्रत्ययपाठादव्ययीभावश्चेत्यव्ययीभावत्वमव्ययत्वं च। केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि। दंडैर्दंडैश्च प्र
हृत्येदं युद्धं प्रवृत्तं दंडादंडि। मुष्टीमुष्टि। ओर्गुणः। उवर्णांतस्य भस्य गुणः स्यात्तद्धिते। अवादेशः। बाहूबाहवि। ओरोदिति
वक्तव्ये गुणोक्तिः संज्ञापूर्वको विधिरनित्य इति ज्ञापयितुं। तेन स्वायंभुवमित्यादि सिद्धं। सरूपे किं। हलेन मुसलेन। तेन
सहेति तुल्ययोगे। तुल्ययोगे वर्त्तमानं सहेत्येतत्तृतीयांतेन प्राग्वत्। वोपसर्जनस्य। बहुव्रीहेरवयवस्य सहस्य सः स्याद्वा॥

संख्यांतस्य तत्पुरुषस्य अदंत... एकविंशतिरित्यादौ तु न भवति । अन्यथाधिकलोपादिति वार्त्तिककारोक्तेः ४ द्व्यंगुलेति । मात्रचो द्विगोर्नित्यमिति लुक् ५

॥सि॰ पू॰॥ पुत्रेण सह सपुत्रः ॥ सह पुत्रो वागतः ॥ तुल्ययोगवचनं प्रायिकं ॥ सलोमकः ॥ सकर्मकः ॥ बहुसांनिधिः ॥ सहशब्दः अकस्यास्या स॰ बहु॰
दाशिषि ॥ स्वस्ति राज्ञे सहपुत्राय सहामात्याय ॥ अगोवत्सहलेष्विति वाच्यं ॥ सगवे सवत्साय सहलाय ॥ बहुव्रीहौ संख्ये
॥ ८० ॥ ये डज्बहुगणात् ॥ संख्येये यो बहुव्रीहिस्तस्माड्डच् स्यात् ॥ उपदशाः ॥ अबहुगणात्किं ॥ उपबहवः ॥ उपगणाः ॥ अत्र स्वरवि
शेषः ॥ संख्यायास्तत्पुरुषस्य वाच्यः ॥ निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि चैत्रस्य ॥ निर्गतस्त्रिंशद्भ्यो अंगुलिभ्यो निस्त्रिं
शः खड्गः ॥ बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात् षच् ॥ व्यत्ययेन षष्ठी ॥ स्वांगवाचि सक्थ्यक्ष्यंताद्बहुव्रीहेः षच् स्यात् ॥ दीर्घे सक्
थिनी यस्य दीर्घसक्थः ॥ जलजाक्षी ॥ स्वांगात्किं ॥ दीर्घसक्थि शकटं ॥ स्थूलाक्षा वेणुयष्टिः ॥ अक्ष्णो दर्शनादिति वक्तव्यं ॥ अंगु
लेर्दारुणि ॥ अंगुल्यंताद्बहुव्रीहेः षच् स्याद्दारुण्यर्थे ॥ पंच अंगुलयो यस्य तत्पंचांगुलं दारु ॥ अंगुलिसदृशावयवं धान्या
दिविक्षेपकाष्ठमुच्यते ॥ बहुव्रीहेः किं ॥ द्वे अंगुली प्रमाणमस्याः द्व्यंगुला यष्टिः ॥ तद्धितार्थे ति तत्पुरुषे न तत्पुरुषस्यां ॥ ८० ॥
गुलेरित्यच् ॥ दारुणि किं ॥ पंचांगुलिर्हस्तः ॥ द्वित्रिभ्यां ष मूर्ध्नः ॥ आभ्यां मूर्ध्नः षः स्याद्बहुव्रीहौ ॥ द्विमूर्धः ॥ त्रिमूर्धः ॥ ने
तुर्नक्षत्रे ड्वक्तव्यः ॥ मृगो नेता यासां ता मृगनेत्रा रात्रयः ॥ अंतर्बहिर्भ्यां च लोम्नः ॥ आभ्यां लोम्नोऽप् स्याद्बहुव्रीहौ ॥ अंत

नेतुरिति । नेता नायकः । नक्षत्रे यो नेतृशब्दस्तदंताद्बहुव्रीहेरित्यर्थः । मृगनेत्रा इति । मृगो मृगशीर्षं नक्षत्रं । चंद्रो नेता यस्य मृगनक्षत्रस्य चंद्रनेता मृग इत्यत्र तु न भवति । इह नेतृशब्दांताद्बहुव्रीहेर्नक्षत्रे
वर्तते । न तु नेतृशब्द इति ८

उपसर्गाच्च । उपसर्गग्रहणं प्रादीनामुपलक्षणं । नासिकाशब्दस्य क्रियार्थत्वेन तं प्रत्युपसर्गत्वायोगात् । न च क्रियायोगाभावे उपसर्गत्वमस्तीति वाच्यं । साधके । अधिसाधकमित्यादौ वीभावेऽप
सर्गादिकनोतीति समस्तस्य षत्वप्रसंगादित्याह । प्रादेरिति । ५ । प्रगता नासिका अस्य प्रणसः । नासिकयोपलक्षितेति नत्वात्र विनसेति । न प्रथमांतं किं तु पदद्वंद्विति न समदेशे ... भावः ८

लोम ॥ बहिर्लोमः ॥ अंतर्नासिकायाः संज्ञायां नसं चास्थूलात् ॥ नासिकांताद्बहुव्रीहेरच् नासिकाशब्दस्य नसं आदेशोऽतिनवु
स्थूलपूर्वात् ॥ पूर्वपदात्संज्ञायामगः ॥ पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्संज्ञायां न तु गकारव्यवधाने ॥ द्रुरिव नासि
काऽस्य द्रुणसः ॥ खरणसः ॥ अगः किं ॥ ऋचायमेन ऋगयनं ॥ अणृगयनादिभ्य इति पाठान्नातणत्वमाश्रित्य अग अत्वंतस्येति दर्पः
इति प्रत्याख्यातं भाष्ये ॥ अस्थूलात्किं ॥ स्थूलनासिकः ॥ खुरखराभ्यां वा नस् ॥ खुरणाः ॥ खरणाः ॥ पक्षे अज्पीष्यते ॥ खुरणसः ॥
खरणसः ॥ उपसर्गाच्च ॥ आदेयो नासिकाशब्दस्तदंताद्बहुव्रीहेरच् स्यात् ॥ नासिकाया नसादेशश्च ॥ असंज्ञार्थं वचनं ॥ उन्न
ता नासिका यस्य उन्नसः ॥ उपसर्गादनोत्पर इति सूत्रं प्रत्याख्याय भाष्यकार आह ॥ उपसर्गाद्बहुलं ॥ उपसर्गस्थान्निमित्तात्पर
स्य नसो नस्य णः स्याद्बहुलं ॥ प्रणसः ॥ वेर्ग्रो वक्तव्यः ॥ विगता नासिका अस्य विग्रः ॥ खुरखोश्च ॥ विखुः ॥ विखः ॥ ख्यश्च ॥ विख्यः
कथं तर्हि विनसा हतबांधवेति भट्टिः ॥ विगतया नासिकयोपलक्षितेति व्याख्येयं ॥ सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्र
एणीपदाजपदप्रोष्ठपदाः ॥ एते बहुव्रीहयो निपात्यंते ॥ शोभनं प्रातरस्य सुप्रातः ॥ शोभनं श्वो यस्य सुश्वः ॥
शोभनं दिवा अस्य सुदिवः ॥ शारेरिव कुक्षिरस्य शारिकुक्षः ॥ चतस्रो अश्रयो अस्य चतुरश्रः ॥ एण्या इव पादो अस्य एणी

शक्त्योरिति पाठः। आचार्यैर्न ... हलिशक्त्योरिति पाठितौ इति भावः २

प्रोष्ठोगौः पदः ॥ अजपदः ॥ प्रोष्ठस्येव पादावस्य प्रोष्ठपदः ॥ नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्यां ॥ अक्ष्यात् ॥ अहलः ॥ अहलिः ॥ अ स॰ बहु॰
॥सि॰ कौ॰॥ सक्थः ॥ असक्थिः ॥ एवं दुःसुभ्यां ॥ शक्त्योरिति पाठांतरं ॥ अशक्तिः ॥ अशक्तः ॥ नित्यमसिच्प्रजामेधयोः ॥ नञ्दुःसुभ्यः
इत्येव ॥ अप्रजाः ॥ दुःप्रजाः ॥ सुप्रजाः ॥ अमेधाः ॥ दुर्मेधाः ॥ सुमेधाः ॥ धर्मादनिच् केवलात् ॥ केवलपूर्वपदात्परो यो धर्मशब्द
॥८१॥ स्तदंताद्बहुव्रीहेरनिच् स्यात् ॥ कल्याणधर्मा ॥ केवलात्किं ॥ परमः स्वो धर्मो यस्येति त्रिपदे बहुव्रीहौ मा भूत् ॥ स्वशब्दे
हीह न केवलं पूर्वपदं किंतु [illegible] मध्यमतापेक्षिकं ॥ संदिग्धसाध्यधर्मेत्यादौ तु कर्मधारयपूर्वपदो बहुव्रीहिः ॥ ए
वं परमस्वधर्मेत्याद्यपि साध्वेव ॥ निवृत्तिधर्मा अनुच्छित्तिधर्मेत्यादिवत् ॥ पूर्वपदं तु बहुव्रीहिणाक्षिप्यते ॥ जंभा
सुहरिततृणसोमेभ्यः ॥ जंभेति कृतसमासांतं निपात्यते ॥ जंभो भक्ष्ये दंते च ॥ शोभनो जंभोस्य सुजंभा ॥ हरितजंभा
निपातः तृणं भक्ष्यं यस्य तृणमिव दंता अस्येति वा तृणजंभा ॥ एवं सोमजंभा ॥ स्वादिभ्यः किं ॥ पतितजंभः ॥ दक्षिणेर्मा लुब्धयोगे ॥ ॥८२॥
दक्षिणे ईर्मं व्रणं यस्य स दक्षिणेर्मा मृगः ॥ व्याधेन कृतव्रण इत्यर्थः ॥ इच् कर्मव्यतिहारे ॥ कर्मव्यतिहारे यो बहुव्रीहिस्तस्मा
दिच् स्यात्समासांतः ॥ केशाकेशि ॥ मुसलामुसलि ॥ द्विदंड्यादिभ्यश्च ॥ तादर्थ्ये चतुर्थ्येषा ॥ एषां सिद्ध्यर्थमिच्प्रत्ययः ॥ द्विदंडि

यस्मिन्प्रहरणे तद्द्विदंडि ॥ द्विमुसलि ॥ उभाहस्ति ॥ उभयाहस्ति ॥ प्रसंभ्यां जानुनोर्ज्ञुः ॥ आभ्यां परस्य जानुशब्दस्य ज्ञुरादे
शः स्याद्बहुव्रीहौ ॥ प्रगते जानुनी अस्य प्रज्ञुः ॥ संज्ञुः ॥ ऊर्ध्वाद्विभाषा ॥ ऊर्ध्वज्ञुः ॥ ऊर्ध्वजानुः ॥ धनुषश्च ॥ धनुरंतस्य बहुव्रीहे
रनङादेशः स्यात् ॥ शार्ङ्गधन्वा ॥ वा संज्ञायां ॥ शतधन्वा ॥ शतधनुः ॥ जायाया निङ् ॥ जायांतस्य बहुव्रीहेर्निङ् स्यात् ॥ लो
पो व्योर्वलि ॥ वकारयकारयोर्लोपः स्याद्वलि परे ॥ युवजानिः ॥ युवतिर्जाया यस्य स युवजानिः ॥ गंधस्येदुत्पूतिसुसुरभि
भ्यः ॥ एभ्यो गंधस्य इकारांतादेशः स्यात् ॥ उद्गंधिः ॥ पूतिगंधिः ॥ सुगंधिः ॥ सुरभिगंधिः ॥ गंधस्येत्वे तदेकांतग्रहणं ॥ एकांत
एकदेश इत्येव ॥ अविभागेन लक्ष्यमाण इत्यर्थः ॥ सुगंधि पुष्पं सलिलं च ॥ सुगंधिर्वायुः ॥ नेह ॥ शोभना गंधा द्रव्याण्य
स्य सुगंध आपणिकः ॥ अल्पाख्यायां ॥ सूपस्य गंधो लेशो यस्मिन्स्तत्सूपगंधि भोजनं ॥ घृतगंधि ॥ गंधो गंधक आमो
दे लेशे संबंधगर्वयोरिति विश्वः ॥ उपमानाच्च ॥ पद्मस्येव गंधो यस्य पद्मगंधिः ॥ पादस्य लोपोऽहस्त्यादिभ्यः ॥ हस्त्या
दिवर्जितादुपमानात्परस्य पादशब्दस्य लोपः स्याद्बहुव्रीहौ ॥ स्थानिद्वारेणायं समासांतः ॥ व्याघ्रस्येव पादावस्य व्या अ

अएवं ... इति भावः २ स्थानिद्वारेणेति। ... इति भावः १

१ अल्पाख्यायां। अल्पवाचिनो गंधस्येकारांतादेशः स्याद्बहुव्रीहौ। सूपस्येति। अत एव ज्ञापकाद्व्यधिकरणपदो बहुव्रीहिः ... सूपः गंधो यस्मिन्नित्येव विग्रहः
गंधस्य विशेषणत्वेपि अस्मादेव ज्ञापकान्न परनिपातः १

॥ सि०कौ०॥ प्रपात्॥ अहस्त्यादिभ्यः किं। हस्तिपादः॥ कुसूलपादः॥ कुंभपदीषु च॥ कुंभपदीषु पादस्य लोपो ङीप् च निपात्यते स्त्रियां॥ स० बहु०
पादः पत्॥ कुंभपदी॥ स्त्रियां किं। कुंभपादः॥ संख्यासुपूर्वस्य॥ पादस्य लोपः स्यात्समासांतो बहुव्रीहौ॥ द्विपात्॥ सुपात्॥
॥८२॥ वयसि दंतस्य दतृ॥ संख्यासुपूर्वस्य दंतस्य दतृ इत्यादेशः स्याद्वयसि॥ द्विदन्॥ चतुर्दन्॥ षड् दंता अस्य षोडन्॥ सुदन्॥
सुदती॥ वयसि किं। द्विदंतः करी॥ सुदंतः॥ स्त्रियां संज्ञायां॥ दंतस्य दतृ इत्यादेशः स्यात्समासांतो बहुव्रीहौ॥ अयोदती
फालदती॥ संज्ञायां किं। समदंती॥ विभाषा श्यावारोकाभ्यां॥ दंतस्य दतृ वा बहुव्रीहौ॥ श्यावदन्॥ श्यावदंतः॥ अरो
कदन्॥ अरोकदंतः॥ अग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च॥ एभ्यो दंतस्य दतृ वा॥ कुड्मलाग्रदन्॥ कुड्मलाग्रदंतः॥ ककुद
स्यावस्थायां लोपः॥ अजातककुत्॥ पूर्णककुत्॥ त्रिककुत्पर्वते॥ त्रीणि ककुदान्यस्य स त्रिककुत्॥ संज्ञैषा॥ पर्वतविशेषस्य
त्रिककुदोन्यः॥ उद्विभ्यां काकुदस्य॥ लोपः॥ उत्काकुत्॥ विकाकुत्॥ काकुदं तालु॥ पूर्णाद्विभाषा॥ पूर्णकाकुत्॥ पूर्णका ॥८२॥
कुदः॥ सुहृद्दुर्हृदौ मित्रामित्रयोः॥ सु[illegible]दुर्भ्यां हृदयस्य हृद्भावो निपात्यते॥ सुहृन्मित्रं॥ दुर्हृदमित्रं॥ अन्यत्र सुहृद
यः॥ दुर्हृदयः॥ उरःप्रभृतिभ्यः कप्॥ व्यूढोरस्कः॥ प्रियसर्पिष्कः॥ द्विपुमान्॥ अनड्वान्॥ पयः॥ नौः॥ लक्ष्मीरिति एकव

व्यूढं विशालं उरो यस्य॥

चनांतानि पठ्यंते॥ द्विवचनबहुवचनांतेभ्यस्तु शेषाद्विभाषेति विकल्पेन कप्॥ द्विपुमान्॥ द्विपुंस्कः॥ अर्थान्नञः॥ अनर्थकं॥
अपार्थ २ नञः किं। अपार्थकं॥ इनः स्त्रियां॥ बहुदंडिका नगरी॥ अनिनस्मिन्ग्रहणान्यर्थवता चानर्थकेन च तदंतविधिं प्रयोजयंति॥ ब
हुवाग्मिका॥ स्त्रियां किं। बहुदंडिका॥ बहुदंडिको ग्रामः॥ शेषाद्विभाषा॥ अनुक्तसमासांता शेषाधिकारस्था बहुव्रीहेः क अधिकारः २
प् वा स्यात्॥ महायशस्कः॥ महायशाः॥ अनुक्तसा किं। व्याघ्रपात्॥ सुगंधिः॥ प्रियपथः॥ शेषाधिकारस्था किं। उपबहवः॥
उत्तरपूर्वा॥ सपुत्रः॥ तंत्रादिना शेषग्रहोऽर्थद्वयपरः॥ आपोऽन्यतरस्यां॥ कपि आबंतस्य ह्रस्वो वा स्यात्॥ बहुमालकः॥ ब
हुमालाकः॥ कपभावे बहुमालः॥ न संज्ञायां॥ शेषादिति प्राप्तो न कप् स्यात्संज्ञायां॥ विश्वेदेवा अस्य विश्वदेवः॥ ईयस
श्च॥ ईयसंतोत्तरपदान्न कप्॥ बहवः श्रेयांसोऽस्य बहुश्रेयान्॥ गोस्त्रियोरिति ह्रस्वे प्राप्ते॥ ईयसो बहुव्रीहेर्नेति वाच्यं॥
बहुश्रेयस्यावस्य स बहुश्रेयसी॥ बहुव्रीहेः किं। अतिश्रेयसिः॥ वंदिते भ्रातुः॥ पूजितेऽर्थे यो भ्रातृशब्दस्तदंतान्न कप्॥
भाना प्रशस्तो भ्राता यस्य स प्रशस्तभ्राता॥ सुभ्राता॥ न पूजनादिति निषेधस्तु बहुव्रीहौ सक्थ्यक्ष्णोरिति सूत्रात्प्रागेवेति वक्ष्यते॥ वं
दिते किं। मूर्खभ्रातृकः॥ नाडीतंत्र्योः स्वांगे॥ स्वांगे यौ नाडीतंत्रीशब्दौ तदंतान्न कप् स्यात्॥ बहुनाडिः कायः॥ बहुतं

स्त्रीप्रत्ययांतत्वाभावादिति । आवंतस्य [illegible] इति भावः ॥ द्विशब्दस्य सर्वनामत्वेपि [illegible] संख्यायाः ग्रहणं ४

त्रीर्यस्य वि॰ । तंत्रीर्धमनी । स्त्रीप्रत्ययांतत्वाभावान्न ह्रस्वो न ॥ स्वांगेति किं ॥ बहुनाडीकः स्तंबः ॥ बहुतंत्रीका वीणा ॥ निष्प्रवाणिश्च ॥ स॰ बहु॰

॥ सि॰ पू॰ ॥ न॰ ॥ ८३ ॥ कप्समासांतोत्र निपात्यते ॥ प्रपूर्वाद्वयतेर्ल्युट् ॥ प्रवाणी तंतुवायशलाका ॥ निर्गता प्रवाणी अस्या निष्प्रवाणिः पटः ॥ समाप्त

वान्नव इत्यर्थः ॥ सप्तमीविशेषणे बहुव्रीहौ ॥ सप्तम्यंतं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यं ॥ कंठेकालः ॥ अत एव ज्ञा

पकाद्व्यधिकरणपदो बहुव्रीहिः ॥ चित्रगुः ॥ सर्वनामसंख्ययोरुपसंख्यानं ॥ सर्वश्वेतः ॥ द्विशुक्लः ॥ मिथोनयोः समा

से हि तत्संख्या पूर्वं ॥ शब्दपरविप्रतिषेधात् ॥ अन्यः ॥ संख्याया अल्पीयस्याः ॥ द्वित्राः ॥ द्वंद्वेपि ॥ द्वादश ॥ वा प्रियस्य ॥ प्रि

यगुडः ॥ गुडप्रियः ॥ गड्वादेः परा सप्तमी ॥ गडुकंठः ॥ क्वचिन्न ॥ वहेगडुः ॥ निष्ठा ॥ निष्ठांतं बहुव्रीहौ पूर्वं स्यात् ॥ कृतकृत्यः ॥ ॥ ८३ ॥

जातिकालसुखादिभ्यः परा निष्ठा वाच्या ॥ सारंगजग्धी ॥ मासजाता ॥ सुखजाता ॥ प्रायिकं चेदं ॥ कृतकंठः ॥ कृतपटः ॥

पीतोदकः ॥ वाहिताग्न्यादिषु ॥ आहिताग्निः ॥ अग्न्याहितः ॥ आकृतिगणोयं ॥ प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ ॥

अस्युद्यतः ॥ दंडपाणिः ॥ क्वचिन्न ॥ विद्धासिः ॥ ॥ इति बहुव्रीहिः समाप्तः ॥ ॥ श्रीः ॥ ॥ श्रीः ॥ ॥

सारंगो जग्धो यया सा । अस्वांगपूर्वपदाद्वेति ङीष् ३

॥ ॥ चार्थे द्वंद्वः ॥ अनेकं सुबंतं चार्थे वर्तमानं वा समस्यते स द्वंद्वः ॥ समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः ॥ परस्परनिरपेक्षस्या

नेकस्यैकस्मिन्नन्वयः समुच्चयः ॥ अन्यतरस्यानुषंगिकत्वेनान्वाचयः ॥ मिलितानामन्वय इतरेतरयोगः ॥ समूहः ॥ तत्रेश्वरं गुरुं च भज समाहारः

स्वेति समुच्चये ॥ भिक्षामट गां चानयेत्यन्वाचये च न समासोऽसामर्थ्यात् ॥ धवखदिरौ छिंधीतीतरेतरयोगः ॥ संज्ञापरिभाषं ॥ अनेको

के होतृपोतृनेष्टोद्गातारः ॥ द्वयोर्द्वयोर्द्वंद्वं कृत्वा पुनर्द्वंद्वे तु होतापोतारौ नेष्टोद्गातारः ॥ राजदंतादिषु परं ॥ एषु पूर्वप्रयोगार्हं परं स्यात् ॥ दं

तानां राजा राजदंतः ॥ धर्मादिष्वनियमः ॥ अर्थधर्मौ ॥ धर्मार्थौ ॥ दंपती ॥ जंपती ॥ जायापती ॥ जायाशब्दस्य जंभावो दंभावश्च निपात्यते ॥

आकृतिगणोयं ॥ द्वंद्वे घि ॥ द्वंद्वे घिसंज्ञं पूर्वं स्यात् ॥ ईशकृष्णौ ॥ हरिश्च हरश्च हरिहरौ ॥ अनेकप्राप्तावेकत्र नियमः ॥ अनियमः शेषे ॥ ह

रिगुरुहराः ॥ हरिहरगुरवः ॥ अजाद्यदंतं ॥ ईशकृष्णौ ॥ बहुष्वनियमः ॥ अश्वरथेंद्राः ॥ इंद्राश्वरथाः ॥ घ्यंतादजाद्यदंतं विप्रतिषेधेन परं ॥ इं नाथ

द्राग्नी ॥ अल्पाच्तरं ॥ शिवकेशवौ ॥ इदं द्वंद्वे पूर्वं स्यात् ॥ ऋतुनक्षत्राणां समानाक्षराणामानुपूर्व्येण ॥ हेमंतशिशिरवसंताः ॥ कृत्तिकारो

हिण्यौ ॥ समानाक्षराणां किं ॥ ग्रीष्मवसंतौ ॥ लघ्वक्षरं पूर्वं ॥ कुशकाशं ॥ अभ्यर्हितं च ॥ तापसपर्वतौ ॥ वर्णानामानुपूर्व्येण ॥ ब्राह्मणक्षत्रिय इतरेतरेषां

विट्शूद्राः ॥ भ्रातुर्ज्यायसः ॥ युधिष्ठिरार्जुनौ ॥ ॥ द्वंद्वश्च प्राणितूर्यसेनांगानां ॥ एषां द्वंद्व एकवत्स्यात् ॥ पाणिपादं ॥ मार्दंगिकपाण

मूलेऽध्वर्युक्रतुर्यजुर्वेदलक्षकस्तदर्थः। ३ पदान्यधीतेपदकः क्रमादिभ्योवुन् एवं क्रमकोऽपि। ५ [illegible]

स्या

विकं॥ रथिकाश्वारोहं॥ समाहारस्यैकत्वादेकत्वे सिद्धे नियमार्थं प्रकरणं। प्राण्यंगादीनां समाहार एव यथा स्यात्॥ अनुवादे चरणा
॥सि०कौ०॥ नां॥ चरणानां द्वंद्व एकवत्॥ सिद्धस्योपन्यासे॥ स्थेणोर्लुङीति वक्तव्यं॥ उदगात्कठकालापं॥ प्रत्यष्ठात्कठकौथुमं॥ अध्वर्युक्रतुरन
पुंसकं॥ यजुर्वेदे विहितोयः क्रतुस्तद्वाचिनामनपुंसकलिंगानां द्वंद्व एकवत्स्यात्॥ अर्काश्वमेधं॥ अध्वर्युक्रतुः किं॥ इषुवज्रौ
॥७४॥ सामवेदे विहितौ॥ अनपुंसकं किं॥ राजसूयवाजपेये॥ अर्धर्चादि॥ अध्ययनतोऽविप्रकृष्टाख्यानां॥ अध्ययनेन प्रत्यासन्ना आख्या
येषां तेषां द्वंद्व एकवत्॥ पदकक्रमकं॥ जातिरप्राणिनां॥ प्राणिवर्ज्यजातिवाचिनां द्वंद्व एकवत्॥ धानाशष्कुलि॥ प्राणिनां तु विट्शू
द्राः॥ द्रव्यजातीयानामेव॥ नेह॥ रूपरसौ॥ गमनाकुंचने॥ जातिप्राधान्य एवायमेकवद्भावः॥ द्रव्यविशेषविवक्षायां तु बदरामल
कानि॥ विशिष्टलिंगो नदी देशोऽग्रामाः॥ ग्रामवर्ज्यनदीदेशवाचिनां भिन्नलिंगानां समाहारे द्वंद्व एकवत्॥ उद्ध्यश्चेरावती च उद्ध्येरा
वति॥ गंगा च शोणश्च गंगाशोणं॥ कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रं॥ भिन्नलिंगानां किं॥ गंगायमुने॥ मद्रकेकयाः॥ अग्रामाः किं॥ जां
बवं नगरं॥ शाल्मकिनी ग्रामः॥ जांबवशाल्मकिन्यौ॥ क्षुद्रजंतवः॥ एषां समाहारे द्वंद्व एकवत्॥ यूकालिक्षं॥ आनकुलात्क्षुद्रजंतवः॥ ॥७५॥
येषां च विरोधः शाश्वतिकः॥ प्राग्वत्॥ अहिनकुलं॥ गोव्याघ्रं॥ काकोलूकमित्यादौ परत्वात् द्विधा पशुशकुनीति प्राप्तं चकारेण बाध्यते॥

नेतरेतरयोग इत्यर्थः। १

प०३

[illegible]
[illegible]

शूद्राणामनिरवसितानां॥ अबहिष्कृतानां शूद्राणां प्राग्वत्॥ तक्षायस्कारं॥ पात्राद्बहिष्कृतानां तु चंडालमृतपाः॥ गवाश्वप्रभृतीनि
च॥ यथोच्चारितानि तथैव साधूनि। गवाश्वं। दासीदासमित्यादि॥ ॥विभाषा वृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वाप
राधरोत्तराणां॥ वृक्षादीनां सप्तानां द्वंद्व अश्ववडवेत्यादि द्वंद्वत्रयं च प्राग्वत्॥ वृक्षादौ विशेषाणामेव ग्रहणं॥ प्लक्षन्यग्रोधं॥ प्लक्षन्यग्रो
धाः॥ रुरुपृषतं॥ रुरुपृषताः॥ कुशकाशं॥ कुशकाशाः॥ व्रीहियवं॥ व्रीहियवाः॥ दधिघृतं॥ दधिघृते॥ गोमहिषं॥ गोमहिषाः॥ शुकबकं॥
शुकबकाः॥ अश्ववडवं॥ अश्ववडवौ॥ पूर्वापरं॥ पूर्वापरे॥ अधरोत्तरं॥ अधरोत्तरे॥ फलसेनावनस्पतिमृगशकुनिक्षुद्रजंतुधान्य
तृणानां बहुप्रकृतिकः एव द्वंद्व एकवदिति वाच्यं॥ बदराणि च आमलकानि च बदरामलकं॥ जातिरप्राणिनामित्येकवद्भावः॥ नेह॥
बदरामलके॥ रथिकाश्वारोहौ॥ प्लक्षन्यग्रोधावित्यादि॥ विभाषा वृक्षेति सूत्रे येऽप्राणिनस्तेषां ग्रहणं जातिरप्राणिनामिति नित्यं
प्राप्ते विकल्पार्थं॥ पशुग्रहणं हस्त्यश्वादिषु सेनांगत्वान्नित्यं प्राप्ते मृगाणां मृगैरेव शकुनीनां तैरेव च समन्वये द्वंद्व॥ अन्यैः सह इतरेतर
योग एवेति नियमार्थं मृगशकुनिग्रहणं॥ एवं पूर्वापरमधरोत्तरमित्यपि॥ अश्ववडवग्रहणं तु पक्षे नपुंसकार्थं॥ अन्यथा परत्वा
त्पूर्ववदश्ववडवाविति स्यात्॥ विप्रतिषिद्धं चानधिकरणवाचि॥ विरुद्धार्थानामद्रव्यवाचिनां द्वंद्व एकवत्स्याद्वा॥ ॥ वैकल्पिकः समा

बहुवोपादानं पदार्थाः बहुवचनानां च प्रकृतिः कारणं यस्य स बहुप्रकृतिः। ५ [illegible]

होतृपोतारं इति उत्तरपदत्वाभावादयमयोगनङ् ५

हारे द्वंद्वस्यार्थौ तैस्त्रेण शास्त्रः सविरुद्धानां यदिस्थं भवति तर्हि अद्रव्यवाचिनामेवेति नियमार्थं द्वंद्व ॥ तेन द्रव्यवाचिनां इतरेतरयोग एव स॰६०

॥सि॰१०॥ शीतोष्णे ॥ २।४।१५ ॥ द्धकेस्त ॥ विप्रतिषिद्धं किं ॥ नंदकपांचजन्यं ॥ इह पाक्षिकः समाहारद्वंद्वोऽप्यस्त्येव ॥ शीतोष्णे ॥ शीतोष्णं ॥ सुख

दुःखे ॥ सुखदुःखं ॥ न दधिपय आदीनि ॥ एतानि नैकवत्स्युः ॥ दधिपयसी ॥ इध्माबर्हिषी ॥ निपातनाद्दीर्घः ॥ ऋक्सामे ॥ वाङ्मनसे ॥

॥८०१॥ अधिकरणैतावत्त्वे च ॥ द्रव्यसंख्यावगमे एकवदिति नियमो न स्यात् ॥ दश दंतोष्ठाः ॥ विभाषा समीपे ॥ अधिकरणैतावत्त्वस्य सा

मीप्येन परिच्छेदे समाहार एवेत्येवंरूपो नियमो वा स्यात् ॥ उपदशं दंतोष्ठं ॥ उपदशा दंतोष्ठाः ॥ आनङ् ऋतो द्वंद्वे ॥ विद्यायोनिसंबं

धवाचिनामृदंतानां द्वंद्वे आनङ् स्यादुत्तरपदे ॥ होतापोतारौ ॥ होतृपोतृनेष्टोद्गातारः ॥ मातापितरौ ॥ पुत्रे अन्यतरस्यामित्य

४ पुत्रशब्दस्य ऋदंतलाभावादनुवृत्तिग्रहणं ४ तो मंडूकप्लुत्या पुत्र इत्यनुवृत्तेः पितापुत्रौ ॥ देवताद्वंद्वे च ॥ इहोत्तरपदे आनङ् ॥ मित्रावरुणौ ॥ वायुशब्दप्रयोगे प्रतिषेधः ॥ अग्नि

वायू ॥ वाय्वग्नी ॥ पुनर्द्वंद्वग्रहणं प्रसिद्धसाहचर्यस्य परिग्रहणार्थं ॥ तेन ब्रह्मप्रजापती सादौ नानङ् ॥ एतद्धि नैकहविर्भागि ते ॥८५॥

न्ध्रुक्तं ॥ नापि लोके प्रसिद्धसाहचर्यं ॥ ईदग्नेः सोमवरुणयोः ॥ देवताद्वंद्वे इत्येव ॥ अग्नेः स्तुत्स्तोमसोमाः ॥ अग्नेः परेषामेषां

सस्य षः स्यात् समासे ॥ अग्निष्टुत् ॥ अग्निष्टोमः ॥ अग्नीषोमौ ॥ अग्नीवरुणौ ॥ इद्वृद्धौ ॥ वृद्धिमत्युत्तरपदे अग्नेरिदादेशः

ऋत्वंमाभूदिति ॥ अकोरत्वनिस्कारस्यश्चवर्णत्वमिति तेन प्रयोगे विकाराभावो नु मीयत इति भावः ४ उषाश्च सूर्यश्चेतयोः समाहारः

न्ति स्याद्देवताद्वंद्वे ॥ अग्नामरुतौ देवतास्य आग्निमारुतं कर्म ॥ अग्नीवरुणौ देवतास्य आग्निवारुणं ॥ देवताद्वंद्वे चेत्युत्तरपदवृद्धिः ॥ अलौ

किके वाक्ये आनङ् मीत्वं च बाधित्वा इत्वं ॥ वृद्धौ किं ॥ आग्नेंद्रः ॥ नेंद्रस्य परस्य ॥ इंद्रस्य परस्योत्तरपदवृद्धिप्रतिषेधः ॥ विशेषेण ॥ आग्नावैष्णवं

दिवो द्यावा ॥ देवताद्वंद्वे उत्तरपदे ॥ द्यावाभूमी ॥ द्यावाक्षामा ॥ दिवसश्च पृथिव्यां ॥ दिव इत्येव ॥ वा त् द्यावा ॥ आदेशे अकारोच्चार

णं सकारस्य रुत्वं माभूदित्येतदर्थं ॥ द्यौश्च पृथिवी च दिवस्पृथिव्यौ ॥ छंदसि दृष्टानुविधिः ॥ द्यावा चिदस्मै पृथिवी ॥ दिवस्पृथिव्यौ मातरपितरौ ५

रित्यत्र पदकारा विसर्गं पठंति ॥ उषासोषसः ॥ उषस्शब्दस्योषासादेशो देवताद्वंद्वे ॥ उषासासूर्यं ॥ मातरपितरावुदीचां ॥ उदीचां

किं ॥ मातापितरौ ॥ द्वंद्वाच्चुदषहांतात् समाहारे ॥ चवर्गांताद्दषहांताद्द्वंद्वात् टच् स्यात् समाहारे ॥ वाक्त्वचं ॥ वाक्स्रजं ॥ शमीदृषदं ॥

वाक्त्विषं ॥ छत्रोपानहं ॥ समाहारे किं ॥ प्रावृट्शरदौ ॥ ॥ इति द्वंद्वः ॥ ॥ अथैकशेषः ॥ सरूपाणामेकशेष एकविभक्तौ ॥

रामौ ॥ रामाः ॥ विरूपाणामपि समानार्थानां ॥ वक्रदंडश्च कुटिलदंडश्च वक्रदंडौ ॥ कुटिलदंडौ ॥ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ॥

यूना सहोक्तौ गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात् ॥ गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ ॥ वृद्धः किं ॥ गर्गगा

र्ग्यायणौ ॥ यूना किं ॥ गर्गगार्ग्यौ ॥ तल्लक्षणः किं ॥ भागवित्तिभागवित्तिकौ ॥ कुत्सितं किं ॥ गार्ग्यवात्स्यायनौ ॥ स्त्री पुंवच्च ॥ यूनास

गार्ग्यवात्स्यायनाविति । इह प्रकृत्यंशो वैरूप्ये न गोत्रादिकृतं ~

युवक्त्रावकृतवैलक्षण्यं स्पष्टीकर्तुं द्वितीयमुदाहरणमाह । गार्ग्यायणाविति ~

भगवित्तेरपत्यं भागवित्तिस्तस्मादपत्यं युनि वृद्धात् ... कुत्सायां ठक् । इह कुत्सा सौवीरत्वं चाधिकमपेक्ष्यते । न तु प्रत्ययमात्रकृतं वैरूप्यं ~

वृद्धयूनीति। गोत्रप्रत्ययान्तं स्त्री वत्सकमित्यर्थः ९

॥ सि० कौ० होक्तौ वृद्धस्त्री शिष्यते तदर्थश्च पुंवत् ॥ गार्गी च गार्ग्यायणश्च गार्ग्यौ ॥ अस्त्रियामित्यनुवर्त्तमाने ॥ यत्र गोत्रेतिलुक् ॥ दाक्षी च दाक्षा- समा० एक०
यणश्च दाक्षी ॥ पुमान् स्त्रिया ॥ स्त्रिया सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत् ॥ हंसी च हंसश्च हंसौ ॥ भ्रातृपुत्रौ स्वसृदुहितृ-
॥ न्दि ॥ भ्यां ॥ भ्राता च स्वसा च भ्रातरौ ॥ पुत्रश्च दुहिता च पुत्रौ ॥ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां ॥ अक्लीबेन सहोक्तौ क्लीबं
शिष्यते तच्च वा एकवत् स्यात् तल्लक्षण एव विशेषश्चेत् ॥ शुक्लः पटः ॥ शुक्ला पटी ॥ शुक्लं वस्त्रं ॥ तदिदं शुक्लं ॥ तानीमानि शुक्लानि ॥ पिता
मात्रा ॥ मात्रा सहोक्तौ पिता वा शिष्यते ॥ माता च पिता च पितरौ ॥ मातापितरौ ॥ श्वशुरः श्वश्र्वा ॥ श्वश्र्वा सहोक्तौ श्वशुरो वा शिष्य-
ते ॥ श्वशुरौ ॥ श्वश्रूश्वशुरौ ॥ त्यदादीनि सर्वैर्नित्यं ॥ सर्वैः सहोक्तौ त्यदादीनि शिष्यन्ते ॥ स च देवदत्तश्च तौ ॥ त्यदादीनां मिथः सहो-
क्तौ यत्परं तच्छिष्यते ॥ स च यश्च यौ ॥ पूर्वशेषोऽपि दृश्यत इति भाष्यं ॥ स च यश्च तौ ॥ त्यदादितः शेषे पुंनपुंसकतो लिंगवचनानि ॥
सा च देवदत्तश्च तौ ॥ तच्च देवदत्तश्च यज्ञदत्ता च तानि ॥ पुंनपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते ॥ तच्च देवदत्तश्च ते ॥ अद्वंद्व- ॥ न्दि ॥
ना तत्पुरुषविशेषणानामिति वक्तव्यं ॥ कुक्कुटमयूर्याविमे ॥ मयूरीकुक्कुटाविमौ ॥ तत्र भाव अर्धपिप्पल्यौ चेति ॥ ग्राम्यपशुसंघे-
ष्वतरुणेषु स्त्री ॥ एषु स्त्रीसहविवक्षायां स्त्री शिष्यते पुमान् स्त्रियेत्यस्यापवादः ॥ गाव इमाः ॥ ग्राम्येति किं ॥ रुरव इमे ॥ पशुष्व-

अविग्रह इति लौकिकविग्रहरहित इत्यर्थः अस्वपदेति। असमस्यमानैर्यावत्पदाघटित इत्यर्थः ५

किं ॥ ब्राह्मणाः ॥ संघेषु किं ॥ एतौ गावौ ॥ अतरुणेषु किं ॥ वत्सा इमे ॥ अनेकशफेष्विति वाच्यं ॥ अश्वा इमे ॥ इह सर्वत्रैव एकशेषे कृतेऽ
श्रे २ नेकत्वाभावाद्द्वंद्वेन ॥ ते न शिरसी शिरांसीत्यादौ समस्तानां संतो दान्तः प्राण्यंगत्वादेकवद्भावश्च न ॥ पंथानौ ॥ पंथानः ॥ इत्यादौ समासा-
तौ न ॥ ॥ इत्येकशेषः ॥ ॥ कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पंचवृत्तयः ॥ परार्थाभिधानं वृत्तिः ॥ वृत्त्यर्थावबो-
धकं वाक्यं विग्रहः ॥ स च द्विधा ॥ लौकिकोऽलौकिकश्चेति ॥ परिनिष्ठितत्वात्साधुर्लौकिकः ॥ प्रयोगानर्होऽसाधुरलौकिकः ॥ यथा
राज्ञः पुरुषः ॥ राजन् अस् पुरुष सु इति ॥ अविग्रहो नित्यसमासोऽस्वपदविग्रहो वा ॥ समासस्तु पंचधेति प्रायोवादः ॥ अव्ययी-
भावतत्पुरुषबहुव्रीहिद्वंद्वाधिकारबहिर्भूतानामपि सह सुपेत्यादिविधानात् ॥ पूर्वपदार्थप्रधानोऽव्ययीभावः ॥ उत्तरपदार्थ-
प्रधानस्तत्पुरुषः ॥ अन्यपदार्थप्रधानो बहुव्रीहिः ॥ उभयपदार्थप्रधानो द्वंद्व इत्यपि प्रायोवादः प्रायोऽभिप्रायः ॥ सूपप्रति-
उन्मत्तगंगमित्याद्यव्ययीभावे ॥ अतिमालादौ तत्पुरुषे ॥ द्वित्रा इत्यादि बहुव्रीहौ ॥ दंतोष्ठमित्यादौ द्वंद्वे चाभावात् ॥ तत्पुरुषवि- १५
शेषः कर्मधारयः ॥ तद्विशेषो द्विगुः ॥ अनेकपदत्वं द्वंद्वबहुव्रीह्योरेव ॥ तत्पुरुषस्य क्वचिदेवेत्युक्तं ॥ किं च सुपां सुपा तिङा ना-
म्ना धातुनाऽथ तिङां तिङा ॥ सुबंतेनेति विज्ञेयः समासः षड्विधो बुधैः ॥ १ ॥ सुपा ॥ राज्ञः पुरुषः ॥ तिङा ॥ पर्यभूषयत् ॥ अनु

क्वचिदेवेत्युक्तमात इत्यासे २

नाम्नेति प्रातिपदिकेनेत्यर्थः १ नञ्पूर्वे ऊरु ॥ नमिकंपीत्यादिना रप्रत्ययः १

॥सि०पू०॥ यवलत ॥ नाम्ना ॥ कुंभकारः ॥ धातुना ॥ कटप्रूः ॥ अजर्सं ॥ तिङंतिङा ॥ पिबतखादता ॥ सुपांसुपा ॥ कृतद्विचत्सर्णेतिप्रस्यांक्रि तिङं१ स०शे० व्ययः
यायांसाक्षीतविवक्षणा ॥ एहीडादयोन्यपदार्थे इति मयूरव्यंसकादिपाठात्समासः ॥ ॥ इति सर्वसमासशेषः ॥ ॥श्री॥
॥ ऋक्पूरब्धूःपथामानक्षे ॥ अ अनक्ष इति छेदः ॥ ऋगाद्यंतस्य समासस्य अप्रत्ययोंतादेशः स्यादक्षे या धूस्तदंतस्य न ॥ अर्धर्चः अ
न ४ ॥ बहूनावेप्येतर्येन ॥ नेह ॥ अन्क्ताम ॥ बहूक्त ऋक् ॥ विष्णोःपूः ॥ विष्णुपुरं ॥ क्लीबत्वं लोकात् ॥ विमलापं सरः ॥ द्व्यंतरुपसर्गेभ्यो
प ईत् ॥ अप इति कृतसमासांतस्यानुकरणं ॥ षष्ठ्यर्थे प्रथमा ॥ द्विभ्योप ईत्स्यात् ॥ द्विर्गता आपो अस्मिन्निति द्वीपं ॥ अंतरीपं ॥
प्रतीपं समीपं ॥ समापो देवयजनमित्यादौ समाः आपो स्मिन्निति बोध्यं ॥ कृतसमासांतग्रहणान्नेह ॥ स्वपः स्वपी ॥ अवर्णांता
द्भूत्ॐ ॥ प्रेपं ॥ परेपं ॥ प्रापं ॥ परापं ॥ ऊदनोर्देशे ॥ अनोः परस्याप ऊत्स्याद्देशे ॥ अनूपो देशः ॥ राजधुरा ॥ अक्षधूः ॥ दृढधूरक्षः ॥ सख्यपथो
देशः ॥ सखिपथः ॥ अवसमन्धेभ्यस्तमसः ॥ ॥ अप्रत्यक्षपूर्वात्सामलोम्नः ॥ इत्यप्प्रत्ययः ॥ ॥ ऽ ॥
सामं ॥ प्रतिलोमं ॥ अनुलोमं ॥ अवलोमं ॥ कृष्णोदक्पांडुसंख्यापूर्वाया भूमेर [illegible] ऊिष्यते ॥ कृष्णभूमः ॥ उदग्भूमः ॥ पांडुभू
मः ॥ द्विभूमः ॥ त्रिभूमः ॥ प्रासादः ॥ संख्यायानदीगोदावरीभ्यां च ॥ पंचनदं ॥ सप्तगोदावरं ॥ अजितियोगविभागाद [illegible]

पद्मनाभस्येति पद्मंनाभावस्येतिविग्रहः ॥ नाद्यादि... [illegible] ... पद्मकारानाभिरस्येति वा १ अक्षिक्ष्रुवमिति प्राण्यंगत्वादेकवद्भावः ५ गावः किरणाः अक्षशब्दोरंध्रवाची । षष्ठीसमासः १
... [illegible] ... ४ जयः स्त्रीलिंगनिति नि विग्रहः ... [illegible] ... ४ प्राण्यंगत्वादेकवद्भावः ६

न्नाभेः ॥ पद्मनाभः ॥ अक्ष्णोऽदर्शनात् ॥ अवक्षुः पर्यायादक्ष्णोमासांतः ॥ गवामक्षीव गवाक्षः ॥ अचतुरविचतुरसुचतुरस्त्रीपुं स्रुतनुर
धेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्या
युषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः ॥ एते पंचविंशतिरजंता निपात्यंते ॥ आद्यास्त्रयो बहुव्रीहयः ॥ अविद्यमा
नानि चत्वारि यस्य स अचतुरः ॥ विचतुरः ॥ सुचतुरः ॥ त्र्युपाभ्यां चतुरोऽजिष्यते ॥ त्रिचतुराः ॥ चतुर्णां समीपे उपचतुराः ॥ ततएका
दश द्वंद्वाः ॥ स्त्रीपुंसौ ॥ धेन्वनडुहौ ॥ ऋक्सामे ॥ वाङ्मनसे ॥ अक्षिणी च भ्रुवौ च ॥ अक्षिभ्रुवं ॥ दाराश्च गावश्च दारगवं ॥ ऊरू च अष्ठी
वंतौ च ऊर्वष्ठीवं ॥ निपातनाट्टिलोपः ॥ पदष्ठीवं ॥ निपातनात्सादेशाहृस्यपद्भावः ॥ नक्तं च दिवा च नक्तंदिवं ॥ रात्रौ च दिवा च रात्रिं
दिवं ॥ रात्रेर्मांतत्वं निपात्यते ॥ अहनि च दिवा च अहर्दिवं ॥ वीप्सायां द्वंद्वो निपात्यते ॥ अहन्यहनीत्यर्थः ॥ सरजसमिति साक ५
ल्येऽव्ययीभावः ॥ बहुव्रीहौ तु सरजः पंकजं ॥ निश्चितं श्रेयो निःश्रेयसं ॥ तत्पुरुषे इत्येव ॥ नेह ॥ निःश्रेयान्पुरुषः ॥ पुरुषस्यायुः पुरुषा
युषं ॥ ततो द्विगू ॥ ततो द्वंद्वः ॥ ऋग्यजुषं ॥ ततस्त्रयः कर्मधारयाः ॥ जातोक्षः ॥ महोक्षः ॥ वृद्धोक्षः ॥ शुनः समीपमुपशुनं ॥ टिलोपाभा
वः संप्रसारणं च निपात्यते ॥ गोष्ठे श्वा गोष्ठश्वः ॥ ब्रह्महस्तिभ्यां वर्चसः ॥ ब्रह्मवर्चसं ॥ हस्तिवर्चसं ॥ पल्यराजभ्यां चेति वक्तव्यं ॥ पल्य

द्व्यायुषं त्र्यायुषं २ निश्चितं श्रेयो यस्येति विग्रहः ... [illegible] ... ४ अव्ययीभावे चाकाले ४

॥ सि॰ कौ॰ ॥ राजक्ष्यां चेति वक्तव्यं ॥ पल्यवर्चसं ॥ राजवर्चसं ॥ अवसमंधेभ्यस्तमसः ॥ अवतमसं ॥ संतमसं ॥ अंधयतीत्यंधं ॥ पचाद्यच् ॥ अं स॰ प्रत॰
धं तमोंधतमसं ॥ श्वसो वसीयःश्रेयसः ॥ वसुशब्दः प्रशस्तवाची ॥ तत ईयसुनि वसीयः ॥ श्वस्शब्दः उत्तरपदार्थप्रशंसामाशी सं
॥ ८८ ॥ र्विषयतामाह ॥ मयूरव्यंसकादित्वात्समासः ॥ श्वोवसीयसं ॥ श्वःश्रेयसं भूयात् ॥ अन्ववतप्ताद्रहसः ॥ अनुरहसं ॥ अवरहसं ॥ तप्त
रहसं ॥ प्रतेरुरसः सप्तमीस्थात् ॥ उरसि प्रत्युरसं ॥ विभक्त्यर्थेऽव्ययीभावः ॥ अनुगवमायामे ॥ एतन्निपात्यते दीर्घत्वे ॥
अनुगवं यानं ॥ यस्य चायाम इति समासः ॥ द्विस्तावा त्रिस्तावा वेदिः ॥ अच्प्रत्ययः टिलोपः समासश्च निपात्यते ॥ यावती प्र
कृतौ वेदिस्ततो द्विगुणा त्रिगुणा वाश्वमेधादौ तत्रेदं निपातनं ॥ वेदिरिति किं ॥ द्विस्तावती त्रिस्तावती रज्जुः ॥ उपसर्गादध्वनः ॥
प्रगतोऽध्वानं प्राध्वो रथः ॥ न पूजनात् ॥ पूजनार्थात्परेभ्यः समासांता न स्युः ॥ सुराजा ॥ अतिराजा ॥ स्वतिभ्यामेव ॥ नेह ॥ पर
अति मराजः ॥ पूजनात्किं ॥ गामतिक्रांतोऽतिगवः ॥ बहुव्रीहौ सक्थ्यक्ष्णोरिति प्रागेवायं निषेधः ॥ नेह ॥ सुसक्थः ॥ स्वक्षः ॥ किमः ८९
क्षेपे ॥ क्षेपे यः किम्शब्दस्ततः परं यत्तदंतात्समासांता न स्युः ॥ कुत्सितो राजा किंराजा ॥ यो न रक्षति ॥ किंसखा ॥ किंगौः ॥ क्षे
पे किं ॥ किंराजः ॥ किंसखः ॥ किंगवः ॥ नञस्तत्पुरुषात् ॥ समासांतो न ॥ अराजा ॥ असखा ॥ तत्पुरुषात्किं ॥ अधुरं शकटं ॥ प

थो विभाषा ॥ नञ्पूर्वात्पथो वा समासांतः ॥ अपथं ॥ अपंथाः ॥ तत्पुरुषादित्येव ॥ नेह ॥ अपथो देशः ॥ अपथं वर्त्तते ॥ ॥ इति स
मासांताः प्रत्ययाः समाप्ताः ॥ ॥ अलुगुत्तरपदे ॥ अलुगधिकारः प्रागानङः ॥ उत्तरपदाधिकारस्त्वापादसमाप्तेः ॥ पंचम्याः स्तो
कादिभ्यः ॥ स्तोकादिभ्यः पंचम्या अलुक् स्यादुत्तरपदे ॥ स्तोकान्मुक्तः ॥ एवमंतिकार्थदूरार्थकृच्छ्रेभ्यः ॥ उत्तरपदे किं ॥ निष्क्रांतः स्तोकात् निःस्तो
कः ॥ ब्राह्मणाच्छंसिन उपसंख्यानं ॥ ब्राह्मणविहितानि शस्त्राणि उपचाराद्ब्राह्मणानि ॥ तानि शंसतीति ब्राह्मणाच्छंसी ॥ ऋत्वि
ग्विशेषः ॥ द्वितीयार्थे पंचम्युपसंख्यानादेव ॥ ओजःसहोंभस्तमसस्तृतीयायाः ॥ ओजसा कृतमित्यादि ॥ अंजस उपसंख्या
नं ॥ अंजसा कृतं ॥ आर्जवेन कृतमित्यर्थः ॥ पुंसानुजो जनुषांध इति च निपात्यते ॥ यस्याग्रजः पुमान्स पुंसानुजः ॥ जनुषांधो
जात्यंध इत्यर्थः ॥ मनसः संज्ञायां ॥ मनसागुप्ता ॥ आज्ञायिनि च ॥ मनसा इत्येव ॥ मनसाज्ञातुं शीलमस्य मनसाज्ञा
यी ॥ आत्मनश्च ॥ आत्मनस्तृतीयाया अलुक्स्यात् ॥ पूरण इति वक्तव्यं ॥ पूरणप्रत्ययांते उत्तरपदे इत्यर्थः ॥ आत्मनापंचमः ॥
जनार्दनस्त्वात्मचतुर्थ एवेति तु बहुव्रीहिर्बोध्यः ॥ पूरणे किं ॥ आत्मकृतं ॥ वैयाकरणाख्यायां चतुर्थ्याः ॥ आत्मन इत्येव ॥ आ
त्मनेपदं ॥ आत्मनेभाषाः ॥ तादर्थ्ये चतुर्थ्येषा ॥ चतुर्थी इति योगविभागात्समासः ॥

॥सि॰कौ॰॥ ॥ ९६ ॥

अलु॰स॰

परस्मैपदं॥ परस्मैभाषा॥ हलदंतात्सप्तम्याः संज्ञायां॥ हलंतादंताच्च सप्तम्या अलुक्स्यात्संज्ञायां॥ त्वचिसारो वेणुः॥ गवियुधि
भ्यां स्थिरः॥ आभ्यां स्थिरस्य सस्य षः स्यात्॥ गविष्ठिरः॥ अत्र गवीति वनादेवालुक्॥ युधिष्ठिरः॥ अरण्येतिलकाः॥ अचसंज्ञायामिति स
मासः॥ हृद्द्युभ्यां च॥ हृदिस्पृक्॥ दिविस्पृक्॥ कारनाम्नि च प्राचां हलादौ॥ प्राचां देशे यत्कारनाम तत्र हलादावुत्तरपदे हलदंतात्सप्तम्या
अलुक्स्यात्॥ मुकुटेकार्षापणं॥ दृषदिमाषकः॥ पूर्वेण सिद्धे नियमार्थं॥ कारनाम्न्येव॥ प्राचामेव॥ हलादावेव॥ कारनाम्नीति किं॥ अभ्याहि
तपशुः॥ कारादन्यस्यैतद्देयस्य नाम॥ प्राचां किं॥ यूथपशुः॥ अविकटोरणः॥ हलदंतात्किं॥ नद्यां दोहः॥ नदीदोहः॥ मध्याद्गुरौ॥ मध्येगुरुः॥ अं
ताच्च॥ अंतेगुरुः॥ अमूर्धमस्तकात्स्वांगादकामे॥ कंठेकालः॥ उरसिलोमा॥ अमूर्धमस्तकात्किं॥ मूर्धशिखः॥ मस्तकशिखः॥ अका
मे किं॥ मुखे कामोऽस्य मुखकामः॥ बंधे च विभाषा॥ हलदंतात्सप्तम्या अलुक्॥ हस्तेबंधः॥ हस्तबंधः॥ हलदंतात्किं॥ गुप्तिबंधः॥ त
त्पुरुषे कृति बहुलं॥ स्तंबेरमः॥ कर्णेजपः॥ क्वचिन्न॥ कुरुचरः॥ प्रावृट्शरत्कालदिवां जे॥ प्रावृषिजः॥ शरदिजः॥ कालेजः॥ दिविजः॥ पूर्वस्य प्र ॥ ९६ ॥
पंचः॥ विभाषा वर्षक्षरशरवरात्॥ एभ्यः सप्तम्या अलुक् जे॥ वर्षेजः॥ वर्षजः॥ क्षरेजः॥ क्षरजः॥ शरेजः॥ शरजः॥ वरेजः॥ वरजः॥ घकाल
तनेषु कालनाम्नः॥ सप्तम्या विभाषा अलुक्स्यात्॥ घ॥ पूर्वाह्णेतरे॥ पूर्वाह्णतमे॥ पूर्वाह्णतरे॥ पूर्वाह्णतमे॥ काले॥ पूर्वाह्णेकाले॥
॥

कृतिबहुलं॰

स

पूर्वाह्णकाले॥ तने॥ पूर्वाह्णेतने॥ शयवासवासिष्वकालात्॥ खेशयः॥ खशयः॥ ग्रामेवासः॥ ग्रामवासः॥ ग्रामेवासी॥ ग्रामवासी॥ अकाले
किं॥ पूर्वाह्णशयः॥ अप्सुयोनियन्मतुषु॥ अप्सुयोनिः॥ तिर्यस्य अप्सुयोनिः॥ अप्सव्यः॥ अप्सुमंतावाज्यभागौ॥ नेन्सि
द्धबध्नातिषु च॥ इन्नंतादिषु सप्तम्या अलुक् न॥ स्थंडिलशायी॥ सांकाश्यसिद्धः॥ चक्रबंधः॥ स्थे च भाषायां॥ सप्तम्या अलु
क् न॥ समस्थः॥ भाषायां किं॥ कृष्णोऽस्याखरेष्ठः॥ षष्ठ्या आक्रोशे॥ चौरस्य कुलं॥ आक्रोशे किं॥ ब्राह्मणकुलं॥ वाग्दिक्पश्यद्भ्यो यु
क्तिदंडहरेषु॥ वाचोयुक्तिः॥ दिशोदंडः॥ पश्यतोहरः॥ आमुष्यायण आमुष्यपुत्रिकामुष्यकुलिकेति च॥ अमुष्यापत्यमामुष्याय
णः॥ नडादित्वात्फक्॥ अमुष्य पुत्रस्य भावः॥ आमुष्यपुत्रिका॥ मनोज्ञादित्वाद्वुञ्॥ आमुष्यकुलिका॥ देवानांप्रिय इति च मूर्खे॥ अ
न्यत्र देवप्रियः॥ शेपपुच्छलांगूलेषु शुनः॥ शुनःशेपः॥ शुनःपुच्छः॥ शुनोलांगूलः॥ दिवश्च दासे॥ दिवोदासः॥ पुत्रेऽन्यतरस्यां॥ षष्ठ्याः
पुत्रे परे लुग्वा निंदायां॥ दास्याःपुत्रः॥ दासीपुत्रः॥ निंदायां किं॥ ब्राह्मणीपुत्रः॥ ऋतो विद्यायोनिसंबंधेभ्यः॥ विद्यासंबंधयोनिसंबंध
वाचिन ऋदंतात् षष्ठ्या अलुक्स्यात्॥ होतुरंतेवासी॥ होतुःपुत्रः॥ पितुरंतेवासी॥ पितुःपुत्रः॥ विद्यायोनिसंबंधेभ्यः तत्पूर्वोत्तरप
दग्रहणं॥ नेह॥ होतृधनं॥ पितृगृहं॥ विभाषा स्वसृपत्योः॥ ऋदंतात्षष्ठ्या अलुग्वा स्वसृपत्योः परयोः॥ मातुःपितुर्भ्यामन्यतर

स्यां ॥ आभ्यां स्वसुः सस्य षो वा स्यात्समासे ॥ मातुःष्वसा ॥ मातुःस्वसा ॥ पितुःष्वसा ॥ पितुःस्वसा ॥ लुक्पक्षे तु ॥ मातृपितृभ्यां स्व अलु॰ स॰
॥ सि॰ कृ॰ ॥ सा ॥ आभ्यां स्वसुः सस्य षः स्यात्समासे ॥ मातृष्वसा ॥ पितृष्वसा ॥ असमासे तु ॥ मातुःस्वसा ॥ पितुःस्वसा ॥ ॥ इत्यलुक्समासः ॥
घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्योनेकाचो ह्रस्वः ॥ भाषितपुंस्काद्यो ङीस्तदन्तस्यानेकाचो ह्रस्वः स्यात् घरूपकल्पप्रत्ययेषु
॥ २१ ॥ परेषु चेलडादिषु चोत्तरपदेषु ॥ ब्राह्मणितरा ॥ ब्राह्मणितमा ॥ ब्राह्मणिरूपा ॥ ब्राह्मणिकल्पा ॥ ब्राह्मणिचेली ॥ ब्राह्मणिब्रुवा ॥ ब्रा
ह्मणिगोत्रेत्यादि ॥ ब्रुवः पचाद्यच् विव च्यादेशो गुणयोरभावो निपात्यते ॥ चेलडादीनि कुत्सितविषये कुत्सितवाचीनि ॥ तैः कुत्सितानि समासविषये १
कुत्सनैरिति समासः ॥ घ्यः किं ॥ दत्तातरा ॥ भाषितपुंस्कात्किं ॥ आमलकीतरा ॥ कुवलीतरा ॥ नद्याः शेषस्यान्यतरस्यां ॥ अङ्यन्त
द्याङ्यन्तैकाचश्च घादिषु ह्रस्वो वा स्यात् ॥ ब्रह्मबंधूतरा ॥ ब्रह्मबंधुतरा ॥ स्त्रीतरा ॥ स्त्रितरा ॥ लक्ष्मीतरा ॥ लक्ष्मितरा ॥ उगितश्च ॥ उ
गितः परा या नदी तदन्तस्य घादिषु ह्रस्वो वा स्यात् ॥ विदुषितरा ॥ ह्रस्वाभावपक्षे तसिलादिष्विति पुंवत् ॥ विद्वत्तरा ॥ इत्यादिषु तु वि ॥ २० ॥
टी दुतरेत्यप्युदाहृतं तन्निर्मूलं ॥ हृदयस्य हृल्लेखयदण्लासेषु ॥ हृदयं ॥ लिखतीति हृल्लेखः ॥ हृदयस्य प्रियं हृद्यं ॥ हृदयस्येदं हार्दं ॥ हृ
ल्लासः ॥ लेखेत्यणंतस्य ग्रहणं ॥ घञि तु हृदयलेखः ॥ लेखग्रहणमेव ज्ञापकं ॥ उत्तरपदाधिकारे तदंतविधिर्नास्तीति ॥ तत्रोक

सूत्रे अण्ग्रहणेनैव सिद्धे पुनः लेखग्रहणं तदेव ज्ञापकं ॥ १

ष्यञ्रोगेषु ॥ हृच्छोकः ॥ हृदयशोकः ॥ सौहार्द्यं ॥ सौहृदय्यं ॥ हृद्रोगः ॥ हृदयरोगः ॥ हृदयपर्यायो हृच्छब्दोप्यस्ति तेन सिद्धे प्रपंचार्थमिदं ॥
पादस्य पदाज्यातिगोपहतेषु ॥ एषूत्तरपदेषु पादस्य पद इत्यादेशः स्यात् ॥ पादाभ्यामजतीति पदाजिः ॥ पादाभ्यामततीति पदा
तिः ॥ अज्यतिभ्यां पादे चेति इण्प्रत्ययः ॥ अजेर्व्यभावो निपातनात् ॥ पदगः ॥ पदोपहतः ॥ पद्यत्यतदर्थे ॥ पादस्य पत्स्यादतदर्थे यति परे ॥
पादौ विध्यंतीति पद्याः शर्कराः ॥ अतदर्थे किं ॥ पादार्थमुदकं पाद्यं ॥ इके चरतावुपसंख्यानं ॥ पादाभ्यां चरतीति पदिकः ॥ पर्यादित्वा समासे ४
ट्ठन् ॥ हिमकाषिहतिषु च ॥ पद्धिमं ॥ पत्काषी ॥ पद्धतिः ॥ ऋचः शे ॥ ऋचः पादस्य पत्स्याच्छे परे ॥ गायत्रीं पच्छः शंसति ॥ पादंपादमित्य
र्थः ॥ ऋचः किं ॥ पादशः कार्षापणं ददाति ॥ वा घोषमिश्रशब्देषु ॥ पादस्य पत् ॥ पद्घोषः ॥ पादघोषः ॥ पन्मिश्रः ॥ पादमिश्रः ॥ पच्छब्दः ॥
पादशब्दः ॥ निष्के चेति वक्तव्यं ॥ पन्निष्कः ॥ पादनिष्कः ॥ उदकस्योदः संज्ञायां ॥ उदमेघः ॥ उत्तरपदस्येति वक्तव्यं ॥ क्षीरोदः ॥ पेषंवास
वाहनधिषु च ॥ उदपेषं पिनष्टि ॥ उदवासः ॥ उदवाहनः ॥ उदधिर्घटः ॥ समुद्रे तु पूर्वेण सिद्धं ॥ एकहलादौ पूरयितव्येऽन्यतरस्यां ॥
उदकुंभः ॥ उदककुंभः ॥ एकेति किं ॥ उदकस्थाली ॥ पूरयितव्येति किं ॥ उदकपर्वतः ॥ मंथौदनसक्तुबिंदुवज्रभारहारवीवधगा
हेषु च ॥ उदमंथः ॥ उदकमंथः ॥ उदौदनः ॥ उदकौदनः ॥ इत्यादि ॥ इको ह्रस्वोऽङ्यो गालवस्य ॥ इगंतस्याङ्यंतस्य ह्रस्वो वा स्यादुत्तर

दुत्तरपदे॥ग्रामणिपुत्रः॥ग्रामणीपुत्रः॥इकः किं॥रमापतिः॥अच्युतइतिकिं॥गौरीपतिः॥मालवग्रहणं॥प्रकार्थं॥अन्यतरस्यामित्यु स॰श्रय॰
॥सि॰कृ॰॥ दुहृतेः॥इयङुवङ्भाविनामव्ययानां चनेतिवाच्यं॥श्रीमदः॥भ्रूभंगः॥शुकुंसाव॥आक्कुंसार्दः॥नामितिवक्तव्यं॥भ्रुकुंसः॥भ्रकुं
सः॥भ्रुकुटिः॥भ्रकुटिः॥अकारोऽनेनविधीयत इतिव्याख्यातारः॥भ्रकुंसः॥भ्रकुटिः॥भ्रुवःकुंसोसाधपणंशोसावायस्यसःस्त्री
॥३९॥ वेषधारीनर्तकः॥भ्रुकुटिः॥कौटिल्यं॥एकतद्धितेच॥एकशाह्रस्वःस्यात्तद्धितेउत्तरपदेच॥अकस्यआगतंएकरूप्यं॥
एकक्षीरं॥ङ्यापोः संज्ञाछंदसोर्बहुलं॥रेवतिपुत्रः॥अजक्षीरं॥त्वेच॥त्वप्रत्ययेपरेङ्यापोर्ह्रस्वः॥अजत्वं॥रोहिणित्वं॥ष्यङः
संप्रसारणंपुत्रपत्योस्तत्पुरुषे॥ष्यङंतस्यपूर्वपदस्यसंप्रसारणंस्यात्पुत्रपत्योरुत्तरपदयोस्तत्पुरुषे॥संप्रसारणस्य॥संप्रसा
रणस्यदीर्घःस्यादुत्तरपदे॥कौमुदगंध्यायाःपुत्रः॥कौमुदगंधीपुत्रः॥कौमुदगंधीपतिः॥व्यवस्थितविभाषयाह्रस्वोन॥स्त्रीप्र रकोकस्यो...
त्ययेचानुपसर्जनेतितदादिनियमप्रतिषेधात्॥परमकारीषगंधीपुत्रः॥उपसर्जनेतितदादिनियमान्नेह॥अतिकारीषगंध्या ॰२१...
पुत्रः॥बंधुनिबहुव्रीहौ॥बंधुशब्देउत्तरपदेष्यङःसंप्रसारणंस्याद्बहुव्रीहौ॥कारीषगंध्याबंधुरस्येतिकारीषगंधीबंधुः॥बहु
व्रीहौकिं॥कारीषगंध्यायाः बंधुः कारीषगंध्याबंधुः॥क्लीबनिर्देशात्तच्छब्दस्वरूपापेक्षया॥मातृच्मातृकमातृषु वा॥

बंधुनीतिशब्दरूपमात्रग्रहणार्थंक्लीबत्वमित्यर्थः

कारीषगंधीमातः॥कारीषगंध्यामातः॥कारीषगंधीमातृकः॥कारीषगंध्यामातृकः॥कारीषगंधीमाता॥कारीषगंध्या
माता॥अस्मादेवनिपातनान्मातृशब्दस्यमातजादेशःकश्चित्कल्प्यते॥बहुव्रीहावेवेदं॥कारीषगंध्यायामाता कारीषगंध्यामा
ता॥नित्यसामर्थ्यान्नित्यत्वाद्बहुव्रीहिस्वरंबाधते॥इष्टकेषीकामालानांचिततूलभारिषु॥इष्टकादीनांतदंतादीनांचपूर्वप
दानांचितादिषुक्रमादुत्तरपदेषुह्रस्वःस्यात्॥इष्टकचितं॥पक्वेष्टकचितं॥इषीकतूलं॥मुंजेषीकतूलं॥मालभारी॥उत्पल
मालभारी॥कारेसत्यागदस्य॥मुम्स्यात्॥सत्यंकारः॥अगदंकारः॥अस्तोश्चेतिवक्तव्यं॥अस्तंकारः॥धेनोर्भव्यायां॥धेनुंभ
व्या॥लोकस्यपृणे॥लोकंपृणः॥पृणइतिमूलविभुजादित्वात्कः॥इत्सेनभ्याशस्य॥अनभ्याशमित्यः॥दूरतःपरिहर्तव्यइत्य
र्थः॥भ्राष्ट्राग्न्योरिंधे॥भ्राष्ट्रमिंधः॥अग्निमिंधः॥गिलेऽगिलस्य॥तिमिंगिलः॥अगिलस्यकिं॥गिलगिलः॥गिलगिलेचेति
तिमिंगिलगिलः॥उष्णभद्रयोःकरणे॥उष्णंकरणं॥भद्रंकरणं॥रात्रेःकृतिविभाषा॥रात्रिंचरः॥रात्रिचरः॥रात्रिमटः॥रात्र्यटः॥अ
खिद्र्यर्थमिदंसूत्रं॥खितितु अरुर्द्विषदितिनित्यमेववक्ष्यते॥रात्रिंमन्यः॥सहस्यसःसंज्ञायां॥उत्तरपदे॥सपलाशं॥सं
ज्ञायांकिं॥सहयुध्वा॥ग्रंथांतेधिकेच॥अनयोर्यथोःसहस्यसःस्यादुत्तरपदे॥समुहूर्तंज्योतिषमधीते॥सद्रोणाखारी॥

द्वितीयेचानुपाख्ये॥ अनुमेये द्वितीये सहस्य सः स्यात्॥ सराक्षसीकानिशा॥ राक्षसी साक्षाद्दनुपलभ्यमाना निशायामनुमीयते समा॰प्र॰
॥सि॰पू॰॥ समानस्य छंदस्यमूर्धप्रभृत्युदर्केषु॥ समानस्य सः स्यादुत्तरपदे न तु मूर्धादिषु॥ अनुभ्राता सगर्भ्यः॥ अनुसख्या सयूथ्यः॥
॥२२॥ योनः सनुत्यः॥ तत्र भव इत्यर्थे॥ सगर्भसयूथसनुताद्यत्॥ अमूर्धादिषु किं॥ समानमूर्धा॥ समानप्रभृतयः॥ समानोदर्काः॥ स
मानस्येति योगो विभज्यते॥ तेन सपक्षः साधर्म्यं सजातीय इत्यादि सिद्धमिति काशिका॥ अथवा सहशब्दः सदृशवचनोऽस्ति॥
सदृशः सख्या ससखीति यथा॥ तेनान्यपदविग्रहो बहुव्रीहिः॥ समानः पक्षोऽस्येत्यादि॥ ज्योतिर्जनपदरात्रिनाभिनाम
गोत्ररूपस्थानवर्णवयोवचनबंधुषु॥ एतेषु द्वादशसूत्तरपदेषु समानस्य सः स्यात्॥ सज्योतिः॥ सजनपद इत्यादि॥ चरणे
ब्रह्मचारिणि॥ ब्रह्मचारिण्युत्तरपदे समानस्य सः स्याच्चरणे समानत्वेन गम्यमाने॥ चरणः शाखा॥ ब्रह्म वेदः॥ तदध्ययना ॥२२॥
र्थं व्रतमपि ब्रह्म॥ तच्चरतीति ब्रह्मचारी॥ सब्रह्मचारी॥ तीर्थे ये॥ तीर्थे उत्तरपदे यादौ प्रत्यये विवक्षिते समानस्य सः स्यात्॥ स
तीर्थ्याः एकगुरवः॥ समानतीर्थे वासीति यत्प्रत्ययः॥ विभाषोदरे॥ यादौ प्रत्यये विवक्षित इत्येव॥ सोदर्यः॥ समानोदर्यः॥ दृग्
दृशवतुषु॥ समान [illegible] स्य सः स्यात्॥ सदृक्॥ सदृशः॥ दृक्षे चेति वक्तव्यं॥ सदृक्षः॥ वतुरुत्तरार्थः॥ इदंकिमोरीश्की॥

७

दृग्दृशवतुषु इदम ईश् किमः कीश् स्यात्॥ ईदृक्॥ ईदृशः॥ कीदृक्॥ कीदृक्॥ वतुरुदाहरणं वक्ष्यते॥ दृक्षे च॥ दृक्षशब्दे परे इदम ई
श्किमः कीश् स्यात्॥ ईदृक्षः॥ कीदृक्षः॥ आ सर्वनाम्नः॥ सर्वनाम्न आकारोऽन्तादेशः स्याद्दृग्दृशवतुषु॥ दृक्षे च॥ तादृक्॥ तादृशः॥
तावान्॥ तादृक्षः॥ दीर्घः मत्वेऽत्वे॥ अमूदृक्॥ अमूदृशः॥ अमूदृक्षः॥ समासेंगुलेः संगः॥ अंगुलिशब्दात्संगस्य सस्य मूर्धन्यः समा
से॥ अंगुलिषंगः॥ समासे किं॥ अंगुलेः संगः॥ भीरोः स्थानं॥ भीरुशब्दात्स्थानस्य सस्य मूर्धन्यः समासे॥ भीरुष्ठानं॥ असमासे तु
भीरोः स्थानं॥ ज्योतिरायुषः स्तोमः॥ आभ्यां स्तोमस्य सस्य मूर्धन्यः स्यात्समासे॥ ज्योतिष्टोमः॥ आयुष्टोमः॥ समासे किं॥ ज्योतिषः स्तो
मः॥ सुषामादिषु च॥ सस्य मूर्धन्यः स्यात्॥ शोभनं साम यस्य सुषामा॥ सुषंधिः॥ एति संज्ञायामगात्॥ सस्य मूर्धन्यः स्यात्॥ ह
रिषेणः॥ एतीति किं॥ हरिसक्थं॥ संज्ञायां किं॥ पटुसेनः॥ अगकारात् किं॥ विष्वक्सेनः॥ इण्कोरित्येव॥ सर्वसेनः॥ नक्षत्राद्वा॥ एति सं
ज्ञायामगकारान्मूर्धन्यो वा स्यात्॥ रोहिणीषेणः॥ रोहिणीसेनः॥ अगकारात् किं॥ शतभिषक्सेनः॥ [illegible]॥ आकृतिगणो
यं॥ अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु॥ अन्यशब्दस्य दुगागमः स्यादाशिरादिषु
परेषु॥ अन्यदाशीः॥ अन्यदाशा॥ अन्यदास्था॥ अन्यदास्थितः॥ अन्यदुत्सुकः॥ अन्यदूतिः॥ अन्यद्रागः॥ अषष्ठीत्यादि किं॥ अन्य

॥ सि॰ कौ॰ ॥ स्यान्येन वा आशीरन्याशीः ॥ कारके छे च नायं निषेधः ॥ अन्यस्य कारकोन्यत्कारकः ॥ अन्यस्यायमन्यदीयः ॥ गहादेराकृतिगण स॰ प्र॰
त्वाच्छः ॥ अर्थे विभाषा ॥ अन्यदर्थः ॥ अन्यार्थः ॥ कोः कत्तत्पुरुषेचि ॥ अजादावुत्तरपदे ॥ कुत्सितोऽश्वः कदश्वः ॥ कदन्नं ॥ तत्पुरुषे किं ॥
॥ ९३ ॥ कूष्ट्रो राजा ॥ त्रौ च ॥ कुत्सितास्त्रयः कत्त्रयः ॥ रथवदयोश्च ॥ कद्रथः ॥ कद्वदः ॥ तृणे च जातौ ॥ कत्तृणं ॥ का पथ्यक्षयोः ॥ कापथं ॥ काक्षः ॥ अ
क्षशब्देन तत्पुरुषः ॥ अक्षशब्देन बहुव्रीहिर्वा ॥ ईषदर्थे ॥ ईषज्जलं काजलं ॥ अजादावपि परत्वात्कादेशः ॥ काम्लः ॥ विभाषा पुरुषे ॥
कापुरुषः कुपुरुषः ॥ अप्राप्तविभाषेयं ॥ ईषदर्थे हि पूर्वविप्रतिषेधान्नित्यमेव ॥ कवं चोष्णे ॥ उष्णशब्द उत्तरपदे कवं का च वा ॥ क
वोष्णं ॥ कोष्णं ॥ कदुष्णं ॥ पृषोदरादीनि यथोपदिष्टं ॥ पृषोदरप्रकाराणि शिष्टैर्यथोच्चारितानि तथैव साधूनि ॥ पृषतः उदरं पृषोदरं ॥
वारिवाहकः बलाहकः ॥ उत्तरपदस्य च लत्वं ॥ पूर्वपदस्य बः ॥ भवेद्वर्णागमाद्धंसः सिंहो वर्णविपर्ययात् ॥ गूढोत्मा वर्णविकृतेर्व
र्णनाशात्पृषोदरं ॥ दिक्शब्देभ्यस्तीरस्य तारभावो वा ॥ दक्षिणतारं ॥ दक्षिणतीरं ॥ उत्तरतारं ॥ उत्तरतीरं ॥ दुरो दाशनाशदभध्ये ॥ ९३ ॥
षूत्तरपदादेः ष्टुत्वं च ॥ दुःखेन दाश्यते दूडाशः ॥ दुःखेन नाश्यते दूणाशः ॥ दुःखेन दभ्यते दूडभः ॥ खलक्षिप्यः ॥ ईषन्नलोपो निपा
त्वमुच्यते ॥ दुःखं ध्यायतीति दूढ्यः ॥ ओतश्चोपसर्गेक ॥ ब्रुवंतोस्यां सीदंतीति वृसी ॥ ब्रुवदुश्शब्दस्य वृ आदेशः ॥ सदेरधिकरणे डः ॥

आकृतिगणोयं ॥ संहितायां ॥ अधिकारोयं ॥ कर्णे लक्षणस्याविष्टाष्टपंचमणिभिन्नछिन्नछिद्रस्रुवस्वस्तिकस्य ॥ कर्णशब्दे परे
लक्षणवाचकस्य दीर्घः ॥ द्विगुणाकर्णः ॥ लक्षणस्य किं ॥ शोभनकर्णः ॥ अविष्टादीनां किं ॥ विष्टकर्णः ॥ अष्टकर्णः ॥ पंचकर्णः ॥ मणिकर्णः ॥
भिन्नकर्णः ॥ छिन्नकर्णः ॥ छिद्रकर्णः ॥ स्रुवकर्णः ॥ स्वस्तिककर्णः ॥ नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ॥ क्विबंतेषु पूर्वपदस्य दीर्घः
स्यात् ॥ उपानत् ॥ नीवृत् ॥ प्रावृट् ॥ मर्माविध् ॥ नीरुक् ॥ ऋतीषट् ॥ परीतत् ॥ क्वाविति किं ॥ परिणहनं ॥ विभाषा पुरुषे इत्यतो मं
डूकप्लुत्या विभाषानुवर्तते ॥ सा च व्यवस्थिता ॥ तेन गतिकारकयोरेव ॥ नेह ॥ पटुरुक् ॥ तिग्मरुक् ॥ वनगिर्योः संज्ञायां कोटरकिं
शुलुकादीनां ॥ कोटरादीनां वने परे किंशुलुकादीनां गिरौ परे दीर्घः स्यात्संज्ञायां ॥ वनं पुरगामिश्रकासिध्रकासारिकाकोटरा
ग्रेभ्यः ॥ वनशब्दस्योत्तरपदस्य एभ्य एव णत्वं न त्वन्येभ्यः ॥ इह कोटरांताः पंच दीर्घविधौ कोटरादयो बोध्याः ॥ तेषां कृतदीर्घाणां
णत्वविधौ निर्देशान्निपातनार्थं ॥ अग्रेशब्दस्य तु विध्यर्थं ॥ पुरगावणं ॥ मिश्रकावणं ॥ सिध्रकावणं ॥ सारिकावणं ॥ कोटरा
वणं ॥ एभ्य एवेति किं ॥ असिपत्रवनं ॥ वनस्याग्रे अग्रेवणं ॥ राजदंतादिषु निपातनात्सप्तम्या अलुक् ॥ प्रातिपदिकार्यमाने
प्यग्रमा ॥ किंशुलुकागिरिः ॥ नलि ॥ नलप्रत्यये परे दीर्घः स्यात्संज्ञायां ॥ कृषीवलः ॥ मतौ बह्वचोऽनजिरादीनां ॥ अमरावती ॥

अनजिरादीनां किं। अजिरवती। बह्वचः किं। व्रीहिमती। संज्ञायामित्येव। नेह। वलयवती। शरादीनां च। शरावती। इको वहे॰ स॰ श्रय॰
॥सि॰ भू॰॥ पीलोः। इगंतस्य दीर्घः स्याद्वहे। ऋषीवहं। कपीवहं। इकः किं। पिंडवहं। अपीलोः किं। पीलुवहं। अपील्वादीनामिति वक्तव्यं। दारुव
हं। उपसर्गस्य घञ्यमनुष्ये बहुलं। उपसर्गस्य बहुलं दीर्घः स्यात् घञंते परे न तु मनुष्ये। परीपाकः। परिपाकः। अमनुष्ये किं।
॥९४॥ निषादः। इकः काशे। इगंतस्योपसर्गस्य दीर्घः स्यात्काशे। नीकाशः। नीकाशः। इकः किं। प्रकाशः। अष्टनः संज्ञायां। उत्तरपदे दी
र्घः स्यात्। अष्टापदं। संज्ञायां किं। अष्टपुत्रः। चितेः कपि। एकचितीकः। द्विचितीकः। नरे संज्ञायां। विश्वानरः। मित्रे चर्षौ। विश्वा
मित्रः। संज्ञायां किं। विश्वमित्रो माणवकः। शुनो दंतदंष्ट्राकर्णकुंदवराहपुच्छपदेषु दीर्घो वाच्यः। श्वादंत इत्यादि। प्रनिरंतःशरेक्षु
प्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि। एभ्यो वनस्य णत्वं स्यात्। प्रवणं। कार्ष्यवणं। इह पात्ससत्वाण्णत्वं। विभा
षौषधिवनस्पतिभ्यः। वनस्य णः स्यात्। दूर्वावणं। दूर्वावनं। शिरीषवणं। शिरीषवनं। द्व्यक्षरत्र्यक्षरेभ्य एव। नेह। देवदारुवनं। इ
रिकादिभ्यः प्रतिषेधो वक्तव्यः। इरिकावनं। मिरिकावनं। वाहनमाहितात्। आरोप्यं यदुह्यते तत् तद्वाचिनः पूर्वपदस्थान्निमित्तात्परस्य वाहन ॥९४॥
नकारस्य णत्वं स्यात्। इक्षुवाहणं। आहितात्किं। इंद्रवाहनं। इंद्रस्वामिकं वाहनमित्यर्थः। वहेर्ल्युटि वृद्धिरिहैव सूत्रे निपातनात्॥

पानं देशे। पूर्वपदस्थान्निमित्तात्परस्य पानस्य णत्वं स्याद्देशेऽभिधेये। क्षीरं पानं येषां ते क्षीरपाणा उशीनराः। सुरापाणाः प्राच्याः।
पीयत इति पानं। कर्मणि ल्युट्। भावकरणयोः। पानस्येत्येव। क्षीरपाणं। क्षीरपानं। गिरिनद्यादीनां वा। गिरिनदी। गिरिण
दी। चक्रणितंबा। चक्रनितंबा। प्रातिपदिकांतनुम्विभक्तिषु च। पूर्वपदस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य णो वा स्यात्। प्राति
पदिकांते। माषवापिणौ। नुमि। व्रीहिवापाणि। विभक्तौ। माषवापेण। पक्षे माषवापिनौ इत्यादि। उत्तरपदं यत्प्रातिपदिकं तदंत
स्यैव णत्वं। नेह। गर्गाणां भगिनी गर्गभगिनी। अत एव नुम्ग्रहणं कृतं। अंगस्य नुम्विधानात्तद्ग्रहणे हि नुम्न उत्तरपदस्य। भाग॰
किंच। प्रहिण्वन्नित्यादौ हिनोतेर्नुमो णत्वार्थमपि नुम्ग्रहणं। प्रेन्वनमित्यादौ तु क्षुभ्नादित्वान्न। युवादेर्न। रम्ययुना। एका
जुत्तरपदे णः। नित्यमित्यर्थः। वृत्रहणौ। हरिं मान्यतीति हरिमाणी। नुमि। क्षीरपाणि। विभक्तौ। क्षीरपेण। रम्मीविणा
कुमति च। कवर्गवत्युत्तरपदे प्राग्वत्। हरिकामिणौ। हरिकामाणि। हरिकामेण। पदव्यवायेऽपि। पदेन व्यवधानेऽपि णत्वं न स्या
त्। माषकुंभवापेन। चतुरंगयोगेन। अतद्धित इति वाच्यं। आर्द्रगोमयेण। शुष्कगोमयेण। कुस्तुंबुरूणि जातिः। अत्र सुट्
निपात्यते। कुस्तुंबुरु धान्यकं। क्लीबत्वमतंत्रं। जातिः किं। कुतुंबुरूणि। कुत्सितानि तिंदुकीफलानीत्यर्थः। अपस्करा॰कि

यासातत्ये॥ अपरस्पराः सार्थंगच्छंति॥ संततमविच्छेदेनगच्छंतीत्यर्थः॥ क्रियेतिकिं॥ अपरपरागच्छंति॥ अपरेनपरेचसह॥ स॰आ॰
॥सि॰पू॰॥ देवगच्छंति॥ गोष्पदंसेवितासेवितप्रमाणेषु॥ सुट्सस्यषत्वंचनिपात्यते॥ गावः पद्यंतेस्मिन्देशेसगोष्पदः सेवितोगोष्पदः॥
असेविते॥ अगोष्पदान्यरण्यानि॥ प्रमाणे॥ गोष्पदमात्रंक्षेत्रं॥ सेवितेतिकिं॥ गोःपदंगोपदं॥ आस्पदंप्रतिष्ठायां॥ आत्मया
॥९५॥ यापनस्थानेसुट्निपात्यते॥ प्रतिष्ठेतिकिं॥ आपदापदं॥ आश्चर्यमनित्ये॥ अद्भुतेसुट्॥ आश्चर्यंयदिसभुंजीत॥ अनित्येतिकिं॥ आ
चर्यंकर्मशोभनं॥ वर्चस्केऽवस्करः॥ कुत्सितंवर्चोवर्चस्कमन्नमलं॥ तस्मिन्सुट्॥ अवकीर्यतइत्यवस्करः॥ वर्चस्केतिकिं॥ अ
४शकुनिर्वि वाकरः॥ अपस्करोरथांगं॥ अपकरोन्यः॥ विष्किरःशकुनौवा॥ पक्षेविकिरः॥ वाववनेनैवसुट्विकल्पेसिद्धेविकिरग्रहणंतस्या
कारोवाचः पिशकुनेरन्यत्रप्रयोगोमाभूत्॥ इतिवृत्तिः॥ तन्न॥ भाष्यविरोधात्॥ प्रतिष्कशश्चकशेः॥ कशगतिशासनयोरित्यस्यप्रतिपू .९५.
र्वस्यपचाद्यचिसुट्निपात्यतेषत्वंच॥ सहायःपुरोयायीवाप्रतिष्कशइत्युच्यते॥ कशेःकिं॥ प्रतिगतःकशांप्रतिकशोश्वः॥ मघ
पिकशेरेवकशातत्यापिकशेरितिधातोर्ग्रहणंउपसर्गस्यप्रतेर्ग्रहणार्थं॥ तेनधात्वंतरोपसर्गान्न॥ प्रस्कण्वहरिश्चंद्रावृषी॥
हरिश्चंद्रग्रहणममंत्रार्थं॥ प्रस्कण्वोऋषिः॥ ऋषीतिकिं॥ प्रकण्वोदेशः॥ हरिचंद्रोमाणवकः॥ मस्करमस्करिणौवेणुपरि

व
व्राजकयोः॥ मकरशद्बोव्युत्पन्नस्तस्यसुडिन्निश्चनिपात्यते॥ वेणवितिकिं॥ मकरोग्राहः॥ मकरीसमुद्रः॥ कास्तीराजस्तुंदेनगरे॥
ईषत्तीरमस्येतिकास्तीरंनामनगरं॥ अजस्यतुंदमस्येवसअजस्तुंदंनामनगरं॥ नगरेकिं॥ कातीरं॥ अजतुंदं॥ कारस्करोवृक्षः॥ का
रंकरोतीतिकारस्करोवृक्षः॥ अन्यत्रकारकरः[illegible]॥ केचित्तुकस्कादिष्विदंपठंति॥ नस्तत्रेषु॥ पारस्करप्रभृतीनिचसंज्ञायां॥
एतानिससुट्कानिनिपात्यंतेनाम्नि॥ पारस्करः॥ किष्किंधा॥ तद्बृहतोःकरपत्योश्चौरदेवतयोःसुट्तलोपश्च॥ तात्पूर्वेचत्वे
नदकारेपिवाच्यः॥ तद्बृहतोर्दकारतकारौलुप्येते॥ करपत्योस्तकसुट्॥ चौरदेवतयोरितिसमुदायोपाधिः॥ तस्करः॥ बृहस्पतिः॥
प्रायस्यचित्तिचित्तयोः॥ प्रायश्चित्तिः॥ प्रायश्चित्तं॥ वनस्पतिरित्यादि॥ आकृतिगणोयं॥ ॥इतिसमासाश्रयविधयः॥ ॥
॥ ॥श्रीः॥ श्रीशिवोजयति ॥श्रीः॥ ॥श्रीः॥ ॥ॐ॥ ॥श्रीः॥ ॥ॐ॥ ॥श्रीः॥ ॥ॐ॥ ॥श्रीः॥
समर्थानांप्रथमाद्वा॥ इदंपदत्रयमधिक्रियतेप्राग्दिशइतियावत्॥ सामर्थ्यंपरिनिष्ठितत्वंकृतसंधिकार्यत्वमितियावत्॥
प्राग्दीव्यतोण्॥ तेनदीव्यतीत्यतःप्रागण्अधिक्रियते॥ अश्वपत्यादिभ्यश्च॥ एभ्योण्स्यात्प्राग्दीव्यतीयेष्वर्थेषु॥ वक्ष्यमाण
अ॰१स॰

ण्यस्यापवादः॥ तद्धितेष्वचामादेः॥ ञिति णिति च तद्धिते परेऽचामादेर्वृद्धिः स्यात्॥ किति च॥ किति च तद्धिते तथा॥ अश्व तद्धि॰ प्र॰

॥ सि॰प्र॰ ॥ पतेरपत्यादि आश्वपतं॥ गाणपतं॥ गाणपत्यो मंत्र इति तु प्रामादिकमेव॥ दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः॥ दित्यादित्य

पत्युत्तरपदात्प्राग्दीव्यतीयेष्वर्थेषु ण्यः स्यात् अणोऽपवादः॥ दैत्यः॥ अदितेः आदित्यस्य वा आदित्यः॥ प्राजापत्यः॥ यमा

॥ २८ ॥ च्चेति काशिका॥ याम्यः॥ पृथिव्या ञाञौ॥ पार्थिवा॥ पार्थिवी॥ देवाद्यञञौ॥ दैव्यं॥ दैवं॥ बहिषष्टिलोपो यञ्च॥ बाह्यः॥ ईक

क्॥ बाहीकः॥ स्थाम्नोऽकारः॥ अश्वत्थामः॥ पृषोदरादित्वात्सस्य तः॥ अवार्थे लुग्वाच्यः॥ अश्वत्थामा॥ लोम्नोऽपत्येषु बहुष्व २

कारो वक्तव्यः॥ बाह्वादीञोऽपवादः॥ उडुलोमाः॥ उडुलोमानः॥ बहुषु किं॥ औडुलोमिः॥ गोरजादिप्रसंगे यत्॥ गव्यं॥ अ

जादिप्रसंगे किं॥ गोभ्यो हेतुभ्य आगतं गोरूप्यं॥ गोमयं॥ उत्सादिभ्योऽञ्॥ औत्सः॥ अग्निकलिभ्यां ढग्वक्तव्यः॥ अग्न

रपत्यादि आग्नेयं॥ कालेयं॥ इत्यपत्यादिविकारांताः साधारणाः प्रत्ययाः॥ श्रीः॥ स्त्रीपुंसाभ्यां नञ्स्नञौ ॥ २८ ॥

भवनात्॥ धान्यानां भवने इत्यतः प्रागर्थेषु स्त्रीपुंसाभ्यां क्रमान्नञ्स्नञौ स्तः॥ स्त्रैणं॥ पौंस्नं॥ वत्यर्थे न॥ स्त्रीपुंवदिति ज्ञाप

कात्॥ स्त्रीवत्॥ पुंवत्॥ द्विगोर्लुगनपत्ये॥ द्विगोर्निमित्तं यस्तद्धितोऽजादिरनपत्यार्थः॥ प्राग्दीव्यतीयस्तस्य लुक् स्यात्॥

पंचसु कपालेषु संस्कृतः पुरोडाशः पंचकपालः॥ द्विगुनिमित्तस्येति किं॥ पंचकपालस्येदं खंडं पांचकपालं॥ अजादिः किं॥

पंचगर्गरूप्यं॥ अनपत्ये किं॥ द्वयोर्मित्रयोरपत्यं द्वैमित्रिः॥ गोत्रे लुगचि॥ अजादौ प्राग्दीव्यतीये विवक्षिते गोत्रप्रत्ययस्य लुक् स्या

त्॥ गर्गाणां छात्राः॥ वृद्धाच्छः॥ आपत्यस्य च तद्धितेऽनाति॥ हलः परस्यापत्ययकारस्य लोपः स्यात्तद्धिते परे नत्वाकारे॥ गार्गीयाः॥ प्रा

ग्दीव्यतः किं॥ गर्गेभ्यो हितं गर्गीयं॥ अचि किं॥ गर्गेभ्य आगतं गर्गरूप्यं॥ यूनि लुक्॥ प्राग्दीव्यतीये अजादौ प्रत्यये विवक्षिते युवप्रत्य

यस्य लुक् स्यात्॥ ग्लुचुकायनस्य गोत्रापत्यं ग्लुचुकायनिः॥ वक्ष्यमाणः फिञ्॥ ततो यून्यण्॥ ग्लौचुकायनः॥ तस्य छात्राः ग्लौचुका

यनाः॥ अणो लुकि कृते तुल्याभावान्न॥ पैलादिभ्यश्च॥ एभ्यो युवप्रत्ययस्य लुक् स्यात्॥ पीलाया वाण्॥ तस्मादणो द्व्यचेति फि

ञ्॥ तस्य लुक्॥ पैलः पिता पुत्रश्च॥ तद्राजाच्चाणः॥ अङ्गमगधेत्यणन्तादङ्गशब्दादणो द्व्यच इति फिञो लुक्॥ आंगः पिता पुत्रश्च॥

इञः प्राचां॥ गोत्रे यदिञ् तदंताद्युवप्रत्ययस्य लुक् स्यात्तच्चेत्प्राचां गोत्रं भवति॥ पन्नागारस्यापत्यं॥ अत इञ्॥ यञिञो

श्चेति फक्॥ पान्नागारिः पिता पुत्रश्च॥ प्राचां किं॥ दाक्षिः पिता॥ दाक्षायणः पुत्रः॥ न तौल्वलिभ्यः॥ तौल्वल्यादिभ्यः परस्य युवप्रत्य

यस्य लुङ् न स्यात्॥ पूर्वेण प्राप्तः॥ तुल्वलः॥ तत इञ्॥ फक्॥ तौल्वलिः पिता॥ तौल्वलायनः पुत्रः॥ फक्फिञोरन्यतरस्यां॥ प्रनि

५ छात्रार्थे अण् विवक्षिते युवप्रत्ययस्य लुक्॥ छात्रे अण् ५

॥सि०कौ०॥
१९०

कुंजादिनित्ये आत्रेविकल्पार्थं सूत्रं ॥ कात्यायनस्य छात्राः कातीयाः कात्यायनीयाः ॥ यस्कस्यापत्यं यास्कः ॥ शिवादिभ्योऽण् ॥ त
स्यापत्यं युवा यास्कायनिः ॥ अचोद्भव इति किं ॥ तस्य छात्राः यास्कीयाः यास्कायनीयाः ॥ तस्यापत्यं ॥ तस्येति षष्ठ्यंता
त्कृतसंधेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः ॥ उपगोरपत्यमौपगवः ॥ ओर्गुणः ॥ आदिवृद्धिरल्लोपं बाध
ते ॥ तस्येदमित्यपत्येऽपि बाधनार्थं कृतं स्यात् ॥ उत्सर्गः शेष एवासौ वृद्धान्यस्य प्रयोजनं ॥ भानोरपत्यं भानवः ॥ कृत
संधेः किं ॥ सौत्थितिः ॥ अकृतव्यूहपरिभाषया सावुत्थितिर्माभूत् ॥ समर्थपरिभाषया नेह ॥ वस्त्रमुपगोरपत्यं चैत्रस्य ॥
प्रथमात्किं ॥ अपत्यवाचकात्षष्ठ्यर्थं मा भूत् ॥ वाग्रहणाद्वाक्यमपि ॥ दैवयज्ञीति सूत्रादन्यतरस्याग्रहणानुवृत्तेः समासोऽपि
उपग्वपत्यं ॥ जातित्वान्ङीष् ॥ औपगवी ॥ आश्वपतः ॥ दैत्यः ॥ औत्सः ॥ स्त्रैणः ॥ पौंस्नः ॥ अपत्यं पौत्रप्रभृति गोत्रं ॥ अपत्यत्वेन वि
वक्षितं पौत्रादि गोत्रसंज्ञं स्यात् ॥ जीवति तु वंश्ये युवा ॥ वंश्ये पित्रादौ जीवति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञं स्यान्न गो
त्रसंज्ञं ॥ भ्रातरि च ज्यायसि ॥ ज्येष्ठे भ्रातरि जीवति कनीयान् चतुर्थादिर्युवा स्यात् ॥ वान्यस्मिन्सपिंडे स्थविरतरे जीवति ॥ भ्रा
तुरन्यस्मिन्सपिंडे स्थविरतरे जीवति पौत्रप्रभृतेरपत्यं जीवदेव युवसंज्ञं स्यात् ॥ एकं जीवति ग्रहणमपत्यस्य विशेषणं ॥ द्वि

त० अप०
॥१९०॥

तीयं सपिंडस्य ॥ एते च निर्देशास्तयोरुत्कर्षार्थं ॥ स्थानेन वयसा चोत्कृष्टे पितृव्ये मातामहे भ्रातरि वा जीवति ॥ गार्ग्यस्या
पत्यं गार्ग्यायणः ॥ गार्ग्यो वा ॥ स्थवीति किं ॥ स्थानवयोन्यूने गार्ग्य एव ॥ जीवति किं ॥ मृते मृतो वा गार्ग्य एव ॥ वृद्धस्य च पूजा
यामिति वक्तव्यं ॥ गोत्रस्यैव वृद्धसंज्ञा प्राचां गोत्रस्य युवसंज्ञा पूजायां गम्यमानायां ॥ तत्रभवान् गार्ग्यायणः ॥ पूजितः किं ॥
गार्ग्यः ॥ यूनश्च कुत्सायां ॥ गोत्रसंज्ञा वाच्या ॥ गार्ग्यो जाल्मः ॥ कुत्सेति किं ॥ गार्ग्यायणिः ॥ एको गोत्रे ॥ गोत्रे एक एवाप
त्यप्रत्ययः स्यात् ॥ उपगोर्गोत्रापत्यमौपगवः ॥ गार्ग्यः ॥ नाडायनः ॥ गोत्रे स्वैकोनसंख्यानां प्रत्ययानां परंपरा ॥ यद्वास्व
धूनसंख्येभ्यो ऽनिष्टा स्यादिति प्रसज्यते ॥ १ ॥ अपत्यं पितुरेव स्यात्ततः प्राचामपीति च ॥ मतभेदेन तद्धान्यसूत्रमेत
त्प्रयोजनं ॥ २ ॥ पितुरेवापत्यमिति पक्षे हि उपगोस्तृतीये वाच्ये औपगवादिञ् स्यात् ॥ चतुर्थे त्वजीवज्ज्येष्ठे तस्य
स्य औपगवेः फक् ॥ इष्टं तु फिञः परंपरायां मूलाद्धि ततमे गोत्रे एकोनशतं प्रत्ययाः स्युः ॥ पितामहादीनामपी
ति सुस्थं पक्षे तु तृतीये वाच्ये ॥ उपगोरणा इष्टसिद्धौ अणंतादिञपि स्यात् ॥ चतुर्थे ततः फिञिति फिञः परंपरायां श

भूयः

॥सि०कौ०॥ तत्तमे गोत्रे अहत्वं तेरनिष्टप्रत्ययाः स्युः॥ अतो नियमार्थमिदं सूत्रं॥ एवमुत्तरत्रापि बोध्यं॥ गोत्राद्यून्यस्त्रियां॥ यून्यपत्ये तद्धि०अप०
गोत्रप्रत्ययांतादेव प्रत्ययः स्यात् स्त्रियां तु न युवसंज्ञा॥ गर्गस्य युवापत्यं गार्ग्यायणः॥ स्त्रियां गोत्रत्वादेक एव प्रत्ययः॥ अ स्प२
दंतं यत्प्रातिपदिकं तत्प्रकृतिकात् षष्ठ्यंतात् इञ् स्यादपत्ये॥ दाक्षिः॥ बाह्वादिभ्यश्च॥ बाहविः॥ औडुलोमिः॥ आकृ अतइञ्२
॥२९॥ तिगणोयं॥ सुधातुरकङ् च॥ बादिञ्॥ सुधातुरपत्यं सौधातकिः॥ व्यासवरुडनिषादचंडालबिंबानां चेति वक्तव्यं॥
वकारा५ नय्वाभ्यां पदांताभ्यां पूर्वौ तु ताभ्यामैच्॥ पदांताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः किंतु ताभ्यां पूर्वौ क्रमादैजागमौ स्तः॥
वैयासकिः॥ वारुडकिः॥ इत्यादि॥ गोत्रे कुंजादिभ्यश्च्फञ्॥ व्रातच्फञोरस्त्रियां॥ व्रातवाचिभ्यश्च्फञंतेभ्यश्च स्वार्थे ञ्यः
स्यान्न तु स्त्रियां॥ कौंजायन्यः॥ बहुत्वे तद्राजत्वाल्लुग्वक्ष्यते॥ ब्राध्नायन्यः॥ स्त्रियां कौंजायनी॥ गोत्रत्वेन जातित्वान्ङीष्॥
अनंतरापत्ये कौंजिः॥ नडादिभ्यः फक्॥ गोत्र इत्येव॥ नाडायनः॥ चारायणः॥ अनंतरो नाडिः॥ हरितादिभ्योञः॥ अस्या ॥१९८॥
ञंतस्यापि यूनि फक्॥ हारितायनः॥ इह गोत्राधिकारेपि सामर्थ्याद्यून्ययं॥ न हि गोत्रप्रत्ययांतादपरो गोत्रप्रत्ययः॥ बिदाद्यंत
र्गणो हरितादिः॥ यञिञोश्च॥ गोत्रे यञि[hole]यौ तदंतात्फक् स्यात्॥ अनातीत्युक्तेः आपत्यस्येति यलोपो न॥ गार्ग्यायणः॥

दाक्षायणः॥ शारद्वतशुनकदर्भाद्भृगुवत्साग्रायणेषु॥ गोत्रे फक्॥ अञिञोरपवादः॥ आद्यौ बिदादी॥ शारद्वतायनो भार्गवश्चेत्॥
शारद्वतोन्यः॥ शौनकायनो वात्स्यश्चेत्॥ शौनकोन्यः॥ दार्भायण आग्रायणश्चेत्॥ दार्भिरन्यः॥ द्रोणपर्वतजीवंतादन्यतर
स्यां॥ एभ्यो गोत्रे फग्वा॥ द्रौणायनः॥ द्रौणिः॥ पार्वतायनः॥ पार्वतिः॥ जैवंतायनः॥ जैवंतिः॥ अनादिरिह द्रोणः॥ अश्वत्थाम्न्यनंतर
तपत्यात्॥ अनृष्यानंतर्ये बिदादिभ्योञ्॥ एभ्योञ् गोत्रे ये त्वत्रानृषयस्तेभ्योनंतरे॥ सूत्रे स्वार्थे ष्यञ्॥ बिदस्य गोत्रं बैदः॥
अनंतरो बैदिः॥ बाह्वादेराकृतिगणत्वादिञ्॥ पुत्रस्यापत्यं पौत्रः॥ [hole] दौहित्रः॥ गर्गादिभ्यो यञ्॥ गोत्र इत्येव॥ गार्ग्यः॥ वात्स्यः॥
यञञोश्च॥ गोत्रे यद्यञंतमञंतं च तदंतयोरेतयोर्लुक् स्यात्तत्कृते बहुत्वे न तु स्त्रियां॥ गर्गाः॥ वत्साः॥ बिदाः॥ उर्वाः॥ तत्कृते किं॥
प्रियगार्ग्याः॥ स्त्रियां तु गार्ग्यः स्त्रियः॥ गोत्रे किं॥ द्वैप्याः॥ औत्साः॥ प्रवराध्यायप्रसिद्धमिह गोत्रं॥ तेनेह न॥ पौत्राः॥ दौहित्राः॥ मधु
बभ्रोर्ब्राह्मणकौशिकयोः॥ गोत्रे यञ्॥ माधव्यो ब्राह्मणः॥ माधवोन्यः॥ बाभ्रव्यः कौशिकः॥ बाभ्रवोन्यः॥ बभ्रुशब्दस्य गर्गादि
कौशिकयोरि पाठात्सिद्धे नियमार्थमिदं॥ गर्गादिपाठफलं तु लोहितादिकार्यार्थं॥ बाभ्रव्यायणी॥ कपिबोधादांगिरसे॥ गोत्रे यञ् स्यात्॥
तिनियमः२ काप्यः॥ बौध्यः॥ आंगिरसे किं॥ कापेयः॥ बौधिः॥ वतंडाच्च॥ आंगिरस इत्येव॥ वातंड्यः॥ अनांगिरसे तु गर्गादौ शिवादौ च पाठा

घञणौ॥ वातंड्यः॥ वातंडः॥ लुक् स्त्रियां॥ वतंडा शेनिवि हितस्य लुक् स्यात् स्त्रियां॥ शार्ङ्गरवादित्वान् ङीन्॥ वतंडी॥ अनांगिरसे ॥ तं॰ अप॰
॥सि॰पू॰॥ तु वातंड्यायनी॥ लोहितादित्वात् ष्फः॥ अणि तु वातंडी॥ वक्ष्यमाणः ष्फः॥ अश्वादिभ्यः फञ्॥ गोत्रे॥ आश्वायनः॥ पुं
सि जाते॥ पुंसीति प्रकृतिविशेषणं॥ जातस्य गोत्रं जातायनः॥ पुंसीति किं॥ जाताया अपत्यं जातेयः॥ सगोत्रे गर्गे॥ गोत्रे फ
॥२२॥ ञ्॥ सार्गायणस्त्रैगर्त्तः॥ भार्गिरन्यः॥ शिवादिभ्योऽण्॥ गोत्र इति निवृत्तं॥ शिवस्यापत्यं शैवः॥ गांगः॥ तस्येतिकादित्वात्कि
ञ्॥ गांगायनिः॥ शुभ्रादित्वाड्ढक्॥ गांगेयः॥ अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः॥ अवृद्धेभ्यो नदीमानुषीनामभ्यो
ऽण् स्याड्ढकोऽपवादः॥ यामुनः॥ नार्मदः॥ चिंतिताया अपत्यं चैंतितः॥ अवृद्धाभ्यः किं॥ वासवदत्तेयः॥ नदीत्यादि किं॥ वैनतेयः॥ त
न्नामिकाभ्यः किं॥ शोभनाया अपत्यं शौभनेयः॥ ऋष्यंधकवृष्णिकुरुभ्यश्च॥ ऋषयो मंत्रद्रष्टारः॥ वासिष्ठः॥ वैश्वामित्रः॥
अंधकेभ्यः॥ श्वाफल्कः॥ वृष्णिभ्यः॥ वासुदेवः॥ आनिरुद्धः॥ शौरिरिति तु बाह्वादित्वात्॥ कुरुभ्यः॥ नाकुलः॥ साहदेवः॥ इ ॥२२॥
ञ एवायमपवादो मध्येऽपवादन्यायात्॥ अत्रिराह्वानुपरत्वाड्ढक्॥ आत्रेयः॥ मातुरुत्संख्यासंभद्रपूर्वायाः॥ संख्यादि
पूर्वस्य मातृशब्दस्य उदादेशः स्यादण्प्रत्ययश्च॥ द्वैमातुरः॥ सांमातुरः॥ भाद्रमातुरः॥ आदेशार्थं वचनं॥ प्रत्यय उत्सर्गेणै

व सिद्धः॥ स्त्रीलिंगनिर्देशोऽर्थापेक्षः॥ तेन धान्यमातुर्न॥ संख्येति किं॥ सौमात्रः॥ शुभ्रादित्वाड्ढैमात्रेयः॥ कन्यायाः कनीन च॥
ढकोऽपवादोऽण् तत्संनियोगेन कनीनादेशश्च॥ कानीनो व्यासः कर्णश्च॥ अनूढाया एवापत्यमित्यर्थः॥ विकर्णशुंगछगलाद्
वत्सभरद्वाजात्रिषु॥ अपत्येऽण् स्यात्॥ वैकर्णो वात्स्यः॥ वैकर्णिरन्यः॥ शौंगो भारद्वाजः॥ शौंगिरन्यः॥ छागल आत्रेयः॥ छागलिरन्यः॥
केचित्तु शुंगेत्यावर्तं पठंति॥ तेषां ढक्प्रत्युदाहरणं॥ शौंगेयः॥ पीलाया वा॥ तन्नामिकाणं बाधित्वा द्व्यच इति ढकि प्राप्ते
पक्षेऽण् विधीयते॥ पीलाया अपत्यं पैलः॥ पैलेयः॥ ढक् च मंडूकात्॥ चादण्॥ पक्षे इञ्॥ मांडूकेयः॥ मांडूकः॥ मांडूकिः॥ स्त्री
भ्यो ढक्॥ स्त्रीप्रत्ययांतेभ्यो ढक् स्यात्॥ वैनतेयः॥ बाह्वादित्वात्सौमित्रिः॥ शिवादित्वात्सापत्नेः॥ द्व्यचः॥ द्व्यचः स्त्रीप्रत्य
यांताद् द्व्यचोऽपत्ये ढक् स्यात्॥ तन्नामिकाणोऽपवादः॥ दात्तेयः॥ पार्थ इत्यत्र तु तस्येदमित्यण्॥ इतश्चानिञः॥ इकारांताद् द्व्यचो
ऽपत्ये ढक् स्यान्न त्विञंतात्॥ दालेयः॥ नैधेयः॥ आत्रेयः॥ शुभ्रादिभ्यश्च॥ शुभ्रस्यापत्यं शौभ्रेयः॥ विकर्णकुषीतकात्काश्य
पे॥ अपत्ये ढक्॥ वैकर्णेयः॥ कौषीतकेयः॥ अन्यो वैकर्णिः॥ कौषीतकिः॥ भ्रुवो वुक् च॥ ढक्॥ भ्रौवेयः॥ प्रवाहणस्य ढे॥ प्रवा
हणशब्दस्योत्तरपदस्य अचामादेरचो वृद्धिः पूर्वपदस्य तु वा स्यात्परे॥ प्रवाहणस्यापत्यं प्रावाहणेयः॥ प्रवाहणेयः॥ तत्प्रत्यय

स्यम॥ [illegible]तं तस्य प्रवाहणस्योत्तरपदस्यादेरचो वृद्धिः॥ पूर्वपदस्य तु वा॥ इञ आदेशः परे॥ प्रवाहणेयस्यापत्यं प्रावाहणेयिः प्रवाहणेयिः॥ न० अ०
॥सि० कौ०॥ बाह्वादित्वान्निमित्ता वृद्धिः ढगाश्रयेण विकल्पेन बाधितुं न शक्यत इति सिद्धान्तः॥ कल्याण्यादीनामिनङ्॥ एषामिनङादेशः भाद्रिनेयस्वामो[illegible]
स्याड्ढक्च॥ काल्याणिनेयः॥ बान्धकिनेयः॥ कुलटाया वा॥ इनङ्मात्रं विकल्प्यते ढक् तु नित्यं पूर्वेणैव॥ कौलटिनेयः कौल
॥१००॥ टेयः॥ सतीति भिक्षुकस्य कुलटा या तु व्यभिचारार्थं कुलान्यटति तस्याः क्षुद्राभ्यो वेति पक्षे ढ्रक्॥ कौलटेरः॥ हृद्भगसिन्ध्वन्ते
पूर्वपदस्य च॥ हृदाद्यन्ते पूर्वोत्तरपदयोरचामादेरचो वृद्धिर्ञिति णिति किति च॥ सुहृदोऽपत्यं सौहार्दः॥ सुभगाया अपत्यं सौ
भागिनेयः॥ सक्तुप्रधानाः सिन्धवः सक्तुसिन्धवः॥ तेषु भवः साक्तुसैन्धवः॥ चटकाया ऐरक्॥ चटकस्येति वाच्यं॥ लिंगविशि
ष्टपरिभाषया स्त्रिया अपि॥ चटकस्य चटकाया वा अपत्यं चाटकैरः॥ स्त्रियामपत्ये लुग्वक्तव्यः तयोरेव अपत्यं चटका
अजादित्वाट्टाप्॥ गोधाया ढ्रक्॥ गौधेरः॥ शुभ्रादित्वात्स्त्रीढक्॥ गौधेयः॥ आरगुदीचां॥ गौधारः॥ रकारस्तु आकारो ॥१००॥
च्चारणमन्यतो विधानार्थं॥ जडस्यापत्यं जाडारः॥ पण्डस्यापत्यं पाण्डारः॥ क्षुद्राभ्यो वा॥ अंगहीनाः शीलहीनाश्च क्षुद्रास्ता
भ्यो वा ढ्रक्॥ पक्षे ढक्॥ काणेरः काणेयः॥ दासेरः दासेयः॥ पितृष्वसुश्छण्॥ अणोऽपवादः॥ पैतृष्वस्रीयः॥ ढकि लोपः॥ पैतृ

ष्वसुरन्त्यस्य लोपः स्याड्ढकि॥ अत एव ज्ञापकाड्ढक्॥ पैतृष्वसेयः॥ मातृष्वसुश्च॥ पितृष्वसुर्यदुक्तं तदस्यापि स्यात्॥ मातृ
ढकि लोपः २ ष्वस्रीयः॥ मातृष्वसेयः॥ चतुष्पाद्भ्यो ढञ्॥ ढे लोपोऽकद्र्वाः॥ कद्रूभिन्नस्योवर्णान्तस्य लोपः स्याड्ढे परे॥ कामण्डलेयः॥ कमं ढूः
डलुरत्र चतुष्पाज्जातिविशेषः॥ गृष्ट्यादिभ्यश्च॥ एभ्यो ढञ् स्यात्॥ अणः ढकोऽपवादः॥ गार्ष्टेयः॥ मित्रयोरपत्यं॥ [illegible] प्रा
प्ते ढञ्॥ केकयमित्रयुप्रलयानां यादेरियः॥ एषां यकारादेरियादेशः स्यात् ञिति णिति किति च तद्धिते परे॥ इति इयादेशे प्रा
प्ते॥ दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि॥
एतानि निपात्यन्ते॥ इति युलोपः॥ मैत्रेयः॥ मैत्रेयौ॥ यस्कादिभ्यो गोत्रे॥ एभ्योऽपत्यप्रत्ययस्य लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रि
याम्॥ मित्रयवः॥ अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च॥ एभ्यो गोत्रप्रत्ययस्य लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियाम्॥ अत्रयः
भृगवः॥ कुत्साः॥ वसिष्ठाः॥ गोतमाः॥ अङ्गिरसः॥ अस्त्रियामित्येव॥ आत्रेय्यः स्त्रियः॥ बह्वच इञः प्राच्यभरतेषु॥ बह्वचः प
रो य इञ् प्राच्यगोत्रे भरतगोत्रे च वर्तमानस्तस्य लुक् स्यात्॥ पन्नागाराः॥ युधिष्ठिराः॥ न गोपवनादिभ्यः॥ गोत्रप्रत्ययस्य लु
क् न स्यात्॥ बिदाद्यन्तर्गणोऽयं॥ गोपवनाः॥ शैग्रवाः॥ तिककितवादिभ्यो द्वन्द्वे॥ एभ्यो गोत्रप्रत्ययस्य बहुषु लुक् स्याद् द्वन्द्वे॥

सि॰ कौ॰ तद्धि॰ ॥१०१॥ तैकायनिश्च। कैतवायनिश्च॥ तिकादिभ्यः फिञ्॥ तस्य लुक्॥ तिकाः कितवाः॥ उपकादिभ्योऽन्यतरस्यामद्वन्द्वे॥ एभ्यो गोत्रप्रत्ययस्य त॰ अप॰
बहुत्वे लुग्वा स्याद्द्वन्द्वे॥ भ्रष्टककपिष्ठलाः॥ भ्राष्टकिकापिष्ठलयः॥ लमकाः॥ लामकायनाः॥ आगस्त्यकौण्डिन्ययोरगस्ति
कुण्डिनच्॥ एतयोरवयवस्य गोत्रप्रत्ययस्याणो यञश्च बहुषु लुक् स्यात्॥ अवशिष्टस्य प्रकृतिभागस्य यथासंख्यमग
स्ति कुण्डिनच् एतावादेशौ स्तः॥ अगस्तयः॥ कुण्डिनाः॥ राजश्वशुराद्यत्॥ राज्ञो जातावेवेति वाच्यं॥ ये चाभावकर्मणोः॥
यादौ तद्धिते परेऽन् प्रकृत्या स्यान्न तु भावकर्मणोः॥ राजन्यः॥ श्वशुर्यः॥ जातिग्रहणाकृदाद्युसन्नो राजनः॥ अन्॥ अणि
अन् प्रकृत्या स्यात्॥ इति टिलोपो न॥ अभावकर्मणोः किं॥ राज्ञः कर्म भावो वा राज्यं॥ संयोगादिश्च॥ इन् प्रकृत्याणि परे॥
शाक्किणोऽपत्यं शाक्किणः॥ न मपूर्वोऽपत्येऽवर्मणः॥ मपूर्वोऽन् प्रकृत्या न स्यादपत्येऽणि॥ साद्मसामः॥ मपूर्वः किं॥ सौत्वनः॥ ॥१०१॥
अपत्ये किं॥ चर्मणा परिवृतश्चार्मणो रथः॥ अवर्मणः किं॥ चक्र[illegible]वर्मणोऽपत्यं चाक्रवर्मणः॥ वा हितनाम्न इति वाच्यं॥
हितनाम्नोऽपत्यं हैतनामनः॥ हैतनामः॥ ब्राह्मोऽजातौ॥ योगविभागोऽत्र कर्तव्यः॥ ब्राह्म इति निपात्यते नपत्येऽणि॥ ब्राह्मं हविः॥
ततो जातौ॥ अपत्ये जातावणि ब्रह्मणष्टिलोपो न स्यात्॥ ब्रह्मणोऽपत्यं ब्राह्मणः॥ अपत्ये किं॥ ब्राह्मी॥ ओषधिः॥ औक्षमन

पो॰ नपत्ये॥ अणि टिलोपो निपात्यते॥ औक्षं पदं॥ अनपत्ये किं॥ उक्ष्णोऽपत्यमौक्ष्णः॥ षपूर्वहन्धृतराज्ञामणि॥ षपूर्वो योऽन् त
स्य हनादेश्चान्स्यातो लोपोऽणि॥ औक्ष्णः॥ ताक्ष्णः॥ भ्रौणघ्नः॥ धृतराज्ञोऽपत्यं धार्तराज्ञः॥ वेति किं॥ सामनः॥ अणि किं॥ ताक्ष
ण्यः॥ क्षत्राद्घः॥ क्षत्रियः॥ जातावित्येव॥ क्षात्रिरन्यः॥ कुलात्खः॥ कुलीनः॥ तदन्तादपि॥ उत्तरसूत्रेऽपूर्वपदादिति लिङ्गात्॥
आढ्यकुलीनः॥ अपूर्वपदादन्यतरस्यां यड्ढकञौ॥ कुलादित्येव॥ पक्षे खः॥ कुल्यः॥ कौलेयकः॥ कुलीनः॥ पदग्रहणं किं॥
बहुकुल्यः॥ बाहुकुलेयकः॥ बहुकुलीनः॥ महाकुलादञ्खञौ॥ अन्यतरस्यामित्यनुवर्तनात् पक्षे खः॥ माहाकुलः॥
माहाकुलीनः॥ महाकुलीनः॥ दुष्कुलाड्ढक्॥ पूर्ववत्पक्षे खः॥ दौष्कुलेयः॥ दुष्कुलीनः॥ स्वसुश्छः॥ स्वस्रीयः॥ भ्रातुर्व्यच्च॥
चाच्छः॥ अणोऽपवादः॥ भ्रातृव्यः॥ भ्रात्रीयः॥ व्यन्सपत्ने॥ भ्रातुर्व्यन्स्यात्सपत्ने प्रकृतिप्रत्ययसमुदायेन शत्रौ वाच्ये॥ भ्रा
तृव्यः शत्रुः॥ पाप्मना भ्रातृव्येणेति तूपचारात्॥ रेवत्यादिभ्यष्ठक्॥ ठस्येकः॥ अङ्गात्परस्य ठस्येकादेशः स्यात्॥ रैवतिकः॥
गोत्रस्त्रियाः कुत्सने ण च॥ गोत्रं या स्त्री तद्वाचकात् शब्दात् णठकौ स्तः कुत्सायां॥ सामर्थ्याद्यूनि॥ गार्गी॥ अपत्यं
गार्गो वा गार्गिको वा जाल्मः॥ तस्मादेतौ डतरौ इति पुंवद्भावात् गार्ग्यशब्दाण्णठकौ॥ यस्येति लोपः॥ आपत्यस्य

॥सि०कौ०॥ तियलोपः॥ वृद्धाट्ठक्सौवीरेषु बहुलं॥ सुवीरदेशोद्भवाः सौवीराः॥ ठ ञा॥ सौवीरगोत्राद्यूनि बहुलं ठक्स्यात्कुत्सायां॥ भागवि त० अप०
त्तेर्भागवित्तिकः॥ पक्षे फक्॥ भागवित्तायनः॥ फेश्छ च॥ फिञंतात्सौवीरगोत्रादपत्ये छ ठक् च कुत्सने गम्ये॥ यमुंदस्यापत्यं
यामुंदायनिः॥ तिकादित्वात्फिञ्॥ तस्यापत्यं यामुंदायनीयः कुत्सने किं॥ यामुंदायनिः॥ औत्सर्गिकस्याणो ण्यक्षत्रियेति
॥१०२॥ लुक्॥ सौवीरेषु किं॥ तैकायनिः॥ फांटाहृतिमिमताभ्यां णफिञौ॥ सौवीरेषु॥ नेह यथासंख्यं॥ अल्पाच्तरस्य परनिपा
तनाल्लिंगादिति वृत्तिः॥ भाष्ये तु यथासंख्यमेव स्थितं॥ फांटाहृतः॥ फांटाहृतायनिः॥ मैमतः॥ मैमतायनिः॥ कुर्वादि
भ्यो ण्यः॥ अपत्ये॥ कौरव्या ब्राह्मणाः॥ वावदूक्यः॥ सम्राजः क्षत्रिये॥ साम्राज्यः॥ साम्राजोन्यः॥ सेनांतलक्षणकारि
भ्यश्च॥ एभ्यो ण्यः॥ हारिषेण्यः॥ लाक्षण्यः॥ कारिः शिल्पी॥ तस्मात्॥ तांतुवाय्यः॥ कौंभकार्यः॥ नापित्यः॥ उदीचा
मिञ्॥ हारिषेणिः॥ लाक्षणिः॥ तांतुवायिः॥ कौंभकारिः॥ नापितात्तु परत्वात्फिञेव॥ नापितायनिः॥ तक्ष्णोण्उ ॥१०२॥
पसंख्यानं॥ ताक्ष्णः॥ ताक्ष्ण्यः॥ तिकादिभ्यः फिञ्॥ तैकायनिः॥ कौसल्यकार्मार्याभ्यां च॥ अपत्ये फिञ्॥ इञो
पवादः॥ परमप्रकृतेरेवायमिष्यते॥ प्रत्ययसंनियोगेन प्रकृतिरूपं निपात्यते॥ कुसलस्यापत्यं कौसल्यायनिः॥

कर्मारस्यापत्यं कार्मार्यायणिः॥ छागवृषयोरपि॥ छाग्यायनिः॥ वार्ष्यायणिः॥ अणो द्व्यचः॥ अपत्ये फिञ्॥ इञोपवादः॥ कार्त्राय ध्वेणंताः
णिः॥ अण इति किं॥ दाक्षायणः॥ द्व्यचः किं॥ औपगविः॥ त्यदादीनां वा फिञ्वाच्यः॥ त्यादायनिः॥ त्यादः॥ उदीचां वृद्धादगोत्रात्॥ आ
म्रगुप्तायनिः॥ प्राचां तु आम्रगुप्तिः॥ वृद्धात्किं॥ दाक्षिः॥ अगोत्रात्किं॥ औपगविः॥ वाकिनादीनां कुक् च॥ अपत्ये फिञ् वा॥ वाकिनस्या
पत्यं वाकिनकायनिः॥ वाकिनिः॥ पुत्रांतादन्यतरस्यां॥ अस्माद्वृद्धात्फिञ् सिद्धः॥ तस्मिन्परे पुत्रांतस्य वा कुक् विधीयते॥ गार्गीपुत्रका
यणिः॥ गार्गीपुत्रायणिः॥ गार्गीपुत्रिः॥ प्राचामवृद्धात्फिन्बहुलं॥ ग्लुचुकायनिः॥ मनोर्जातावञ्यतौ षुक्च॥ समुदायार्थो जातिः॥
मानुषः॥ मानुष्यः॥ जनपदशब्दात्क्षत्रियादञ्॥ जनपदक्षत्रिययोर्वाचकादञ्स्यादपत्ये॥ दंडैर्येनेति सूत्रे निपातनाद्विलोपः॥ ऐ
क्ष्वाकः॥ ऐक्ष्वाकौ॥ क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्॥ तद्राजमाचक्षाणः॥ ना॥ तद्राज इत्यन्वर्थसंज्ञासामर्थ्या
त्॥ पंचालानां राजा पांचालः॥ पूरोरण्वक्तव्यः॥ पौरवः॥ पांडोर्ड्यण्॥ पांड्यः॥ साल्वेयगांधारिभ्यां च॥ आभ्यामपत्ये अञ्स्या
त्॥ ट॥ दिति ञ्यङोपवादः॥ साल्वेयः॥ गांधारः॥ तस्य राजन्यप्येवं॥ द्व्यञ्मगधकलिंगसूरमसादण्॥ अञोपवादः॥ द्व्यच्॥ आंगः॥
वांगः॥ सौह्मः॥ मागधः॥ कालिंगः॥ सौरमसः॥ तस्य राजन्यप्येवं॥ वृद्धेत्कोसलाजादाञ्ञ्यङ्॥ वृद्धात्॥ आंबष्ठ्यः॥ सौवीर्यः॥ इत्॥ आवं
त्यः॥ कौसल्यः॥ अजादस्यापत्यं आजाद्यः॥ कुरुनादिभ्यो ण्यः॥ कौरव्यः॥ नैषध्यः॥ सनैषधस्यापत्ये परित्यादौ तु शैषिकोण्॥ साल्वा

वयवप्रत्ययकल्कृदाश्मकादिभ्यः ॥ साल्वेऽजनपदस्तदवयवा उदुम्बरादयस्तेभ्यः प्रत्यग्रथादिभ्यश्चेदन्यादञोपवादः ॥ औदुम्बरिः ॥
॥ सि०कौ० ॥ पात्यस्त्रियः ॥ कालकूटिः आश्मकिः ॥ राजन्यश्चैवं ॥ ते तद्राजाः ॥ अञादय एतत्संज्ञाः स्युः ॥ तद्राजस्य बहुषु तेनैवास्त्रियां ॥ बहु ष्वेषु तद्राज ॥ त०अप०
स्य लुक् स्यात्तत्कृते बहुत्वे न तु स्त्रियां ॥ इक्ष्वाकवः ॥ पंचालाइत्यादि ॥ कथं तर्हि कौरव्याः पशवः ॥ तस्यामेव रघोः पांड्या इति ॥ कौरव्येषां
॥ १०३ ॥ ष्वसाधव इति समाधेयं ॥ रघूणामन्वयं वक्ष्ये ॥ निरुध्यमाना यदुभिः कथंचिदिति तु रघुयदुशब्दयोस्तदपत्यलक्षणया ॥ कंबोजाल्लुक् ॥
अस्मात्तद्राजस्य लुक् स्यात् ॥ कंबोजः कंबोजौ ॥ कंबोजादिभ्य इति वक्तव्यं ॥ चोलः ॥ शकः ॥ घ्यञ्लक्षणस्याणो लुक् ॥ केरलः ॥ अञो लुक् ॥
कंबोजाः समरे इति पाठः सुगमः ॥ दीर्घादिकपाठे तु कंबोजोऽभिजनो येषामित्यर्थः ॥ सिंधुतक्षशिलादिभ्योऽणञाविस्यण् ॥ स्त्रियामवंति
कुंतिकुरुभ्यः ॥ तद्राजस्य लुक् ॥ अवंती ॥ कुंती ॥ कुरूः ॥ अतश्च ॥ तद्राजस्याकारस्य लुक् स्त्रियां ॥ शूरसेनी ॥ मद्री ॥ कथं माद्रीसुताविस्यादि ॥
ह्रस्व एव पाठ इति हरदत्तः ॥ सर्गादित्वं वा वैकल्प्यं ॥ न प्राच्यभर्गादियौधेयादिभ्यः ॥ लुगेतद्राजस्य न लुक् ॥ अतश्चेत्यनेन प्राप्तः प्रतिषि
ध्यते ॥ पांचाली ॥ वैदर्भी ॥ आंगी वांगी ॥ मागधी ॥ एते प्राच्याः ॥ भार्गी ॥ कारूशी ॥ कैकेयी ॥ केकयी त्यत्र तु जन्यजनकभावलक्षणे पुंयो ॥ १०३ ॥
गे ङीष् ॥ युधा ॥ कुरा ॥ आभ्यां ध्यच इति ढक् ॥ ततः स्वार्थे पार्श्वादियौधेयादिभ्यामणञावित्यञ् ॥ शार्ङ्गरवाद्यञो ङीन् इति ङीन् ॥

अतश्चेति लुकि तु ढगंतत्वान्ङीष् ॥ युद्धान्तान वृत्तिः स्वरः स्यात् ॥ यौधेयी ॥ कौशेयी ॥ अणियोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे ॥ त्यादीनामं
त्यमुत्तमं ॥ तस्य समीपमुपोत्तमं ॥ गोत्रे यावणिञौ विहितावनार्षौ तदंतयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रियां ष्यङादेशः स्यात् ॥ नि
र्दिश्यमानस्यादेशा भवंतीत्यणिञोरेव ॥ वराहिता ॥ यङश्चाप् ॥ कुमुदगंधेरपत्यं स्त्री कौमुदगंध्या ॥ वाराह्या ॥ अनार्षयोः किं ॥ वासि
ष्ठी ॥ वैश्वामित्री ॥ गुरूपोत्तमयोः किं ॥ औपगवी ॥ अनिलक्षणो ङीष् ॥ गोत्रे किं ॥ अहिच्छत्रे जाता आहिच्छत्री ॥ गोत्रावयवात् ॥ गोत्रावय
वा गोत्राभिमताः कुलाख्यास्ततो गोत्रे विहितयोरणिञोः स्त्रियां ष्यङादेशः स्यात् ॥ अगुरूपोत्तमार्थ आरंभः ॥ पौणिक्या ॥ भौणिक्या ॥
कौड्यादिभ्यश्च ॥ स्त्रियां ष्यङ् प्रत्ययः स्यात् ॥ अगुरूपोत्तमार्थोऽनणिञर्थश्चारंभः ॥ कौड्या ॥ भाड्या ॥ सूतयुवत्यां ॥ सूत्या ॥ भोज
क्षत्रिये भोज्या ॥ दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकांठेविद्धिभ्योऽन्यतरस्यां ॥ एभ्यश्चतुर्भ्यः ष्यङ् वा ॥ अगोत्रार्थमिदं ॥ गोत्रेऽपि पर
त्वात्प्रवर्तते ॥ पक्षे इतो मनुष्यजातेर्ङीष् ॥ दैवयज्ञ्या ॥ दैवयज्ञी ॥ शौचिवृक्ष्या ॥ शौचिवृक्षी ॥ ॥ इत्यपत्याधिकारः ॥ ॥ श्रीः ॥
॥ ॥ तेन रक्तं रागात् ॥ रज्यतेऽनेनेति रागः ॥ कषायेण रक्तं वस्त्रं काषायं ॥ मांजिष्ठं ॥ रागात्किं ॥ देवदत्तेन रक्तं वस्त्रं ॥ लाक्षारो
चनाट्ठक् ॥ लाक्षिकं ॥ रौचनिकं ॥ शकलकर्दमाभ्यामुपसंख्यानं ॥ शाकलिकं ॥ कार्दमिकं ॥ आभ्यामणपीति वृत्तिकारः ॥ शाकलः ॥ का

॥ सि॰ कौ॰ ॥ द्रमः ॥ नील्या अन्वक्तव्यः ॥ नील्या रक्तं नीलं ॥ पीतात्कन् ॥ पीतकं ॥ हरिद्रामहारजनाभ्यामञ् ॥ हारिद्रं ॥ माहारजनं ॥ नक्ष त॰ बो॰
त्रेण युक्तः कालः ॥ पुष्येण युक्तं पौषमहः ॥ पौषी रात्रिः ॥ लुबविशेषे ॥ पूर्वेण विहितस्य लुप्स्यात्षष्टिदंडात्मकस्य काल
स्यावांतरविशेषश्चेन्न गम्यते ॥ अद्य पुष्यः ॥ कथं तर्हि पुष्ययुक्ता पौर्णमासी पौषीति ॥ चित्रा फाल्गुनी श्रवणा का
॥ १०५ ॥ र्त्तिकी चैत्रीत्यादिनिर्देशेन पौर्णमास्यामयं लुबिति ज्ञापितत्वात् ॥ श्रवणाशब्दस्तु अत एव लुप् ॥ लुपि युक्तवदिति युक्त
वद्भावात्सावश्य ॥ अबाधकान्यपि निपातनानि ॥ श्रावणी ॥ संज्ञायां श्रवणाश्वत्थाभ्याम् ॥ लुप् ॥ विशेषपर्यायमारंभः ॥ श्रवणारा
त्रिः ॥ अश्वत्थो मुहूर्तः ॥ संज्ञायां किं ॥ आश्वत्थी ॥ श्रावणी ॥ द्वंद्वाच्छः ॥ नक्षत्रद्वंद्वाद्युक्ते काले छः स्याद्विशेषे सत्यसति च ॥ तिष्य
पुनर्वसवीयमहः ॥ राधानुराधीया रात्रिः ॥ दृष्टं साम ॥ वसिष्ठेन दृष्टं वासिष्ठं साम ॥ अस्मिन्नर्थे ऽपि डिद्वा वक्तव्यः ॥ उशनसा दृ
ष्टमौशनं ॥ औशनसं ॥ कलेर्ढक् ॥ कलिना दृष्टं कालेयं साम ॥ सर्वत्राग्निकलिभ्यां ढक् वक्तव्यः ॥ अग्निना दृष्टं तत्र भवं तत ॥ १०५ ॥
आगतं तस्य स्वामि वा आग्नेयं ॥ वामदेवाड्ड्यड्ड्यौ ॥ वामदेवेन दृष्टं साम वामदेव्यं ॥ सिद्धे यस्येति लोपेन किं प्रत्ययतो डितौ
ग्रहणं मातदर्थ्येन ह वामदेव्यस्य न स्वरः ॥ १ ॥ परिवृतो रथः ॥ वस्त्रेण परिवृतो वास्त्रो रथः ॥ रथः किं ॥ वस्त्रेण परिवृतः का

यः ॥ समंतात्परिवेष्टितः परिवृत उच्यते ॥ तेनेह न ॥ छात्रैः परिवृतो रथः ॥ पांडुकंबलादिनिः ॥ पांडुकंबलेन परिवृतः पांडुकंबली ॥
पांडुकंबलशब्दो राजास्तरणवर्णकंबलस्य वाचकः ॥ मत्वर्थीयेनैव सिद्धे वचनमणो निवृत्त्यर्थं ॥ द्वैपवैयाघ्रादञ् ॥ द्वीपिनो वि
कारो द्वैप्यं ॥ तेन परिवृतो रथो द्वैपो रथः ॥ एवं वैयाघ्रः ॥ कौमारापूर्ववचने ॥ कौमारेत्यविभक्तिको निर्देशः ॥ अपूर्वत्वे निपातन
मिदं ॥ अपूर्वपतिं कुमारीमुपपन्नः कौमारः पतिः ॥ यद्वा अपूर्वपतिः कुमारी पतिमुपपन्ना कौमारी भार्या ॥ तत्रोद्धृतममत्रे
भ्यः ॥ शराव उद्धृतः शाराव ओदनः ॥ उद्धृतं निरिह उद्धरणपूर्वके निधाने वर्त्तते ॥ तेन सप्तमी ॥ उद्धृत्य निहितमित्यर्थः ॥ स्थंडिला
च्छयितरि व्रते ॥ तत्र शेते व ॥ समुदायेन व्रतं गम्यते ॥ स्थंडिले शयितव्यमिति नियमो ऽस्य स्थांडिलो भिक्षुः ॥ संस्कृतं भक्षाः ॥ सप्त
म्यंतादण्स्यात्संस्कृतेर्थे यत्संस्कृतं भक्षाश्चेत्ते स्युः ॥ भ्राष्ट्रे संस्कृता भ्राष्ट्रा यवाः ॥ अष्टसु कपालेषु संस्कृतो ऽष्टाक द्वीपोर्णुगनपत्ने
पालः पुरोडाशः ॥ शूलोखाद्यत् ॥ अणो ऽपवादः ॥ शूले संस्कृतं शूल्यं मांसं ॥ उखा पात्रविशेषः ॥ तस्यां संस्कृतं उख्यं ॥ दध्नष्ठक् ॥ इतिकृत्वा
दध्नि संस्कृतं दाधिकं ॥ उदश्वितो ऽन्यतरस्यां ॥ ठक्स्यात् ॥ पक्षे ऽण् ॥ इसुसुक्तांतात्कः ॥ उस्उस्उक्तत्एतदंतादंगात्पर

स्य ठस्य कः स्यात्॥ उदकेन श्वयति वर्धते उदश्वित्॥ तत्र संस्कृतं औदश्वित्कं॥ औदश्वितं॥ इसुसोः प्रतिपदोक्तयोर्ग्र तक्रं ह्युदश्वि
॥सि॰कौ॰॥ हणान्नेह॥ आशिषा चरति आशिषिकः॥ उषा चरति औषिकः॥ दोषउपसंख्यानं॥ दोष्णा तरति दौष्णिकः॥ क्षीराड्ढञ्॥ अत्र संस्कृ न्मथितमित्यमरः
तमित्येव संबध्यते न तु तरति तेन चरति वा ग्राममपि भवति॥ क्षैरेयी॥ सास्मिन्पौर्णमासीति॥ इति शब्दात्संज्ञायामिति ल त॰ अप॰
॥१०५॥ भ्यते॥ पौषी पौर्णमास्यस्मिन्स पौषो मासः॥ आग्रहायण्यश्वत्थाट्ठक्॥ अग्रहायनमस्या इत्याग्रहायणी॥ प्रज्ञादेराकृ
तिगणत्वादण्॥ पूर्वपदात्संज्ञायामिति णत्वं॥ आग्रहायणी पौर्णमास्यस्मिन्नाग्रहायणिको मासः॥ अश्वत्थेन युक्ता पौर्ण
मासी अश्वत्थः॥ निपातनात्पौर्णमास्यामपि लुक्॥ आश्वत्थिकः॥ विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः॥ एभ्य
ष्ठग्वा॥ पक्षेऽण्॥ फाल्गुनिकः॥ फाल्गुनो मासः॥ श्रावणिकः॥ श्रावणः॥ कार्त्तिकिकः॥ कार्त्तिकः॥ चैत्रिकः॥ चैत्रः॥ सास्य देवता॥
इन्द्रो देवतास्येति ऐन्द्रं हविः॥ पाशुपतं॥ बार्हस्पत्यं॥ त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता मन्त्रस्तुत्या च॥ ऐन्द्रो मन्त्रः॥ आग्नेयो वै ब्राह्म
णो देवतयेति तु शैषिकेऽर्थे सर्वत्राग्नीति ठक्॥ कस्येत्॥ कशब्दस्य कारादेशः स्यात्प्रत्ययसंनियोगेन॥ यस्येति लोपात्प्रा ॥१०५॥
गादिवृद्धिः॥ कायं हविः॥ श्रीर्देवतास्य श्रायं॥ शुक्राद्घन्॥ शुक्रियं॥ अपोनप्त्रपांनप्तृभ्यां घः॥ अपोनप्त्रियं॥

अपांनप्त्रियं॥ अपोनपात् अपांनपाच्च देवता॥ अत एव अपोनपाते अपांनपाते अनुब्रूहीति प्रैषः॥ प्रत्ययसंनियोगेन तु सत्रो
कृत्ररूपं निपात्यते॥ छ च॥ योगविभागो यथासंख्यनिवृत्त्यर्थः॥ अपोनप्त्रीयं॥ छप्रकरणे पैङ्गाक्षीपुत्रादिभ्य उपसंख्यानं॥ पैङ्गा अपांनप्त्रीयं॰२
क्षीपुत्रीयं॥ तार्णबिन्दवीयं॥ शतरुद्राद्घश्च॥ चाच्छः॥ शतं रुद्रा देवता अस्य शतरुद्रीयं॥ शतरुद्रियं॥ घछयोर्विधानसामर्थ्या
द्द्विगोर्लुगनपत्य इति न लुक्॥ महेन्द्राद्घाणौ च॥ चाच्छः॥ महेन्द्रियं हविः॥ माहेन्द्रं॥ महेन्द्रीयं॥ सोमाट्ट्यण्॥ सौम्यं॥ टित्वान्ङीप्॥
ओर्गुणः॰५ सौमी ऋक्॥ वाय्वृतुपित्रुषसो यत्॥ वायव्यं॥ ऋतव्यं॥ रीङृतः॥ अकृद्यकारे असार्वधातुके यकारे च्वौ च परे ऋदन्ताङ्गस्य
रीङादेशः स्यात्॥ यस्येति च॥ पित्र्यं॥ उषस्यं॥ द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च॥ चाद्यत्॥
द्यावापृथिवीयं॥ द्यावापृथिव्यं॥ शुनासीरीयं॥ शुनासीर्यं॥ अग्नेर्ढक्॥ आग्नेयः॥ कालेभ्यो भववत्॥ मासिकं॥ प्रावृषेण्यं॥ मह
राजप्रोष्ठपदाट्ठञ्॥ माहाराजिकं॥ प्रौष्ठपदिकं॥ देवताद्वन्द्वे च॥ अत्र पूर्वोत्तरपदयोरादेरचो वृद्धिः स्याञ्ञिति णिति किति च प्रत्य
ये परे॥ आग्निमारुतं॥ नेन्द्रस्य परस्य॥ सौमेन्द्रः॥ परस्य किं॥ ऐन्द्राग्नं॥ दीर्घाच्च वरुणस्य॥ दीर्घात्परस्य वरुणस्य न वृद्धिः
स्यात्॥ ऐन्द्रावरुणं॥ दीर्घात्किं॥ आग्निवारुणीमनड्वाहीं॥ तदस्मिन्वर्त्तत इति नवयज्ञादिभ्य उपसंख्यानं॥ नावयज्ञिकः॥

कालः॥ पाकयज्ञिकः॥ पूर्णमासादण् वक्तव्यः॥ पूर्णो मासोऽस्यां वर्त्तते पौर्णमासी तिथिः॥ पितृव्यमातुलमातामहपितामहाः॥ ए त०अप०१।
ते निपात्यंते॥ पितुर्भ्रातरि व्यत्॥ पितुर्भ्राता पितृव्यः॥ मातुर्डुलच्॥ मातुर्भ्राता मातुलः॥ मातृपितृभ्यां पितरि डामहच्॥ मातुः
॥सि०पू०॥ पिता मातामहः॥ पितुः पिता पितामहः॥ मातरि षिच्च॥ मातामही॥ पितामही॥ अवेर्दुग्धे सोढदूसमरीसचो वक्तव्याः॥ स
॥१०६॥ कारपाठसामर्थ्यान्न षः॥ अविसोढं॥ अविदूसं॥ अविमरीसं॥ तिलान्निष्फलात्पिंजपेजौ॥ तिलपिंजः॥ तिलपेजः॥ वंध्यस्तिल निष्फलात्तिलात्
इत्यर्थः॥ पिंजश्छंदसि डिच्च॥ तिलपिंजं॥ तस्य समूहः॥ काकानां समूहः काकं॥ बकानां समूहो बाकं॥ भिक्षादिभ्योऽण्॥ भि
क्षाणां समूहो भैक्षं॥ गर्भिणीनां समूहो गार्भिणं॥ इह भस्याढे इति पुंवद्भावे कृते॥ इनण्यनपत्ये॥ अनपत्यार्थेऽणि परे
इन् प्रकृत्या स्यात्॥ तेन न स्यादिक इति टिलोपो न॥ युवतीनां समूहो यौवनं॥ शर्वंतादनुत्तादरभियावतं॥ गोत्रोक्षोष्ट्रोरभ्र
राजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ्॥ एभ्यः समूहे वुञ् स्यात्॥ लौकिकमिह गोत्रं तच्चापत्यमात्रं॥ युवोरनाकौ॥ युवु ॥१०६॥
तयोरनुनासिकयोः क्रमादन अक एतावादेशौ स्तः॥ ग्लुचुकायनीनां समूहो ग्लौचुकायनकं॥ औक्षकमित्यादि॥ आपत्य
स्येति यलोपे प्राप्ते॥ प्रकृत्याऽके राजन्यमनुष्ययुवानः॥ राजन्यकं॥ मानुष्यकं॥ वृद्धाच्चेति वक्तव्यं॥ वार्धकं॥ केदाराद्य

ञ्च॥ ठञ्च॥ कैदार्यं॥ कैदारकं॥ गणिकायाश्चेति वक्तव्यं॥ गाणिक्यं॥ ठञ्कवचिनश्च॥ चात्केदारादपि॥ कवचीनां समूहः का
वचिकं॥ कैदारकं॥ ब्राह्मणमाणववाडवाद्यत्॥ ब्राह्मण्यं॥ माणव्यं॥ वाडव्यं॥ पृष्ठादुपसंख्यानं॥ पृष्ठ्यः॥ ग्रामजनबंधुभ्यस्तल्॥
गलंतंस्त्रियां ३ ग्रामता॥ जनता॥ बंधुता॥ गजसहायाभ्यां चेति वक्तव्यं॥ गजता॥ सहायता॥ अह्नः खः क्रतौ॥ अहीनः॥ अहर्गणसाध्यः सु
त्यागः क्रतुरित्यर्थः॥ क्रतौ किं॥ आह्नः॥ इह खंडिकादित्वादञ्॥ अह्नः खः क्रतावेवेति नियमाट्टिलोपो न॥ पर्श्वा णस्वक्तव्यः॥
सिति च॥ सिति परे पूर्वं पदं स्यात्॥ अभत्वादोर्गुणो न॥ पर्शूनां समूहः पार्श्वं॥ अनुदात्तादेरञ्॥ कापोतं॥ मायूरं॥ खंडिकादिभ्य
श्च॥ अञ् स्यात्॥ खंडिकानां समूहः खांडिकं॥ चरणेभ्यो धर्मवत्॥ काठकं॥ छांदोग्यं॥ अचित्तहस्तिधेनोष्ठक्॥ साक्तुकं॥ हास्ति
कं॥ धैनुकं॥ केशाश्वाभ्यां यञ्छावन्यतरस्यां॥ पक्षे ठगणौ॥ केश्यं॥ कैशिकं॥ अश्वीयं॥ आश्वं॥ पाशादिभ्यो यः॥ पाश्या॥ तृण्या॥
धूम्या॥ वन्या॥ वात्या॥ खलगोरथात्॥ खल्या॥ गव्या॥ रथ्या॥ इनित्रकट्यचश्च॥ खलादिभ्यः क्रमात्स्युः॥ खलिनी॥ गोत्रा॥ रथक
ट्या॥ खलादिभ्य इनिर्वक्तव्यः॥ डाकिनी॥ कुटुंबिनी॥ आकृतिगणोऽयं॥ विषयो देशे॥ षष्ठ्यंतादणादयः स्युरस्तत्परिशीलि
तेऽर्थे स चेद्देशः॥ शिबीनां विषयो देशः शैबं॥ हरीकि॥ द्वचहस्त्यश्विषयेऽनुवाकः॥ राजन्यादिभ्यो वुञ्॥ राजन्यकं॥ गौरिकाद्य

शिबीनां परिशीलितोयं देशः ९

॥सि॰कौ॰॥ शुकार्यादिभ्यो विधल्सन्कलो॥ मौस्किर्णौ विपर्योदेशः मौशिकि विधं॥ मौलिकि विधं॥ शेशुकारिसक्तं॥ सारसायनभक्तं॥ ॥त॰ अप॰ रा॰

सोस्यादिरिति छंदसः प्रगाथेषु॥ पंक्तिरादिरस्येति पांक्तः प्रगाथः॥ स्वार्थ उपसंख्यानं॥ त्रिष्टुबेव त्रैष्टुभं॥ संग्रामे प्रयोजन

॥१०७॥ योद्धृभ्यः॥ सोस्येत्यनुवर्त्तते॥ सुभद्राः प्रयोजनमस्य संग्रामस्येति सौभद्रः॥ भरताः योद्धारोस्य संग्रामस्येति भारतः॥ तदस्यां

प्रहरणमिति क्रीडायां णः॥ दंडः प्रहरणमस्यां क्रीडायां दांडा॥ मौष्टा॥ घञः सास्यां क्रियेति ञः॥ घञंतात् क्रियावाचिनः प्रथमा

तादस्यामिति सप्तम्यर्थे स्त्रीलिंगे ञः प्रत्ययः स्यात्॥ घञ इति कृद्ग्रहणाद्गतिकारकपूर्वस्यापि ग्रहणं॥ श्येनंपातस्य पात

ञ॥ श्येनतिलस्य पाते ञे॥ श्येनतिलयोर्मुमागमः स्यात् ञप्रत्यये परे पातशब्दे उत्तरपदे॥ श्येनंपातोस्यां वर्त्तते श्यैनंपाता मृगया॥ तिलंपाता

स्यां वर्त्तते तैलंपाता स्वधा॥ श्येनतिलस्य किं॥ दंडपातोस्यां वर्त्तते दांडपाता॥ तदधीते तद्वेद॥ व्याकरणमधीते वेद वा वैया

करणः॥ क्रत्वुक्थादिसूत्रांताट्ठक्॥ क्रतुविशेषवाचिनामेव ग्रहणं॥ तेभ्यो मुख्यार्थेभ्यो विहितः तत्प्रतिपादितग्रंथे प्रत्यस्त ॥१०७॥

ध्येतरि॥ आग्निष्टोमिकः॥ वाजपेयिकः॥ उक्थसामविशेषः॥ तल्लक्षणपरो ग्रंथविशेषो विलक्षणयोक्थं॥ तदधीते वेद वा

औक्थिकः॥ मुख्यार्थान्न क्रतुक्थादिगणेनेष्यते॥ न्यायं॥ नैयायिकः॥ वृत्तिं॥ वार्त्तिकः॥ लोकायतं॥ लौकायतिकः॥ इत्यादि॥

सूत्रांतात्तु अकल्पादेरेवेष्यते॥ सांग्रहसूत्रिकः॥ अकल्पादेः किं॥ काल्पसूत्रः॥ विद्यालक्षणकल्पांतात्त्रेति वक्तव्यं॥ वाय

सविद्यिकः॥ गौलक्षणिकः॥ आश्वलक्षणिकः॥ पाराशरकल्पिकः॥ अंगक्षत्रधर्मत्रिपूर्वात्तु विद्यांतान्नेति वक्तव्यं॥ आं

गविद्यः॥ क्षात्रविद्यः॥ धार्मविद्यः॥ त्रिविद्या विद्यास्त्रिविद्या॥ तामधीते वेत्ति वा त्रैविद्यः॥ आख्यानाख्यायिकेतिहासपुराणे

भ्यश्च॥ यवक्रीतमधिकृत्य कृतमाख्यानमुपचारात् यावक्रीतं॥ तदधीते वेत्ति वा यावक्रीतिकः॥ वासवदत्तामधिकृत्य

गघत्रपोयंषः॥ कृता आख्यायिका वासवदत्ता॥ अधिकृत्य कृते ग्रंथे इत्यर्थे वृद्धाच्छः॥ तस्य लुबाख्यायिकाभ्यो बहुलमिति लुप्॥ ततोऽनेन

ठक्॥ वासवदत्तिकः॥ ऐतिहासिकः॥ पौराणिकः॥ सर्वादेः सादेश्च लुग्वक्तव्यः॥ सर्ववेदानधीते सर्ववेदः॥ सर्वतंत्रः॥ सवार्त्ति

कः॥ द्विगोर्लुगिति लुक्॥ द्वितंत्रः॥ क्रमादिभ्यो वुन्॥ क्रमकः॥ क्रमपदशिक्षामीमांसा क्रमादि॥ अनुब्राह्मणादिनिः॥ तदधी

ते तद्वेदेत्यर्थे॥ ब्राह्मणसदृशो ग्रंथोऽनुब्राह्मणं॥ तदधीतेऽनुब्राह्मणी॥ मत्वर्थे इनिना सिद्धे अणो बाधनार्थं॥ वसंतादिभ्य

ष्ठक्॥ वासंतिकः॥ अथर्वाणमधीते आथर्वणिकः॥ दांडिनायनेति सूत्रे निपातनाट्टिलोपाभावः॥ प्रोक्ताल्लुक्॥ प्रोक्तार्थकप्र

त्ययांतस्य अध्येतृवेदितृप्रत्ययस्य लुक् स्यात्॥ पणनं पणः॥ घञर्थे कविधानमिति कः॥ सोस्यास्तीति पणी॥ तस्य

इकन्पदोत्तरपदात् शतषष्टेः षिकन् पथः॥ पूर्वपदिकः॥ अर्थवतः परिभाषया ज्ञापनं॥ ५

उत्तरपदिकः॥ शतपथिकः॥ शतपथिका॥ षाष्टिपथिकः॥ षाष्टिपथिका ॥ ॥

गोत्रापत्यं पाणिनः ॥ गाथिविदथिकेशिगणिपणिनश्च ॥ एते ऽणि प्रकृत्या स्युः ॥ इति टिलोपो न ॥ ततो यूनि इञ् ॥ पाणिनि ॥ ॥ त० अप० ॥
॥ सि० कौ० ॥ ण्यक्षत्रियार्षञितो यूनि लुगणिञोः ॥ ण्यप्रत्ययांतात् क्षत्रियगोत्रप्रत्ययांतात् ऋष्यपत्यवाचिनो गोत्रप्रत्ययांतात् ञितश्च परयोर्यु
॥ १०८ ॥ वाचिनोरणिञोर्लुक् स्यात् ॥ कौरव्यः पिता कौरव्यः पुत्रः ॥ श्वाफल्कः पिता ॥ श्वाफल्कः पुत्रः ॥ वासिष्ठः पिता ॥ वासिष्ठः पु पुवा १
त्रः ॥ तैकायनिः पिता पुत्रश्च ॥ इस्यः किं ॥ शिवाद्यण् ॥ कौहडः ॥ ततइञ् ॥ कौहडिः पुत्रः ॥ यूनि किं ॥ वामरथ्यस्य छात्राः वामरथ्याः ॥
इति ॥ इञो लुक् तु न स्यादेव ॥ आर्षग्रहणेन प्राप्ते परोक्तस्य ऋष्यण एव ग्रहणात् ॥ पाणिनिना प्रोक्तं पाणिनीयं ॥ वृद्धाच्छः ॥
इञश्चेत्यण् तु न भवति ॥ गोत्रे यद् इञ् तदंतादिति वक्ष्यमाणत्वात् ॥ ततो ऽध्येतृवेदितृणो लुक् ॥ स्वरेऽस्मिन्यांनाविशेषः ॥ पा
णिनीयः ॥ पाणिनीयाः ॥ सूत्राच्च कोपधात् ॥ सूत्रवाचिनः ककारोपधादध्येतृवेदितृप्रत्ययस्य लुक् स्यात् ॥ अप्रोक्तापआ
रंसः ॥ अष्टावध्यायाः परिमाणमस्याष्टकं पाणिनेः सूत्रं ॥ तदधीयते विदंति वा अष्टकाः ॥ छंदोब्राह्मणानि च तद्विषयाणि ॥ १०८ ॥
छंदांसि ब्राह्मणानि च प्रोक्तप्रत्ययांतानि तद्विषयाणि स्युः ॥ अध्येतृवेदितृप्रत्ययं विना न प्रयोज्यानीत्यर्थः ॥ कठेन प्रोक्त
मधीयते कठाः ॥ वैशंपायनांतेवासित्वाण्णिनिः ॥ तस्य कठचरकाल्लुगिति लुक् ॥ ततोऽण् ॥ तस्य प्रोक्ताल्लुक् ॥ श्री ॥ श्री ॥

संज्ञायां कृतिकादिलिवकृ यं नेह कश्यपकमधीते काश्यपकः ॥

अथ चातुरर्थिकाः ॥ ॥ तदस्मिन्नस्तीति देशे तन्नाम्नि ॥ उदुंबराः संत्यस्मिन्देशे औदुंबरः ॥ तेन निर्वृत्तं ॥ कुशांबेन नि
र्वृत्ता कौशांबी नगरी ॥ तस्य निवासः ॥ शिबीनां निवासो देशः शैबः ॥ अदूरभवश्च ॥ विदिशाया अदूरभवं वैदिशं ॥ चकारेण प्रा
गुक्तास्त्रयोऽर्थाः संनिधाप्यंते ॥ तेन वक्ष्यमाणप्रत्ययानां चातुरर्थिकत्वं सिध्यति ॥ ओरञ् ॥ अणोऽपवादः ॥ कक्षतुका हतवं
न धांतु परत्वान्मतुप् ॥ इक्षुमती ॥ मतोश्च बह्वजंगात् ॥ बह्वजंगं यस्य मतुपस्तदंताट्टक् स्यात् ॥ नाण् ॥ सैध्रकावतं ॥ ब
ह्वजिति किं ॥ आहिमतं ॥ अंगग्रहणं बह्वजिति तद्विशेषणं यथा स्यात् ॥ मत्वंतविशेषणमा भूत् ॥ बह्वचः कूपेषु ॥ अणो
पवादः ॥ दीर्घवरत्रेण निर्वृत्तः दैर्घवरत्रः कूपः ॥ उदक् च विपाशः ॥ विपाश उत्तरकूले ये कूपास्तेष्वञ् ॥ अबह्वजर्थ आरंभः ॥
दत्तेन निर्वृत्ताः कूपा दात्ताः ॥ उदक् किं ॥ दक्षिणतः कूपेष्वणेव ॥ संकलादिभ्यश्च ॥ कूपेष्विति निवृत्तं ॥ संकलेन निर्वृत्तं
सांकलं ॥ पौष्कलं ॥ स्त्रीषु सौवीरसाल्वप्राक्षु ॥ स्त्रीलिंगेषु देशेष्वेभ्योऽञ् ॥ सौवीरे ॥ दत्तामित्रेण निर्वृत्ता न
गरी दात्तामित्री ॥ साल्वे ॥ वैधूमाग्नी ॥ प्राचि ॥ काकंदी ॥ सुवास्त्वादिभ्योऽण् ॥ उवर्णांतलक्षणस्याञोऽपवादः ॥ सुवास्तो

रइरस्तस्वंसौवास्तवं॥ वर्णु॥ वार्णवं॥ अणुग्रहणंनद्यांमतुपोबाधनार्थं॥ सौवास्तवीनदी॥ रोणी॥ रोणीशब्दान्तादंतादण्॥ कूपानो न०रा०
॥सि०कू०॥ पवादः॥ रौण॥ आजकरौण॥ कौपधात्॥ अण्॥ अञोपवादः॥ कार्णच्छिद्रकः कूपः॥ कार्णकाकवं॥ त्रैशंकवं॥ बुञ्छण्कठजिलस
निरढञ्ण्ययफक्फिञिञ्यककठकोरीहणकृशाश्वर्ष्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमप्र
॥१९९॥ गदिन्वराहकुमुदादिभ्यः॥ सप्तदशभ्यः सप्तदशचतुरर्थ्यां॥ अरीहणादिभ्योवुञ्॥ आरीहणेननिर्वृत्तमारीहणकं॥
कृशाश्वादिभ्यश्छण्॥ कार्शाश्वीयं॥ ऋश्यादिभ्यः कः॥ ऋश्यकं॥ कुमुदादिभ्यष्ठच्॥ कुमुदिकं॥ काशादिभ्यष्ठिल्॥ काशिलः॥ तृणा
दिभ्यः सः॥ तृणसः॥ प्रेक्षादिभ्य इनिः॥ प्रेक्षी॥ अश्मादिभ्योरः॥ अश्मरः॥ सख्यादिभ्योढञ्॥ साखेयं॥ संकाशादिभ्योण्यः॥ सां
काश्यं॥ बलादिभ्योयः॥ बल्यं पक्षादिभ्यः फक्॥ पाक्षायणः॥ पथः पंथ च॥ पांथायनः॥ कर्णादिभ्यः फिञ्॥ कार्णायनिः॥ सुतंग
मादिभ्य इञ्॥ सौतंगमिः॥ प्रगदिन्नादिभ्योञ्यः॥ प्रागदिन्यं॥ प्रागधः॥ वराहादिभ्यः कक्॥ वाराहकः॥ कुमुदादिभ्यष्ठक्॥ कौमु ॥२००॥
दिकः॥ जनपदेलुप्॥ जनपदेवाच्ये चातुरर्थिकस्य लुप्स्यात्॥ लुपि युक्तवद्व्यक्तिवचने॥ लुपि सति प्रकृतिवल्लिंगवचने स्तः॥ पंचा
लानांनिवासोजनपदःपंचालाः॥ कुरवः॥ अंगाः॥ वंगाः॥ कलिंगाः॥ तदशिष्यंसंज्ञाप्रमाणत्वात्॥ युक्तवद्वचनन कर्तव्यं संज्ञानां

प्रमाणत्वात्॥ लुब्योगाप्रख्यानात्॥ लुबपि न कर्तव्यो ऽवयवार्थस्येहाप्रतीतेः॥ योगप्रमाणे च तदभावेऽदर्शनं स्यात्॥ यदि हि यो
गस्यावयवार्थस्य बोधकं स्यात्तदा तदभावे न दृश्येत॥ प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्॥ प्रत्ययार्थः प्रधानमि
१अयोग्यमितर्थः त्येवंरूपं वचनमप्यशिष्यं॥ कुतः॥ अर्थस्य लोकत एव सिद्धेः॥ कालोपसर्जने च तुल्यं॥ अतीतायाः रात्रेः पश्चार्धेनागामिन्याः पू
र्वार्धेन च सहितो दिवसोऽद्यतनः॥ ततो विशेषणमुपसर्जनमित्यादि पूर्वाचार्यैः परिभाषितं तदप्यशिष्यं तुल्यं समानं लोकप्रसि
द्धेः॥ विशेषणानां चाजातेः॥ लुबर्थस्य विशेषणानामपि तद्वल्लिंगवचने स्तो जातिं वर्जयित्वा॥ पंचाला रमणीयाः॥ गोदौ रमणी संशेयं ५
देशजातिः ५ यौ॥ अजातेः किं॥ पंचाला जनपदः॥ गोदौ ग्रामः॥ हरीतक्यादिषु व्यक्तिः॥ हरीतक्याः फलानि हरीतक्यः॥ खलतिकादिषु वच
नं॥ खलतिकस्य पर्वतस्यादूरभवानि खलतिकं वनानि॥ मनुष्यलुपि प्रतिषेधः॥ मनुष्यलक्षणे लुबर्थे विशेषणानां न॥ लु
वं तस्य तु सवतीत्यर्थः॥ चंचा अभिरूपः॥ वरणादिभ्यश्च॥ अजनपदार्थ आरंभः॥ वरणानामदूरभवं नगरं वरणाः॥ शर्करायाः चंचातृणमयः
वा॥ अस्मात् चातुरर्थिकस्य लुब्वा स्यात्॥ ठक्छौ च॥ शर्करायाः एतौ स्तः॥ कुमुदादेर्वराहादेश्च पाठसामर्थ्यात् पक्षे ठच्कक् पुमान्॥ १
कौ॥ तस्य लुब्विकल्पः॥ षड्रूपाणि॥ शर्करा॥ शार्करं॥ शार्करिकं॥ शर्करीयं॥ शार्करिकं॥ शार्करकं॥ नद्यां मतुप्॥ चातु

सि०कौ० रर्थिकः ॥ इक्षुमती ॥ ध्वोमेदित्यस्य ॥ मतुप्स्याच्चातुरर्थिकः ॥ अनद्यर्थमारंभः ॥ मधुमान् ॥ कुमुदनडवेतसेभ्यो ड्मतुप् ॥ कुमुद्वान् ॥ त०रा०
नड्वान् ॥ वेतस्वान् ॥ आद्ययोस्तु यरि ॥ अत्वे मादुपधाया इति वत्त्वप्रमाणेन वः ॥ महिषाच्चेति वक्तव्यं ॥ महिष्मान्नाम देशः ॥ नडशादाड्ड्वलच् ॥ न
२२० ड्वलः ॥ शाद्वलः ॥ शादो बालघासयोः ॥ शिखाया वलच् ॥ शिखावलं ॥ उत्करादिभ्यश्छः ॥ उत्करीयः ॥ नडादीनां कुक्च ॥ नडकीयं ॥ कुञ्चादस्य
लंबः ॥ कुञ्चकीयः ॥ तक्षन्नलोपश्च ॥ तक्षकीयः ॥ बिल्वकादिभ्यश्छस्य लुक् ॥ नडाद्यंतर्गता बिल्वकादयस्तेभ्यश्छस्य लुक् कुक्यते परे ॥ बिल्वा
यस्यां संति सा बिल्वकीया ॥ तस्यां भवा बैल्वकाः ॥ वेत्रकीया ॥ वैत्रकाः ॥ छस्य किं ॥ छमात्रस्य लुक् यथा स्यात् ॥ कुको निवृत्तिर्मा भूत् ॥ अ
न्यथा संनियोगशिष्टानामिति कुगपि निवर्तेत ॥ लुग्ग्रहणं सर्वलोपार्थं ॥ लोपो हि यमात्रस्य स्यात् ॥ ॥ इति चातुरर्थिकाः ॥ ॥ शेषे ॥ यकारमात्र
अपत्यादिचतुरर्थ्यंतादन्योर्थः शेषः स्तत्राणादयः स्युः ॥ चक्षुषा गृह्यते चाक्षुषं रूपं ॥ श्रावणः शब्दः ॥ औपनिषदः पुरुषः ॥ दृषदि
पिष्टा दार्षदाः सक्तवः ॥ उलूखले क्षुण्ण औलूखलो यावकः ॥ अश्वैरुह्यते आश्वो रथः ॥ चतुर्भिरुह्यते चातुरं शकटं ॥ चतुर्दश्यां २२०
दृश्यते चातुर्दशं रक्षः ॥ शेष इति लक्षणं चाधिकारश्च ॥ तस्य विकारस्यातः प्राक् शेषाधिकारः ॥ राष्ट्रावारपाराद्घखौ ॥ आभ्यां क्र
माद्घखौ स्तः शेषे ॥ राष्ट्रियः ॥ अवारपारीणः ॥ अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यं ॥ अवारीणः ॥ पारीणः ॥ पारा

वारीणः ॥ इह प्रकृतिविशेषात् घादयः ष्ट्युट्युलंताः प्रत्यया उच्यंते तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यंते ॥
ग्रामाद्यखञौ ॥ ग्राम्यः ॥ ग्रामीणः ॥ कत्त्र्यादिभ्यो ढकञ् ॥ कुत्सितास्त्रयः कत्त्रयः ॥ तत्र जातादिः कात्त्रेयकः ॥ नागरेयकः ॥ ग्रामादि
त्यनुवृत्तेः ग्रामेयकः ॥ कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु ॥ कौलेयकः श्वा ॥ कौलोन्यः ॥ कौक्षेयकोऽसिः ॥ कौक्षोन्यः ॥ ग्रैवेय
कोऽलंकारः ॥ ग्रैवोन्यः ॥ नद्यादिभ्यो ढक् ॥ नादेयं ॥ माहेयं ॥ वाराण[से]यं ॥ दक्षिणापश्चात्पुरसस्त्यक् ॥ दक्षिणेति आजंतम
व्ययं ॥ दाक्षिणात्यः ॥ पाश्चात्यः ॥ पौरस्त्यः ॥ कापिश्याः ष्फक् ॥ कापिश्यां जातादि का[पि]शायनं मधु ॥ कापिशायनी
द्राक्षा ॥ रंकोरमनुष्येण्च ॥ चात्ष्फक् ॥ रांकवो गौः ॥ रांकवायणः ॥ अमनुष्ये इति किं ॥ रांकवो मनुष्यः ॥ द्युप्रागपागुदक्
प्रतीचो यत् ॥ दिव्यं ॥ प्राच्यं ॥ अपाच्यं ॥ उदीच्यं ॥ प्रतीच्यं ॥ कंथायाष्ठक् ॥ कांथिकः ॥ वर्णौ वुक् ॥ वर्णुर्नदः समीपदेशो
वर्णुः ॥ ताद्धयार्थवानिकं प्राशाष्टकः ॥ यथाहि जातं हिमवत्सु कांथकं ॥ अव्ययात्त्यप् ॥ अमेहक्वतसित्रेभ्य एव ॥
अमांतिकसहार्थयोः ॥ अमात्यः ॥ इहत्यः ॥ क्वत्यः ॥ ततस्त्यः ॥ तत्रत्यः ॥ परिगणनं किं ॥ उपरिष्टाद्भव औपरिष्टः ॥ अ
व्ययानां भमात्रे टिलोपः ॥ अनित्योयं ॥ बहिषष्टिलोपविधानात् ॥ तेन हन आरातीयः ॥ त्यब्नेर्ध्रुव इति वक्तव्यं ॥

नित्यं ॥ निसो गते ॥ ह्रस्वात्तादौ तद्धिते ॥ ह्रस्वादिणः परस्य सस्य षः स्यात्तादौ तद्धिते ॥ निर्गतो वर्णाश्रमेभ्यो निष्ट्यश्चंडालादिः ॥ त॰ अ॰ शे॰
॥ सि॰कौ॰ ॥ अरण्याण्णः ॥ आरण्याः सुमनसः ॥ दूरादेत्यः ॥ दूरेत्यः ॥ उत्तरादाहञ् ॥ औत्तराहः ॥ ऐषमोह्यःश्वसोन्यतरस्यां ॥ एभ्यस्त्यब्वा ॥ प
क्षे वक्ष्यमाणौ ट्युट्युलौ ॥ ऐषमस्त्यं ॥ ऐषमस्तनं ॥ ह्यस्त्यं ॥ ह्यस्तनं ॥ श्वस्त्यं ॥ श्वस्तनं ॥ पक्षे शौवस्तिकं वक्ष्यते ॥ तीररूप्योत्तर साधंचिरमिला
॥ १२१ ॥ पदादञ्ञौ ॥ यथासंख्येन ॥ काकतीरं ॥ पाल्वलतीरं ॥ शैवरूप्यं ॥ तीररूप्यांतात् किं ॥ तैनो ॥ बहुच् पूर्वान्मा भूत् ॥ बाहुरूप्यं ॥ लिनतृ॰ २
दिक्पूर्वपदादसंज्ञायां ञः ॥ अणोऽपवादः ॥ पौर्वशालः ॥ असंज्ञायां किं ॥ संज्ञाकृतायां अकृतमाभूत् ॥ पूर्वेषुकामशम्यां भ
वः पूर्वेषुकामशमः ॥ प्राचां ग्रामनगराणां ॥ इत्युत्तरपदवृद्धिः ॥ मद्रेभ्योऽञ् ॥ दिक्पूर्वपदादित्येव ॥ दिशोऽमद्राणामिति मद्रपर्यु
दासाद्दिशो वृद्धिः ॥ पौर्वमद्रः ॥ आपरमद्रः ॥ उदीच्यग्रामाच्च बह्वचोऽन्तोदात्तात् ॥ अञ् स्यात् ॥ शैवपुरं ॥ अन्तोदात्तरपदपलघादि
कोपधादण् ॥ माहकिकसः ॥ पारलः ॥ नैलीनकः ॥ कण्वादिभ्यो गोत्रे ॥ एभ्यो गोत्रप्रत्ययांतेभ्योऽण् स्यात् ॥ कण्वा ग ॥ १२१ ॥
र्गादिः ॥ काण्व्यस्य छात्राः काण्वाः ॥ इञश्च ॥ गोत्रे यद् इञ् तदंतादण् स्यात् ॥ दाक्षाः ॥ गोत्रे किं ॥ सौतंगमेरिदं सौतंगमीयं ॥ गो
त्रमिह शास्त्रीयं न तु लौकिकं ॥ तेनेह न ॥ पाणिनीयं ॥ न द्व्यचः प्राच्यभरतेषु ॥ इञः ॥

इत्यणोऽपवादः ॥ प्राष्ठीयाः ॥ काशीयाः ॥ भरतानां प्राच्यत्वेऽपि पृथगुपादानमन्यत्र प्राच्यग्रहणे भरतानामग्रहणस्य लिंगं ॥ वृद्धिर्य
६ स्याचामादिस्तद्वृद्धं ॥ यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात् ॥ त्यदादीनि च ॥ वृद्धसंज्ञानि स्युः ॥ वृद्धाच्छः ॥ शालीय
मालीयः ॥ तदीयः ॥ एङ् प्राचां देशे ॥ एङ् यस्याचामादिस्तद्वृद्धसंज्ञं वा स्याद्देशाभिधाने ॥ एणीपचनीयः ॥ ऐणीपचनः ॥ गोनर्दी
यः ॥ गौनर्दः ॥ भोजकटीयः ॥ भौजकटः ॥ एङ् किं ॥ आहिकाहः ॥ आहिच्छत्रः ॥ कान्यकुब्जः ॥ वा नामधेयस्येति वाच्यं ॥ देवदत्तीयः ॥ दैव वृद्धसंज्ञा
दत्तः ॥ भवतष्ठक्छसौ ॥ वृद्धाद्भवत एतौ स्तः ॥ भावत्कः ॥ ॥ सिति चेति पदत्वात्कुत्वं ॥ भवदीयः ॥ वृद्धादित्यनुवृत्तेः शत्रन्तादेण्
वा भावतः ॥ काश्यादिभ्यष्ठञ्ञिठौ ॥ इकार उच्चारणार्थः ॥ काशिकी ॥ काशिका ॥ वैदिकी ॥ वैदिका ॥ आपदादिपूर्वपदात्कालांतात् ॥
आपदादिराकृतिगणः ॥ आपत्कालिकी ॥ आपत्कालिका ॥ वाहीकग्रामेभ्यश्च ॥ वाहीकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः ॥ छ
स्यापवादः ॥ कास्तीरं नाम वाहीकग्रामः ॥ कास्तीरिकी ॥ कास्तीरिका ॥ विभाषोशीनरेषु ॥ एषु ये ग्रामास्तद्वाचिभ्यो वृद्धेभ्य
ष्ठञ्ञिठौ वा स्तः ॥ सौदर्शनिकी ॥ सौदर्शनिका ॥ ओर्देशे ठञ् ॥ उवर्णांताद्देशवाचिनष्ठञ् ॥ निषादकर्षूः ॥ नैषादकर्षुकः ॥ कणइति

द्रस्व॥ देशे किं॥ पटेच्छात्राः पाटवाः॥ जिठंभ्यावर्त्तयितुं ठञ्ग्रहणं॥ वृद्धाच्छं परत्वादयं बाधते॥ दाक्षिकर्षुकः॥ वृद्धात्प्राचां॥ प्राग्दे त०अ०नो०
॥सि०पू०॥ शवाचिनो वृद्धाद्देवेति नियमार्थं सूत्रं॥ आढकजंबुकः॥ शाकजंबुकः॥ नेह॥ मल्लवास्तकः॥ माल्लवास्तवः॥ धन्वयोपधाद्वुञ्॥ धन्व
॥११२॥ विशेषवाचिनो यकारोपधाच्च देशवाचिनो वृद्धाद्वुञ्स्यात्॥ ऐरावतं धन्व ऐरावतकः॥ सांकाश्यकांपिल्यशब्दौ वुञ्छणादिसूत्रे
ण्ययांतौ॥ सांकाश्यकः॥ कांपिल्यकः॥ प्रस्थपुरवहांताच्च॥ एतदंताद्वृद्धाद्देशवाचिनो वुञ्स्यात्छस्यापवादः॥ मालाप्रस्थकः॥ नां
दीपुरकः॥ पैलुवहकः॥ पुरांतग्रहणमप्रागर्थं॥ प्राग्देशे तु तरणसिद्धं॥ रोपधेतोः प्राचां॥ रोपधादीकारांताच्च प्राग्देशवाचि
नो वृद्धाद्वुञ्स्यात्॥ पाटलिपुत्रकः॥ ईतः॥ काकंदकः॥ जनपदतदवध्योश्च॥ जनपदवाचिनस्तदवधिवाचिनश्च वृद्धाद्वुञ्स्या
त्॥ आदर्शकः॥ त्रैगर्त्तकः॥ अवृद्धादपि बहुवचनविषयात्॥ अवृद्धाद्वृद्धाच्च जनपदतदवधिवाचिनो बहुवचनविषयात्प्रा
९ तिपदिकाद्वुञ्स्यात्॥ अवृद्धाणो वृद्धाच्छस्यापवादः॥ अवृद्धाज्जनपदात्॥ आंगकः॥ अवृद्धाज्जनपदावधेः॥ आजमीढकः॥ ॥११२॥
वृद्धाज्जनपदात्॥ दार्वकः॥ वृद्धाज्जनपदावधेः॥ कालंजरकः॥ विषयग्रहणं किं॥ एकशेषेण बहुत्वे माभूत्॥ वर्त्तनी च वर्त्तन्यः॥

तासु सर्वो वार्त्तनाः॥ कच्छाग्निवक्त्रगर्त्तोत्तरपदात्॥ देशवाचिनो वृद्धादवृद्धाच्च वुञ्स्यात्॥ दारुकच्छकः॥ कांडाग्नकः॥ सैंधुवक्त्रकः॥
बाहुगर्त्तकः॥ धूमादिभ्यश्च॥ देशवाचिभ्यो वुञ्स्यात्॥ धौमकः॥ तैर्थकः॥ नगरात्कुत्सनप्रावीण्ययोः॥ नगरशब्दाद्वुञ्स्यात्कुत्स
ने प्रावीण्ये च गम्ये॥ नागरकश्चौरः॥ शिल्पी वा॥ कुत्सने किं॥ नागराः ब्राह्मणाः॥ अरण्यान्मनुष्ये॥ वुञ्॥ अरण्याण्ण इत्यस्यापवा
दः॥ पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वाच्यं॥ आरण्यकः पंथाः॥ अध्यायो न्यायो विहारो मनुष्यो हस्ती वा॥ वा गोमये
षु॥ आरण्यका आरण्या वा गोमयाः॥ विभाषा कुरुयुगंधराभ्यां॥ वुञ्॥ कौरवकः॥ यौगंधरकः॥ यौगंधरः॥ मद्रवृज्योः कन्॥
जनपदवुञोपवादः॥ मद्रेषु जातो मद्रकः॥ वृजिकः॥ कोपधादण्॥ माहिषिकः॥ कच्छादिभ्यश्च॥ देशवाचिभ्योण्॥ वुञादेरप
वादः॥ काच्छः॥ सैंधवः॥ मनुष्यतत्स्थयोर्वुञ्॥ कच्छादिभ्य अणोपवादः॥ कच्छे जातादिः काच्छको मनुष्यः॥ काच्छकं हसितं
मेति किं॥ काच्छो गौः॥ अपद[illegible]तौ साल्वात्॥ साल्वशब्दस्य कच्छादित्वात्सिद्धे नियमार्थमिदं॥ अपदातावेवेति॥ सा
ल्वः पदातिर्व्रजति॥ गोयवाग्वोश्च॥ साल्वाद्वुञ्॥ कच्छाद्यणोपवादः॥ साल्वको गौः॥ साल्विका यवागूः॥ साल्वमन्यत्॥

॥ सि० पू० ॥ गर्त्तोत्तरपदाच्छः ॥ देशे अणोपवादः ॥ वृकगर्त्तीयं ॥ उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थं ॥ वाहुगर्त्तं ॥ गहादिभ्यश्च ॥ छः ॥ गहीयं ॥ मु
खपार्श्वतसोर्लोपश्च ॥ मुखतीयं ॥ पार्श्वतीयं ॥ अव्ययानां भमात्रे टिलोपस्यानित्यतां ज्ञापयितुमिदं ॥ कुग्जनस्य परस्य च ॥ अलौ स्यस्येति स लोपः यस्येति लोप
॥ १२३ ॥ जनकीयं ॥ परकीयं ॥ देवकीयं ॥ स्वस्य च ॥ स्वकीयं ॥ वेणुकादिभ्यश्छण्वाच्यः ॥ वेणुकीयं ॥ वेत्रकीयं ॥ औत्तरपदकीयं ॥ प्रासांकय ग० अ० १०
दे ॥ प्राग्देशवाचिनः कटादेश्छः स्यादणोपवादः ॥ कटनगरीयं ॥ कटघोषीयं ॥ कटपल्वलीयं ॥ राज्ञः कच ॥ वृद्धाच्छे सिद्धे
तात्संनियोगेन कादेशमात्रं विधीयते ॥ राजकीयं ॥ वृद्धादकेकान्तखोपधात् ॥ अकइक एवमंतात् खोपधाच्च वृद्धाद्देशवाचिनश्छः
स्यात् ॥ ब्राह्मणको नाम जनपदः यत्र ब्राह्मणा आयुधजीविनः तत्र जनपदे जातो ब्राह्मणकीयः ॥ शाल्मलिकीयः ॥ आयोमुखीयं ॥
कंथापलदनगरग्रामह्रदोत्तरपदात् ॥ कंथादिपंचकोत्तरपदाद्देशवाचिनो वृद्धाच्छः स्यात् ॥ ठञ्ञिठोरपवादः ॥ दाक्षिकंथीयं ॥ ॥ १२३ ॥
दाक्षिपलदीयं ॥ दाक्षिनगरीयं ॥ दाक्षिग्रामीयं ॥ दाक्षिह्रदीयं ॥ पर्वताच्च ॥ पर्वतीयं ॥ विभाषाऽमनुष्ये ॥ मनुष्यभिन्नेर्थे पर्वता
च्छो वा स्यात् ॥ पक्षेण ॥ पर्वतीयानि पार्वतानि वा फलानि ॥ अमनुष्ये किं ॥ पर्वतीयो मनुष्यः ॥ कृकणपर्णाद्भारद्वाजे ॥ भार

द्वाजदेशवाचिभ्यामाभ्यां छः ॥ कृकणीयं ॥ पर्णीयं ॥ नेति किं ॥ कार्कणं ॥ पार्णं ॥ देशाधिकारो निवृत्तः ॥ ॥ युष्मदस्मदोरन्यतरस्यां
खञ्च ॥ चाच्छः ॥ पक्षेऽण् ॥ युवयोर्युष्माकं वायं युष्मदीयः ॥ अस्मदीयः ॥ तस्मिन्नणि च युष्माकास्माकौ ॥ युष्मदस्मदोरेतावादेशौ स्तः
खञि अणि च ॥ यौष्माकीणः ॥ आस्माकीनः ॥ यौष्माकः ॥ आस्माकः ॥ तवकममकावेकवचने ॥ एकार्थवाचिनोर्युष्मदस्मदोरेतौ
वकममकौ स्तः ॥ खञि अणि च ॥ तावकीनः ॥ तावकः ॥ मामकीनः ॥ मामकः ॥ छे तु ॥ प्रत्ययोत्तरपदयोश्च ॥ मपर्यंतयोरेकार्थ
योस्त्वमौ स्तः प्रत्यये उत्तरपदे च ॥ त्वदीयः ॥ मदीयः ॥ त्वत्पुत्रः ॥ मत्पुत्रः ॥ अर्द्धाद्यत् ॥ अर्द्ध्यं ॥ परावराधमोत्तमपूर्वाच्च ॥ परार्द्ध्यं
अवरार्द्ध्यं ॥ अधमार्द्ध्यं ॥ उत्तमार्द्ध्यं ॥ दिक्पूर्वपदाट्ठञ् च ॥ चाद्यत् ॥ पौर्वार्द्धिकं ॥ पूर्वार्द्ध्यं ॥ ग्रामजनपदैकदेशाद्दञ्ठञौ ॥ ग्रामै
कदेशवाचिनो जनपदैकदेशवाचिनश्च दिक्पूर्वपदादर्द्धान्तादेतौ स्तः ॥ इमे अस्माकं ग्रामस्य जनपदस्य वा पौर्वार्द्धाः
तद्धितार्थोत्तर पौर्वार्द्धिकाः ॥ ग्रामस्य पूर्वस्मिन्नर्द्धे भवा इति तद्धितार्थे समासः ॥ ठञ्ग्रहणं स्पष्टार्थं ॥ अन्यथा हि कालेयतोप्यनुकर्षः संभा अनुवृत्तिः २
पदे सति २ व्येत ॥ मध्यान्मः ॥ मध्यमः ॥ अ सांप्रतिके ॥ मध्यशब्दादकारप्रत्ययः स्यात् सांप्रतिकेर्थे ॥ उत्कर्षापकर्षहीनो मध्यो वैयाक

रणः ॥ मध्यं दारु ॥ नातिह्रस्वं नातिदीर्घमित्यर्थः ॥ द्वीपादनुसमुद्रं यञ् ॥ समुद्रसमीपे यो द्वीपस्तत्र भवं द्वैप्यं ॥ द्वीपशब्दाद्घञ्स्यात् ॥ द्वैप्यं द्वै त॰ अ॰ शे॰
॥ सि॰ पू॰ ॥ प्या ॥ कालाट्ठञ् ॥ कालवाचिभ्यष्ठञ्स्यात् ॥ मासिकं ॥ सांवत्सरिकं ॥ सायंप्रातिकः ॥ पौनःपुनिकः ॥ कथं तर्हि शार्वरस्य तम अव्ययानां भमात्रे टिलोपः २
सो निषिद्धये इति कालिदासः ॥ अनुदितौषसरागेति भारविः ॥ समानकालीनं प्राक्कालीनमित्यादि च ॥ अपभ्रंश एवैत इति प्रामा
॥ ११५ ॥ णिकाः ॥ तत्र जात इति यावत्कालाधिकारः ॥ श्राद्धे शरदः ॥ ठञ् स्यात् ॥ संधिवेलेति ऋत्वणोऽपवादः ॥ शारदिकं श्राद्धं ॥ विभाषा रोगातप
योः ॥ शारदिकः शारदो वा रोगः आतपो वा ॥ इतयोः किं ॥ शारदं दधि ॥ निशाप्रदोषाभ्यां च ॥ ठञ् वा स्यात् ॥ नैशिकं ॥ नैशं ॥ प्रादोषिकं ॥ प्रा
दोषं ॥ श्वसस्तुट् च ॥ श्वस्शब्दाट्ठञ्वा स्यात्तस्य तुडागमश्च ॥ द्वारादीनां च ॥ द्वार ॥ स्वर ॥ श्वल्कश ॥ स्वस्ति ॥ स्वर ॥ स्फ्यकृत ॥ स्वादु ॥ मृदु
श्वस् ॥ श्वन् ॥ स्व ॥ एषां न वृद्धिरैजागमश्च ॥ शौवस्तिकं ॥ संधिवेलाद्यृतुनक्षत्रेभ्योऽण् ॥ संधिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च का
लवाचिभ्योऽण् स्यात् ठञोऽपवादः ॥ संधिवेलायां भवं सांधिवेलं ॥ ग्रैष्मं ॥ तैषं ॥ संधिवेला संध्या ॥ अमावास्या ॥ त्रयोदशी ॥ चतुर्दशी ॥ ११५ ॥
पंचदशी ॥ पौर्णमासी ॥ प्रतिपद् ॥ संवत्सरात्फलपर्वणोः ॥ सांवत्सरं फलं पर्व वा ॥ सांवत्सरिकमन्यत् ॥ प्रावृष एण्यः ॥ प्रावृषेण्यः ॥

वर्षाभ्यष्ठक् ॥ वर्षासु साधु वार्षिकं वासः ॥ कालात्साधुपुष्यत्पच्यमानेष्विति साधर्म्ये ॥ सर्वत्राण् च तलोपश्च ॥ हेमंताद
णस्यात्तलोपश्च लोके वेदे च ॥ वकारात्परे ऋत्वण् ॥ हैमनं ॥ हैमंतं ॥ सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च ॥ साय
मित्यादिभ्यश्चतुर्भ्यः अव्ययेभ्यश्च कालवाचिभ्यष्ट्युट्युलौ स्तस्तयोस्तुट् च ॥ तुटः प्रागनादेशः ॥ अनघ तन इत्यादि नि
र्देशात् ॥ सायंतनं ॥ चिरंतनं ॥ प्राह्णप्रगयोरेदंतत्वं निपात्यते ॥ प्राह्णेतनं ॥ प्रगेतनं ॥ दोषातनं ॥ दिवातनं ॥ चिरपरुत्परारि
भ्यस्त्नो वक्तव्यः ॥ चिरत्नं ॥ परुत्नं ॥ परारित्नं ॥ अग्रादिपश्चाड्डिमच् ॥ अग्रिमं ॥ आदिमं ॥ पश्चिमं ॥ अंताच्च ॥ अंतिमं ॥ वि
भाषा पूर्वाह्णापराह्णाभ्यां ॥ आभ्यां ट्युट्युलौ वा स्तस्तयोस्तुट् च ॥ पक्षे ठञ् ॥ पूर्वाह्णेतनं ॥ अपराह्णेतनं ॥ घकालतने
षित्यलुक् ॥ पूर्वाह्णः सोढोऽस्येति विग्रहे तु पूर्वाह्णतनं ॥ अपराह्णतनं ॥ पौर्वाह्णिकं ॥ आपराह्णिकं ॥ ॥ तत्र जा
तः ॥ सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः ॥ स्रुघ्ने जातः स्रौघ्नः ॥ औत्सः ॥ राष्ट्रियः ॥ अवारपारीण इ
त्यादि ॥ प्रावृषष्ठप् ॥ एण्यस्यापवादः ॥ प्रावृषि जातः प्रावृषिकः ॥ संज्ञायां शरदो वुञ् ॥ ऋत्वणोऽपवादः ॥ शारदकाः

र्णविशेषाणां दिग्विशेषाश्च॥ उत्तरपदस्य च॥ अधिकारोऽयं॥ हनस्त इत्यस्मात्प्राक्॥ अवयवादृतोः॥ अवयववाचिनः पूर्वपदादृतुवाचि त० शौध०
॥सि० कौ०॥ नोऽचामादेरचो वृद्धिर्ञिति णिति किति च तद्धिते परे॥ पूर्ववार्षिकः॥ अपरहैमनः॥ अवयवात्किं॥ पूर्वासु वर्षासु भवः पौर्ववर्षिकः॥ सुसर्वार्द्ध
॥१२५॥ द्धिर्माद्धाकर्त्तव्ये वयवामितितदंतविधिः पूर्वत्र॥ इह तु न अवयवत्वाभावात्॥ सुसर्वार्द्धाज्जनपदस्य॥ उत्तरपदस्य वृद्धिः स्यात्॥ सु
पांचालकः॥ सर्वपांचालकः॥ अर्धपांचालकः॥ जनपदतदवध्योरिति वुञ्॥ सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्येति तदंतविधिः॥ दिशोऽ
मद्राणां॥ दिग्वाचकाज्जनपदवाचिनो वृद्धिः॥ पूर्वपांचालकः॥ दिशः किं॥ पूर्वं पंचालानामयं पौर्वपंचालः॥ अमद्राणां किं॥ पौर्वमद्रः॥
योगविभाग उत्तरार्थः॥ प्राचां ग्रामनगराणां॥ दिशः परेषां नगरवाचिनां ग्रामवाचिनां चावयवस्य वृद्धिः॥ पूर्वेषुकामशम्यां भवः
पूर्वेषुकामशमः॥ नगरे॥ पूर्वपाटलिपुत्रकः॥ ग्रामे॥ पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन्॥ पूर्वाह्णकः॥ अपराह्णकः॥ आर्द्रकः॥
मूलकः॥ प्रदोषकः॥ अवस्करकः॥ पथः पंथ च॥ पथि जातः पंथकः॥ अमावास्याया वा॥ अमावास्यकः॥ आमावास्यः॥ अ च॥ अमावास्यः॥ ॥१२५॥
सिंध्वपकराभ्यां कन्॥ सिंधुकः॥ कच्छादिषु मनुष्यवुञि प्राप्ते॥ अपकरकः॥ औत्सर्गिकेऽणि प्राप्ते॥ अणञौ च॥ सैंधवः॥ सैं
धवः॥ आपकरः॥ श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक्॥ एभ्यो नक्षत्रवाचिभ्यः पर

स्य जातार्थप्रत्ययस्य लुक् स्यात्॥ लुक् तद्धितलुकि॥ तद्धितलुकि उपसर्जनस्त्रीप्रत्ययस्य लुक् स्यात्॥ श्रविष्ठासु जातः श्रविष्ठः॥
फल्गुन इत्यादि॥ चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानं॥ चित्रायां जाता चित्रा॥ रेवती॥ रोहिणी॥ आभ्यां लुक् तद्धित
लुकीति लुकि कृते पिप्पल्यादिराकृतिगणत्वात् पुनर्ङीष्॥ फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ॥ स्त्रियामित्येव॥ फल्गुनी॥ अषाढा॥
श्रविष्ठाषाढाभ्यां छण् वक्तव्यः॥ अस्त्रियामपि॥ श्राविष्ठीयः॥ आषाढीयः॥ जे प्रोष्ठपदानां॥ प्रोष्ठपदानामुत्तरपदस्याचामादेर
चो वृद्धिर्जातार्थे ञिति णिति किति च॥ प्रोष्ठपदासु जातः प्रौष्ठपदो माणवकः॥ जे इति किं॥ प्रोष्ठपदासु भवः प्रोष्ठपदः॥ बहुव
चननिर्देशात्पर्यायोऽपि गृह्यते॥ भाद्रपदः॥ स्थानांतगोशालखरशालाच्च॥ एभ्यो जातार्थस्य लुक् स्यात्॥ गोस्थाने जातः गोस्था
नः॥ गोशालः॥ खरशालः॥ विभाषा सेनेति नपुंसकत्वे ह्रस्वत्वं॥ वत्सशालाभिजिदश्वयुक्छतभिषजो वा॥ एभ्यो जातार्थप्र
त्ययस्य लुग्वा स्यात्॥ वत्सशाले जातो वत्सशालः॥ वात्सशाल इत्यादि॥ जातार्थे प्रतिप्रसूतो ठञ् ञ्यडिद्वा वक्तव्यः॥ शातभिषः॥ शात
भिषजः॥ शातभिषिकः॥ नक्षत्रेभ्यो बहुलं॥ जातप्रत्ययस्य बहुलं लुक् स्यात्॥ रोहिणः॥ रौहिणः॥ कृतलब्धक्रीतकुशलाः॥ त

तेत्येव॥ तत्र कृतो लब्धः कुशलो वा स्रौघ्नः॥ प्रायभवः॥ तत्रेत्येव॥ स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः॥ उपजानूपकर्णोप ॥त॰ शे॰
॥सि॰कौ॰॥ नीवेष्ठक्॥ औपजानुकः॥ औपकर्णिकः॥ औपनीविकः॥ संभूते॥ स्रुघ्ने संभवति स्रौघ्नः॥ कोशाड्ढञ्॥ कौशेयं वस्त्रं॥ काला
त्साधुपुष्प्यत्पच्यमानेषु॥ हेमंते साधुः हैमंतः प्राकारः॥ वसंते पुष्प्यंति वासंत्यः कुंदलताः॥ शरदि पच्यंते शारदाः शालयः॥
॥११८॥ उप्ते च॥ हेमंते उप्यंते हैमंता यवाः॥ आश्वयुज्या वुञ्॥ ठञोऽपवादः॥ आश्वयुज्यामुप्ता आश्वयुजका माषाः॥ ग्रीष्मवसंता
दन्यतरस्यां॥ पक्षे ऋत्वण्॥ ग्रैष्मकं॥ ग्रैष्मं॥ वासंतकं॥ वासंतं॥ देयमृणे॥ कालादित्येव॥ मासे देयमृणं मासिकं॥ कला
प्यश्वत्थयवबुसाद्वुन्॥ यस्मिन्काले मयूराः कलापिनो भवंति स उपचारात्कलापी॥ तत्र देयमृणं कलापकं॥ अश्वत्थस्य
फलमश्वत्थः॥ तद्युक्तः कालोऽश्वत्थः॥ यस्मिन्काले अश्वत्थाः फलंति तत्र देयमृणमश्वत्थकं॥ यस्मिन्यवबुसमुत्पद्यते तत्र देय
मृणं यवबुसकं॥ ग्रीष्मावरसमाद्वुञ्॥ ग्रीष्मे देयमृणं ग्रैष्मकं॥ आवरसमकं॥ संवत्सराग्रहायणीभ्यां ठञ्च॥ चाद्वुञ्॥ सां ॥११६॥
वत्सरिकं॥ सांवत्सरकं॥ आग्रहायणिकं॥ आग्रहायणकं॥ व्याहरति मृगः॥ कालवाचिनः सप्तम्यंतात्शब्दायते इत्यस्मि

न्नर्थे अणादयः स्युर्यो व्याहरति स मृगश्चेत्॥ निशायां व्याहरति नैशो मृगः॥ नैशिकः॥ तदस्य सोढं॥ कालादित्येव॥ निशासहच
रितमध्ययनं निशा॥ तत्सोढमस्य नैशः॥ नैशिकः॥ तत्र भवः॥ स्रुघ्ने भवः स्रौघ्नः॥ राष्ट्रियः॥ दिगादिभ्यो यत्॥ दिश्यं॥ वर्ग्यं॥ शरीरा
वयवाच्च॥ दंत्यं॥ कर्ण्यं॥ प्राचां नगरांते॥ प्राचां देशे नगरांतेंऽगे पूर्वपदस्योत्तरपदस्य चाचामादेरचो वृद्धिर्ञिति णिति किति च॥
सुह्मनगरे भवः सौह्मनागरः॥ पौंड्रनागरः॥ प्राचां किं॥ मद्रनगरमुदक्षु॥ तत्र भवः माद्रनगरः॥ जंगलधेनुवलजांतस्य विभाषि
तमुत्तरं॥ जंगलाद्यंतस्यांगस्य पूर्वपदस्याचामादेरचो वृद्धिः उत्तरपदस्य वा ञिति णिति किति च॥ कुरुजंगले भवं कौरुजांग
लं॥ कौरुजंगलं॥ वैश्वधेनवं॥ वैश्वधैनवं॥ सौवर्णवालजं॥ सौवर्णवलजं॥ दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्॥ दार्तेयं॥ कौ
क्षेयं॥ कलशिर्घटः॥ तत्र भवं कालशेयं॥ वास्तेयं॥ वस्तिर्नाभेरधोभागः॥ ग्रीवाभ्योऽण्च॥ चाड्ढञ्॥ ग्रैवेयं॥ ग्रैवं॥ गंभीरा
ञ्ञ्यः॥ गंभीरे भवं गांभीर्यं॥ पंचजनादुपसंख्यानं॥ पंचजनो देशः॥ पांचजन्यः॥ अव्ययीभावाच्च॥ परिमुखं भवं पारिमुख्यं॥
परिमुखादिभ्य एवेष्यते॥ नेह॥ औपकूलं॥ अंतःपूर्वपदाट्ठञ्॥ अव्ययीभावादित्येव॥ वेश्मनि अंतर्वेश्म॥ तत्र भवमांतर्वेश्म

मिकं॥ आंतर्गणिकं॥ अध्यात्मादिषुचेष्यते॥ अध्यात्मसवमाध्यात्मिकं॥ अनुशतिकादीनांच॥ एषामुभयपदवृद्धिर्नि त॰शौ॰१॰
॥सि॰कृ॰॥ तिणितिकित्रिव॰ आधिदैविकं॥ आधिभौतिकं॥ इहलौकिकं॥ पारलौकिकं॥ अध्यात्मादिराकृतिगणः॥ देविकाशिंशपा
॥११८॥ दित्यवाड्दीर्घसत्रश्रेयसामात्॥ एषांपर्वानां द्वितुप्रसंगादरत आत्‌ जितिणितिकितिन॥ दाविकं॥ देविकाकूलेभवादावि
काकूलाः शालयः॥ शिंशपायाः विकारः शांशपश्चमसः॥ पलाशादिभ्योवेत्यञ्॥ दित्यौहदं दाधौहं॥ दीर्घसत्रेभवं दार्घसत्रं॥
श्रेयसिभवंश्रायसं॥ आमात्यर्यंतुपूर्वात्॥ ठञ्स्यात्॥ अव्ययीभावादित्येव॥ पारिग्रामिकः॥ आनुग्रामिकः॥ जिह्वामूलां
गुलेश्छः॥ जिह्वामूलीयं॥ अंगुलीयं॥ वर्गांताच्च॥ कवर्गीयं॥ अशाब्देयत्खावन्यतरस्यां॥ पक्षपूर्वेणठः॥ महर्ग्यः॥ महर्गीयः॥
महर्गीणः॥ अशाब्दिकं॥ कवर्गीयोवर्णः॥ कर्णललाटात्कनलंकारे॥ कर्णिका॥ ललाटिका॥ तस्यव्याख्यानइतिचव्याख्यातव्य ॥११०॥
नाम्नः॥ सुपांव्याख्यानतः सौपोग्रंथः॥ सौपं॥ कार्तं॥ सुप्सुक्तमवंसौपं॥ बहुचोंतोदात्ताट्ठञ्॥ पल[illegible]णत्वयोर्विधायकंशा
स्त्रंपालणत्वं॥ तस्यव्याख्यानस्तत्रभवोवाषात्वणालिकः॥ क्रतुयज्ञेभ्यश्च॥ सोमसाध्येषुयागेष्वेतोप्रसिद्धा॥ तत्रान्य

उभयोरेकस्यग्रहणेनैवसिद्धे॥ बहुचोंतोदात्ताट्ठञिति सिद्धे॥
तरोपादानेनसिद्धे उभयोपादानसामर्थ्यादसोमकादपीहप्रत्यंते॥ अग्निष्टोमस्यव्याख्यानस्तत्रभवोवा आग्निष्टोमिकः॥
वाजपेयिकः॥ पाकयज्ञिकः॥ नावयज्ञिकः॥ बहुचवचनंस्वरूपविधिनिरासार्थं॥ अनंतोदात्तार्थमारंभ॥ अध्यायेष्वेवर्षेः॥ ऋषि
शब्देभ्योलक्षणयाध्याध्यायेषु वृत्तिभ्यस्तव्याख्यानेवाठञ्स्यात्॥ वसिष्ठेनदृष्टोमंत्रोवसिष्ठस्तस्यव्याख्यातत्तत्रभवो
वा॥ वासिष्ठिकोऽध्यायः॥ अध्यायेष्विति किं॥ वासिष्ठीऋक्॥ पौरोडाशपुरोडाशात्ष्ठन्॥ पुरोडाशसहचरितोमंत्रः पुरोडाश
सएवपौरोडाशः तत्रष्ठन्॥ पौरोडाशिकः॥ पुरोडाशिकः॥ छंदसोयदणौ॥ छंदस्यः॥ छांदसः॥ द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुर
श्चरणनामाख्याताट्ठक्॥ द्व्यचः॥ ऐष्टिकः॥ पाशुकः॥ ऋत॥ चातुर्होतृकः॥ ब्राह्मणिकं॥ आर्चिकइत्यादि॥ अणृगयनादि
भ्यः॥ ठञोपवादः॥ आर्गयनः॥ औपनिषदः॥ वैय्याकरणः॥ ततआगतः॥ स्रुघ्नादागतः स्रौघ्नः॥ ठगायस्थानेभ्यः
भ्यः॥ शुल्कशालायाआगतः शौल्कशालिकः॥ शुंडिकादिभ्योऽण्॥ आयस्थानठकोपवादः॥ शुंडिकादागतः॥
शौंडिकः॥ कार्कणः॥ तैर्थः॥ विद्यायोनिसंबंधेभ्योवुञ्॥ औपाध्यायकः॥ पैतामहकः॥ ऋतष्ठञ्॥ वुञोपवादः॥ हौतृकं॥

भ्रातृकं ॥ पितुर्यच्च ॥ ताभ्यां । रीङृतः ॥ यस्येति लोपः ॥ पितुरागतं पित्र्यं । पैतृकं ॥ गोत्रादंकवत् ॥ बिदेभ्य आगतं बैदं । गार्गं दाक्षं । तद्धि॰
सि॰पू॰ औपगवकं । नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानां ॥ नञः परेषामेषामादेरचो वृद्धिः पूर्वपदस्य तु वा ञिदादौ परे । आ
शौचं । अशौचं । आनैश्वर्यं । अनैश्वर्यं । आक्षैत्रज्ञं । अक्षैत्रज्ञं । आकौशलं । अकौशलं । आनैपुणं । अनैपुणं ॥ हेतुमनुष्येभ्योऽन्यत
११९ रस्यां रूप्यः ॥ समादागतं समरूप्यं । विषमरूप्यं । पक्षे गहादित्वाच्छः । समीयं । विषमीयं । देवदत्तरूप्यं । दैवदत्तं । मयट् च । सममयं ।
देवदत्तमयं । विषममयं । देवदत्तमयं ॥ प्रभवति ॥ ततस्त्वेव । हिमवतः प्रभवति हैमवती गंगा ॥ विदूराञ्ञ्यः ॥ विदूरात्प्र
भवति वैदूर्यो मणिः ॥ तद्गच्छति पथिदूतयोः ॥ स्रुघ्नं गच्छति स्रौघ्नः पन्थाः दूतो वा ॥ अभिनिष्क्रामति द्वारं ॥ तदित्येव । स्रुघ्नमभि
निष्क्रामति स्रौघ्नं कान्यकुब्जद्वारं ॥ अधिकृत्य कृते ग्रन्थे ॥ तदित्येव । शारीरकमधिकृत्य कृतो ग्रन्थः शारीरकीयः । शारीरकं भाष्यमिति त्व
भेदोपचारात् ॥ शिशुक्रन्दयमसभद्वंद्वेन्द्रजननादिभ्यश्छः ॥ शिशूनां क्रन्दनं शिशुक्रन्दः । तमधिकृत्य कृतो ग्रन्थः । शिशुक्रन्दीयः । ११९
यमस्य सभा यमसभं । क्लीबत्वं निपातनात् । यमसभीयः ॥ किरातार्जुनीयं ॥ द्वंद्वे देवासुरादिभ्यः प्रतिषेधो वक्तव्यः । देवा
सुरं । राक्षासुरं ॥ इन्द्रजननादिराकृतिगणः ॥ इन्द्रजननीयं । विरुद्धभोजनीयं ॥

सोऽस्य निवासः ॥ स्रुघ्नो निवासोऽस्य स्रौघ्नः ॥ अभिजनश्च ॥ स्रुघ्नोऽभिजनोऽस्य स्रौघ्नः ॥ यत्र स्वयं निवसति स निवासः । यत्र पूर्वैरुषि
तं सोऽभिजन इति विवेकः ॥ आयुधजीविभ्यश्छः पर्वते ॥ पर्वतवाचिनः प्रथमान्तादभिजनशब्दादस्येत्यर्थे छः स्यात् ॥ हृद्गोलः पर्वतो
ऽभिजन एषामायुधजीविनां ते हृद्गोलीयाः ॥ आयुधजीविभ्यः किं ॥ ऋक्षोदः पर्वतोऽभिजनो येषां ते आर्क्षोदाः द्विजाः ॥ शांडिकादिभ्यो ञ्यः ॥
शांडिकोऽभिजनोऽस्य शांडिक्यः ॥ सिन्धुतक्षशिलादिभ्योऽणञौ ॥ सिन्ध्वादिभ्योऽण् तक्षशिलादिभ्योऽञ् स्यादुक्तेऽर्थे । सैन्धवः । तक्ष
शिला नगरी अभिजनोऽस्य ताक्षशिलः ॥ तूदीसलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः ॥ तूदी अभिजनोऽस्य तौदेयः ॥ शालातु
रीयः । वार्मतेयः । कौचवार्यः ॥ भक्तिः ॥ सोऽस्येत्यनुवर्त्तते । भज्यते सेव्यत इति भक्तिः ॥ स्रुघ्नो भक्तिरस्य स्रौघ्नः ॥ अचित्ताद
देशकालाट्ठक् ॥ अपूपा भक्तिरस्य आपूपिकः । पायसिकः ॥ अचित्तात्किं । दैवदत्तः ॥ अदेशात्किं । स्रौघ्नः ॥ अकालात्किं । ग्रै
ष्मः ॥ महाराजाट्ठञ् ॥ माहाराजिकः ॥ वासुदेवार्जुनाभ्यां वुन् ॥ वासुदेवकः ॥ अर्जुनकः ॥ गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् ॥ अणोऽप
वादः । परत्वाद्वृद्धाच्छं बाधते ॥ ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनकः ॥ नाकुलकः ॥ बहुलग्रहणान्नेह ॥ पाणिनो भक्तिर
स्य पाणिनीयः ॥ जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने ॥ जनपदस्वामिवाचिनां बहुवचने

जनपदवाचिनांसमानश्रुतीनांजनपदवत्सर्वंस्यात्प्रत्ययःप्रकृतिश्च। जनपदतदवध्योश्चेतिप्रकरणेयेप्रत्ययाउक्तास्तेत्रा त०शै०
॥सि०कौ०॥ तिदिश्यंते। अंगाः जनपदोभक्तिरस्यांगकः॥ अंगाःक्षत्रियाःभक्तिरस्यांगकः॥ जनपदिनांकिं। पंचालाः ब्राह्मणाभक्तिरस्य
पांचालः॥ जनपदेनेतिकिं। पौरवोराजाभक्तिरस्यपौरवीयः॥ ॥तेनप्रोक्तं॥ पाणिनिनाप्रोक्तंपाणिनीयं। तित्तिरिवर
॥११९॥ तंतुखंडिकोखाच्छण्॥ छंदोब्राह्मणानीतितद्विषयता। तित्तिरिणाप्रोक्तमधीयतेतैत्तिरीयाः॥ काश्यपकौशिकाभ्यामृषिभ्यांणिनिः॥ का
श्यपेनप्रोक्तमधीयतेकाश्यपिनः॥ कौशिकिनः॥ कलापिवैशंपायनांतेवासिभ्यश्च॥ कलाप्यंतेवासित्वः॥ हरिद्रुणाप्रोक्तमधीय
तेहारिद्रविणः॥ वैशंपायनांतेवासिभ्यः आलंबिनः॥ पुराणप्रोक्तेषुब्राह्मणकल्पेषु॥ तृतीयांतात्प्रोक्तार्थेणिनिःस्याद्यत्प्रोक्तं॥
पुराणप्रोक्ताश्चेद्ब्राह्मणकल्पास्तेभवंति॥ पुराणेनचिरंतनेनप्रोक्ताःभाल्लविनः॥ शाट्यायन। शाट्यायनिनः॥ कल्पे। पिंग
पैंगीकल्पः॥ पुरेतिकिं॥ याज्ञवल्क्यानिब्राह्मणानि। आश्मरथःकल्पः॥ अणिआपत्यस्येतियलोपः॥ कठचरकाल्लुक्॥ आभ्यां ॥११९॥
प्रोक्तप्रत्ययस्यलुक्। कठेनप्रोक्तमधीयतेकठाः॥ चरकाः॥ कलापिनोऽण्॥ कलापिनाप्रोक्तमधीयतेकालापाः॥ नांतस्यटिलो
पेसब्रह्मचारिपीठसर्पिकलापिकौथुमितैतिलिजाजलिलांगलिशिलालिशिखंडिसूकरसद्मसुपर्वणामुपसंख्यानं॥ ॥

टुक्पसंख्यानाट्टिलोपः॥ छगलिनोढिनुक्॥ छगलिनाप्रोक्तमधीयतेछागलेयिनः॥ पाराशर्यशिलालिभ्यांभिक्षुनटसूत्रयोः॥ णिनिः
स्यात्॥ पाराशर्येणप्रोक्तंभिक्षुसूत्रमधीयतेपाराशरिणोभिक्षवः॥ शैलालिनोनटाः॥ कर्मंदकृशाश्वादिनिः॥ भिक्षुनटसूत्रयोरित्येव॥ कर्मं
देनप्रोक्तमधीयतेकर्मंदिनोभिक्षवः॥ कृशाश्विनोनटाः॥ तेनैकदिक्॥ सुदाम्नाअद्रिणाएकदिक्सौदामिनी॥ तसिश्च॥ स्वरादिपाठादव्यय
त्वं॥ पीलुमूलेनैकदिक्पीलुमूलतः॥ उरसोयच्च॥ चात्तसिः॥ अणोपवादः॥ उरसाएकदिक्उरस्यः॥ उरस्तः॥ उपज्ञाते॥ तेनेत्येव॥ पाणिनाउपज्ञा
तंपाणिनीयं॥ कृतेग्रंथे॥ वररुचिनाकृताग्रंथावाररुचाः॥ संज्ञायां॥ तेनेत्येव॥ अयंयथार्थ्यमिदं॥ मक्षिकाभिःकृतंमाक्षिकंमधु॥ कुलाला
दिभ्योवुञ्॥ तेनकृतेसंज्ञायां॥ कुलालेनकृतंकौलालकं॥ वारुडकं॥ क्षुद्राभ्रमरवटरपादपादञ्॥ तेनकृतेसंज्ञायां॥ क्षुद्राभिःकृ
तंक्षौद्रं॥ भ्रामरं॥ वाटरं॥ पादपं॥ ॥तस्येदं॥ उपगोरिदमौपगवं॥ वहेस्तुरणिट्च॥ तृप्रत्ययांताद्वहेः॥ संवोढुःस्वंसांवहित्रं॥
अग्नीधःशरणेरण्भंच॥ भसंज्ञात्वान्नजश्त्वं॥ अग्निमिंधेदीपयतिअग्नीत्॥ तस्यस्थानंआग्नीध्रं॥ तात्स्थ्यात्सोप्याग्नीध्रः॥ समिधा
माधानेषेण्यण्॥ सामिधेन्योमंत्रः॥ सामिधेनीऋक्॥ रथाद्यत्॥ रथ्यंचक्रं॥ पत्रपूर्वादञ्॥ पत्रवाहनं॥ अश्वरथस्येदमाश्वरथं॥ पत्राध्व
र्युपरिषदश्च॥ अश्वाःपत्रादयः॥ अश्वस्येदंवहनीयंआश्वं॥ आध्वर्यवं॥ पारिषदं॥ हलसीराट्ठक्॥ हालिकं॥ सैरिकं॥ द्वंद्वाद्वुन्वैरमैथु

निकयोः ॥ काकोलूकिका ॥ कुत्सकुशिकिका ॥ द्वंद्वे देवासुरादिभ्यः प्रतिषेधः ॥ दैवासुरं ॥ गोत्रचरणाद्वुञ् ॥ गोत्रवाचिभ्यश्चरणवाचिभ्यश्च प्राति त॰ शै॰ प॰
॥सि॰कौ॰॥ पदिकेभ्यो वुञ् ॥ औपगवकं ॥ चरणाद्धर्माम्नाययोरिति वक्तव्यं ॥ काठकं ॥ संघांकलक्षणेष्वञ्यञिञामण् ॥ घोषग्रहणमपि कर्तव्यं
अञ् ॥ बैदः संघोंको घोषो वा ॥ बैदं लक्षणं ॥ यञ् ॥ गार्ग्यः ॥ गार्गः ॥ इञ् ॥ दाक्षिः ॥ दाक्षः ॥ परंपरासंबंधोंकः ॥ साक्षात्तु लक्षणं ॥ शाकलाद्वा ॥ अ
॥१२०॥ णवो वक्तव्यः ॥ पक्षे चरणाद्वुञ् ॥ शाकलेन प्रोक्तमधीयते शाकलाः ॥ तेषां संघोंको घोषो वा शाकलः ॥ शाकलकः ॥ शाकलकं लक्षणं ॥
छंदोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः ॥ छंदोगानां धर्म आम्नायो वा छांदोग्यं ॥ औक्थिक्यं ॥ याज्ञिक्यं ॥ बाह्वृच्यं ॥ नाट्यं ॥ चरणाद्धर्मा
म्नाययोरित्युक्तं ॥ तत्साहचर्यान्नटशब्दादपि तयोरेव ॥ न दंडमाणवांतेवासिषु ॥ दंडप्रधाना माणवा दंडमाणवास्तेषु शिष्ये च वु
ञ् न स्यात् ॥ दाक्षाः दंडमाणवाः शिष्या वा ॥ रैवतिकादिभ्यश्छः ॥ तस्येदमित्यर्थे वुञोपवादः ॥ रैवतिकीयः ॥ बैजवापीयः ॥ कौपिंजल
हास्तिपदादण् वक्तव्यः ॥ कुपिंजलस्यापत्यं इह वनिपातनादण् ॥ तदंतात्पुनरण् ॥ कौपिंजलः ॥ गोत्रवुञोपवादः ॥ हस्तिपादस्यापत्यं ॥१२०॥
हास्तिपादः ॥ तस्यायं हास्तिपदः ॥ चरणवुञोपवादः ॥ आथर्वणिकस्येकलोपश्च ॥ अण् स्यात् ॥ आथर्वणिकस्यायं आथर्वणो धर्म आम्ना
यो वा ॥ चरणवुञोपवादः ॥ ॥ इति शैषिकाः समाप्ताः ॥ ॥ तस्य विकारः ॥ अश्मनो विकारे टिलोपो वक्तव्यः ॥ अश्मनो वि

कारः आश्मः ॥ आश्मनः ॥ मार्त्तिकः ॥ भास्मनः ॥ अवयवे च प्राण्योषधिवृक्षेभ्यः ॥ चाद्विकारे ॥ मयूरस्यावयवो विकारो वा मायूरः ॥ मौर्वं कांडं
भस्म वा ॥ पैप्पलं ॥ बिल्वादिभ्योऽण् ॥ बैल्वः ॥ कोपधाच्च ॥ अण् ॥ अञोपवादः ॥ तर्कु ॥ तार्कवं ॥ तैत्तिडिकं ॥ त्रपुजतुनोः षुक् ॥ अस्मिन्मण्यादि
कारे एतयोः षुगागमश्च ॥ नलोपः प्रातिपदि॰ ॥ त्रापुषं ॥ जातुषं ॥ ओरञ् ॥ दैवदारवं ॥ अनुदात्तादेश्च ॥ दाधित्थं ॥ कापित्थं ॥ पलाशादिभ्यो वा
पालाशं ॥ कारीरं ॥ शम्याष्ट्लञ् ॥ शामीलं भस्म ॥ षित्वान्ङीष् ॥ शामीली स्रुक् ॥ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः ॥ प्रकृतिमात्रान्मयड्
वास्याद्विकारावयवयोः ॥ अश्ममयं ॥ आश्मनं ॥ अभक्ष्येत्यादि किं ॥ मौद्गः सूपः ॥ कार्पासमाच्छादनं ॥ नित्यं वृद्धशरादिभ्यः ॥ आम्रमयं ॥ श
रमयं ॥ एकाचो नित्यं ॥ त्वङ्मयं ॥ वाङ्मयं ॥ कथं तर्हि आप्यमम्मयमिति ॥ तस्येदमित्यणंतात्स्वार्थे ष्यञ् ॥ गोश्च पुरीषे ॥ गोः पुरीषं गोमयं ॥
पिष्टाच्च ॥ मयट् स्याद्विकारे ॥ पिष्टमयं भस्म ॥ कथं पैष्टी सुरेति सामान्यविवक्षायां तस्येदमित्यण् ॥ संज्ञायां कन् ॥ पिष्टाद्विकारे ॥ पिष्ट
स्य विकारविशेषः पिष्टकः ॥ पूपोऽपूपः पिष्टकः स्यात् ॥ व्रीहेः पुरोडाशे ॥ मयट् स्यात् ॥ बिल्वाद्यणोपवादः ॥ व्रीहिमयः पुरोडाशः ॥ व्रैहमन्य
त् ॥ असंज्ञायां तिलयवाभ्यां ॥ तिलमयं ॥ यवमयं ॥ संज्ञायां तु तैलं ॥ यावकः ॥ तालादिभ्योऽण् ॥ अश्ममयटोरपवादः ॥ तालाद्धनुषि ॥ तालं
धनुः ॥ अन्यत्तालमयं ॥ ऐंद्रायुधं ॥ जातरूपेभ्यः परिमाणे ॥ अण् ॥ बहुवचनग्रहणात्पर्यायग्रहणं ॥ हाटकः ॥ तापनीयः ॥ सौवर्णो वा निष्कः ॥

परिमाणे कं॥ हाटकमयी यष्टिः॥ आग्निरजतादिभ्योऽञ्॥ शौकं॥ बार्कं॥ राजतं॥ जितश्रुतमलस्थानं॥ त्रिघ्यो विकारावयवप्रत्ययस्तदंता ॥त॰ प्राग्दी॰॥
॥सि॰कौ॰॥ द्भ्यसात्तयोरेवार्थयोः॥ मयडेतयोरपवादः॥ शामीलस्य शामीलं॥ दाधित्थं॥ कापित्थं॥ जितर्द्रकं॥ बैल्वमयं॥ क्रीतवत्परिमाणात्॥ प्राग्वहतेष्ठ
क्षितासत्य क्रीतार्थे ये प्रत्ययायेनोपाधिना परिमाणाद्विहितास्ते एव विकारेऽतिदिश्यंते॥ अणादिनामपवादः॥ निष्केण क्रीतं नैष्किकं॥ ए
॥१२२१॥ वं निष्कस्य विकारोऽपि नैष्किकः॥ शतस्य विकारः शत्यः॥ शातिकः॥ उष्ट्राद्वुञ्॥ प्राण्यञोरपवादः॥ औष्ट्रकः॥ उमोर्णयोर्वा॥ औमं॥ औम
कं॥ और्णं॥ और्णकं॥ वुञ्मात्त्वेप्याकमनणौ॥ एण्या ढञ्॥ ऐणेयं॥ एणस्य तु ऐणं॥ गोपयसोर्यत्॥ गव्यं॥ पयस्यं॥ द्रोश्च॥ द्रुरेस॥
तस्य विकारोऽवयवो वा द्रव्यं॥ माने वयः॥ द्रोरित्येव॥ द्रुवयं॥ पौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयं॥ फले लुक्॥ विकारावयवप्रत्ययस्य
लुक्स्यात्फले॥ लुक्तद्धितलुकि॥ आमलक्याः फलानि आमलकानि॥ प्लक्षादिभ्योऽण्॥ विधानसामर्थ्यान्न लुक्॥ प्लाक्षं॥ न्यग्रोधस्य
च केवलस्य॥ अस्य न वृद्धिः ऐजागमश्च॥ नैय्यग्रोधं॥ जंब्वा वा॥ जंबूशब्दात्फलेऽण्वा स्यात्॥ जांबवं॥ पक्षे ओरञ्॥ तस्य लु ॥१२२१॥
क्॥ जंबु॥ लुप् च॥ जंब्वाः फलप्रत्ययस्य लुप्वा स्यात्॥ लुपि युक्तवद्व्यक्तिवचने॥ जंब्वाः फलं जंबूः॥ फलपाकशुषामुपसंख्यानं॥ व्रीहयः
मुद्गाः॥ पुष्पमूलेषु बहुलं॥ मल्लिकायाः पुष्पं मल्लिका॥ जात्याः पुष्पं जाती॥ विदार्या मूलं विदारी॥ बहुलग्रहणान्नेह॥ पाटलानि पु

लुवस्तावात्प्रकृतिलिंगात्तावल्लमिति विशेषः॥

ष्पाणि॥ सालानि मूलानि॥ बाहुल्यकात्क्वचिल्लुक्॥ अशोकं॥ करवीरं॥ हरीतक्यादिभ्यश्च॥ एभ्यः फलप्रत्ययस्य लुप्स्यात्॥ हरीत
क्यादीनां लिंगमेव प्रकृतिवत्॥ हरीतक्याः फलानि हरीतक्यः॥ कंसीयपरशव्ययोर्यञञौ लुक्च॥ कंसीयपरशव्यशब्दाभ्यां यञञौ
स्तश्छयतोश्च लुक्॥ कंसाय हितं कंसीयं॥ तस्य विकारः कांस्यं॥ परशवे हितं परशव्यं॥ तस्य विकारः पारशवः॥ ॥इति प्राग्दीव्य
तीयाः॥ ॥प्राग्वहतेष्ठक्॥ तद्वहतीत्यतः प्राक् ठगधिक्रियते॥ तदर्हतीति माशब्दादिभ्य उपसंख्यानं॥ माशब्दं कारि इति प्रआह स
माशब्दिकः॥ स्वागतादीनां च॥ ऐच्च न स्यात्॥ स्वागतमित्याह स्वागतिकः॥ स्वाध्वरिकः॥ स्वंगतापत्यं स्वांगिः॥ व्यांगिः॥ व्यडस्यापत्यं
व्याडिः॥ व्यवहारेण चरति व्यावहारिकः॥ स्वपतौ साधु स्वापतेयं॥ आहौ प्रभूतादिभ्यः॥ प्रभूतमाह प्राभूतिकः॥ पार्याप्तिकः॥
पृच्छतौ सुस्नातादिभ्यः॥ सुस्नातं पृच्छति सौस्नातिकः॥ सौखशायनिकः॥ अनुशतिकादीनां च॥ उभयपदवृद्धिः॥ गच्छतौ परदारा
दिभ्यः॥ पारदारिकः॥ गौरुतल्पिकः॥ ॥तेन दीव्यति खनति जयति जितं॥ अक्षैर्दीव्यति आक्षिकः॥ अभ्रया खनति आभ्रिकः॥
अक्षैर्जयति आक्षिकः॥ अक्षैर्जितमाक्षिकं॥ संस्कृतं॥ दध्ना संस्कृतं दाधिकं॥ मारीचिकं॥ कुलत्थकोपधादण्॥ ठकोपवादः॥
कुलत्थैः संस्कृतं कौलत्थं॥ तैत्तिडकं॥ तरति॥ उडुपेन तरति औडुपिकः॥ गोपुच्छाट्ठञ्॥ गौपुच्छिकः॥ नौद्व्यचष्ठन्॥ नाविकः॥

घटिकः॥ बाहुभ्यां तरति बाहुका स्त्री॥ चरति॥ तृतीयांतात् गच्छति भक्षयतीत्यर्थयोष्ठक् स्यात्॥ हस्तिना चरति हास्तिकः॥ शा ता० द्वौ०
॥सि०पू०॥ कटिकः॥ दध्ना चरति दाधिकः॥ आकर्षात्ष्ठल्॥ आकर्षो निकषोपलः॥ आकषादिति पाठांतरं॥ तेन चरति आकर्षिकः॥ पित्वा
न्ङीष्॥ आकर्षिकी॥ पर्पादिभ्यः ष्ठन्॥ पर्पेण चरति पर्पिकः॥ पर्पिकी॥ येन पीठेन पंगवश्चरंति स पर्पः॥ आश्विकः॥ रथिकः॥
॥१२२॥ पर्प॥ अश्व॥ रथ॥ जाल॥ न्यास॥ पादप इति॥ श्वगणाट्ठञ्च॥ चात्ष्ठन्॥ श्वादेरिति ठञ्॥ श्वस्तस्यापत्यं श्वास्तिः॥ श्वा
दृष्टिः॥ तदादिविधौ चैतदेव ज्ञापकं॥ इकारादावितिवाक्यं॥ श्वगणेन चरति श्वागणिकः॥ श्वागणिकी॥ श्वगणिकः॥ श्वादेरिकाद्यद्यविति
शब्दं श्वगणिकी॥ पदांतस्यान्यतरस्यां॥ श्वादेरंगस्य पदांतस्यैज्वा॥ श्वापदस्येदं श्वापदं॥ शौवापदं॥ वेतनादिभ्यो जीवति॥
वेतनेन जीवति वैतनिकः॥ धानुष्कः॥ वस्नक्रयविक्रयाट्ठन्॥ वस्नेन मूल्येन जीवति वस्निकः॥ क्रयविक्रयग्रहणं ॥१२२॥
संघातविगृहीतार्थं॥ क्रयविक्रयिकः॥ क्रयिकः॥ विक्रयिकः॥ आयुधाच्छ च॥ चाट्ठन्॥ आयुधेन जीवति आयुधी
यः॥ आयुधिकः॥ हरत्युत्संगादिभ्यः॥ उत्संगेन हरति औत्संगिकः॥ भस्त्रादिभ्यः ष्ठन्॥ भस्त्रया हरति भस्त्रिकः॥
द्वारादिषु श्वनशब्दः पठ्यते॥ ॥द्वारादीनां चेति श्वनशब्दादीनां विहिते ऐजागमे श्वादेरिञीति श्वगणादिषु निषेधेन तदादिविधिं ज्ञापयतीति तात्पर्यं॥

पित्वाद्भस्त्रिकी॥ विभाषा विवधात्॥ विवधेन हरति विवधिकः॥ पक्षे ठक्॥ वैवधिकः॥ एकदेशविकृतस्यानन्यत्वाद्वीवधादपि ष्ठन्॥
वीवधिकः॥ वीवधिकी॥ विवधवीवधशब्दावुभयतोबद्धशिक्ये स्कंधवाह्यकाष्ठे वर्तेते॥ अण्कुटिलिकायाः॥ कुटिलिका व्याधा
नां गतिविशेषः॥ कर्मारोपकरणं च लोहं च॥ कुटिलिकया हरति मृगान् अंगारांश्च कौटिलिको व्याधः कर्मारश्च॥ निर्वृत्तेऽक्षद्यू
तादिभ्यः॥ अक्षद्यूतेन निर्वृत्तमाक्षद्यूतिकं वैरं॥ त्रेर्मम्नित्यं॥ त्रिप्रत्ययांतात्कृतिकात्तृतीयांतान्निर्वृत्तेर्थे मम् स्यान्नित्यं॥
कृत्यानिर्वृत्तं कृत्रिमं॥ पक्त्रिमं॥ भावप्रत्ययांतादिमब्वक्तव्यः॥ पाकेन निर्वृत्तं पाकिमं॥ त्यागिमं॥ अपमित्ययाचिताभ्यां कक्कु
नौ॥ अपमित्येति ल्यबंतं॥ अपमित्य निर्वृत्तमापमित्यकं॥ याचितेन निर्वृत्तं याचितकं॥ संसृष्टे॥ दध्ना संसृष्टं दाधिकं॥ चूर्णा
दिनिः॥ चूर्णैः संसृष्टाश्चूर्णिनोऽपूपाः॥ लवणाल्लुक्॥ लवणेन संसृष्टो लवणः सूपः॥ लवणं शाकं॥ मुद्गादण्॥ मौद्ग ओदनः॥ व्यंजनै
रुपसिक्ते॥ दध्ना उपसिक्तं दाधिकं॥ ओजःसहोंभसा वर्तते॥ ओजसिकः शूरः॥ साहसिकश्चौरः॥ आंभसिको मत्स्यः॥ तत्प्रत्यनु
पूर्वमीपलोमकूलं॥ द्वितीयांतादस्माद्वर्तत इत्यर्थे ठक् स्यात्॥ क्रियाविशेषणत्वाद्द्वितीया॥ प्रतीपं वर्तते प्रातीपिकः॥ प्रातिलोमि
कः॥ प्रातिकूलिकः॥ आन्वीपिकः॥ आनुलोमिकः॥ आनुकूलिकः॥ परिमुखं च॥ परिमुखं वर्तते पारिमुखिकः॥ पारिपार्श्विकः॥

प्रपद्धतिगर्ह्ये ॥ द्विगुणार्थं द्विगुणं ॥ तत्प्रयच्छति द्वैगुणिकः ॥ त्रैगुणिकः ॥ वृद्धेर्वृधुषिभावो वक्तव्यः ॥ वार्धुषिकः ॥ कुसीददशैकादशात्ष्ठन्ष्ठचौ ॥ त॰ ठञो॰
॥ सि॰ १२ ॥ गर्ह्यार्थात्प्राग्वतेरेतौ स्तः प्रयच्छत्यर्थे ॥ कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं ॥ तत्प्रयच्छति कुसीदिकः ॥ कुसीदिकी ॥ एकादशार्थत्वादेकादश ॥ ते न तेव
स्कृतो दशेति विग्रहः अकारः समासांत इहैव सूत्रे निपात्यते ॥ दशैकादशिकः ॥ दशैकादशिकी ॥ दशैकादशान् ॥ प्रयच्छतीत्यस्मिन्नर्थे एव
॥ १२३ ॥ हारितद्वितार्थः ॥ उञ्छति ॥ बदराण्युञ्छति बादरिकः ॥ रक्षति ॥ समाजं रक्षति सामाजिकः ॥ शब्ददर्दुरं करोति ॥ शाब्दं करोति शाब्दिकः ॥ दार्दुरिकः ॥
पक्षिमत्स्यमृगान्हंति ॥ स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणं ॥ मत्स्यपर्यायेषु मीनस्यैव ॥ पक्षिणो हंति पाक्षिकः ॥ शाकुनिकः ॥ मा
यूरिकः ॥ मैनिकः ॥ मार्गिकः ॥ हारिणिकः ॥ सारंगिकः ॥ परिपंथं च तिष्ठति ॥ अस्माद्द्वितीयांताद्धंति तिष्ठति हंति चेत्यर्थे ठक् स्यात् ॥ पर्यानं वर्ज
परीसस्पार्शः यित्वा व्याप्य वा तिष्ठति पारिपंथिकश्चोरः ॥ परिपंथं हंति पारिपंथिकः ॥ माथोत्तरपदपदव्यनुपदं धावति ॥ दंडाकारो माथः पंथाः दंडमा
थः ॥ दंडमाथं धावति दांडमाथिकः ॥ पादविकः ॥ आनुपदिकः ॥ आक्रंदाट्ठञ्च ॥ अस्माट्ठञ् स्यात् ठक् च धावतीत्यर्थे ॥ आक्रंदं दुःखिनां
रोदनस्थानं धावति आक्रंदिकः ॥ पदोत्तरपदं गृह्णाति ॥ पूर्वपदं गृह्णाति पौर्वपदिकः ॥ औत्तरपदिकः ॥ प्रतिकंठार्थललामं च ॥ एभ्यो ॥ १२३ ॥
गृह्णात्यर्थे ठक् ॥ प्रतिकंठं गृह्णाति प्रातिकंठिकः ॥ आर्थिकः ॥ लालामिकः ॥ धर्मं चरति ॥ धार्मिकः ॥ अधर्माच्चेति वक्तव्यं ॥ आधर्मिकः ॥ प्र

तिपथमेति ठंश्च ॥ प्रतिपथमेति प्रातिपथिकः ॥ समवायान्समवैति ॥ सामवायिकः ॥ सामूहिकः ॥ परिषदो ण्यः ॥ परिषदं समवैति पारिषद्यः ॥ सेनाया
वा ॥ ण्यः स्यात् पक्षे ठक् ॥ सेनायां समवेताः सैन्याः सैनिकाः ॥ संज्ञायां ललाटकुक्कुट्यौ पश्यति ॥ ललाटं पश्यति लालाटिकः सेवकः ॥ कुक्कुटीशब्देन त
सातार्हः स्वल्पदेशो लक्ष्यते ॥ कौक्कुटिको भिक्षुः ॥ तस्य धर्म्यं ॥ आपणस्य धर्म्यं आपणिकं ॥ अण्महिष्यादिभ्यः ॥ महिष्याः धर्म्यं माहिषं ॥ याजमा
नं ॥ ऋतोञ् ॥ यातुर्धर्म्यं यात्रं ॥ नराच्चेति वक्तव्यं ॥ नरस्य धर्म्या नारी ॥ विशसितुरिड्लोपश्चाञ्संनियोगेन वक्तव्यः ॥ विशसितुर्धर्म्यं वैशस्तं ॥ विभाजयितुर्णि
लोपश्चाञ्वक्तव्यः ॥ विभाजयितुर्धर्म्यं वैभाजित्रं ॥ अवक्रयः ॥ षष्ठ्यंतात् ठक् स्यादवक्रयेर्थे ॥ आपणस्यावक्रयः आपणिकः ॥ राजग्राससंद्व
मवक्रयः ॥ तदस्य पण्यं ॥ अपूपाः पण्यमस्य आपूपिकः ॥ लवणाट्ठञ् ॥ लावणिकः ॥ किसरादिभ्यः ष्ठन् ॥ किसरं पण्यमस्य किसरिकः ॥ षित्वान्ङीष्
किसरिकी ॥ किसर नरद नलद इत्यादि ॥ किसरादयः सर्वे सुगंधिद्रव्यविशेषवाचिनः ॥ शलालुनोऽन्यतरस्यां ॥ ष्ठन् ॥ पक्षे ठक् ॥ शलालुकः ॥
शलालुकी ॥ शालालुकः ॥ शालालुकी ॥ शलालु सुगंधिद्रव्यविशेषः ॥ शिल्पं ॥ मृदंगवादनं शिल्पमस्य मार्दंगिकः ॥ मड्डुकझर्झरादणन्यतरस्यां ॥
मड्डुकवादनं शिल्पमस्य माड्डुकः ॥ माड्डुकिकः ॥ झार्झरः ॥ झार्झरिकः ॥ प्रहरणं ॥ तदस्येत्येव ॥ असिः प्रहरणमस्य आसिकः ॥ धानुष्कः ॥ परश्व
धाट्ठञ् च ॥ पारश्वधिकः ॥ शक्तियष्ट्योरीकक् ॥ शाक्तीकः ॥ याष्टीकः ॥ अस्ति नास्ति दिष्टं मतिः ॥ तदस्येत्येव ॥ अस्ति परलोक इत्येवं मतिर्यस्य स आ

छत्रादिभ्यो णः इति ताच्छीलिके णेऽपि अण्कार्यं भवतीत्यर्थः ३

॥सि॰कौ॰॥ स्तिकः॥ नास्तीति मतिर्यस्य स नास्तिकः॥ दिष्टमिति मतिर्यस्य स दैष्टिकः॥ शीलं॥ अपूप[illegible] शीलमस्य आपूपिकः॥ छत्रादिभ्यो णः॥ गुरो प्र॰क्ष॰ण॰
र्दोषाणामावरणं छत्रं॥ तच्छीलमस्येति छात्रः॥ कार्मस्ताच्छील्ये॥ कार्म इति ताच्छील्ये णि टिलोपो निपात्यते॥ कर्मशीलः कार्मः॥ नस्तद्धिते इति लोपः सि त॰ ७४
॥१२४॥ द्धे अण्कार्यं ताच्छीलिके णेऽपि भवति॥ तेन चौरी तापसी इत्यादि सिद्धं॥ ताच्छील्ये किं॥ कार्मणः॥ कर्माध्ययने वृत्तं॥ एकमन्यदध्ययने ठक्स्यादध्य
यने वृत्ता क्रिया सा चेल्लभ्यमानस्यार्थे॥ ऐकान्यिकः॥ यस्याध्ययने प्रवृत्तस्य परीक्षाकाले विपरीतोच्चारणरूपं स्खलितमेकं जातं सः॥ बह्वच
पूर्वपदाट्ठच्॥ प्राग्विषये॥ द्वादशान्यानि कर्माणि अध्ययने वृत्तान्यस्य द्वादशान्यिकः॥ द्वादश अपपाठा अस्य जाता इत्यर्थः॥ हितं भक्षाः॥
अपूपभक्षणं हितमस्य आपूपिकः॥ तदस्मै दीयते नियुक्तं॥ अग्रभोजनं नियतं दीयतेऽस्मै आग्रभोजनिकः॥ श्राणामांसौदना
ट्टिठन्॥ श्राणा नियुक्तं दीयतेऽस्मै श्राणिकः॥ श्राणिकी॥ [illegible] मांसौदनग्रहणं संघातविगृहीतार्थं॥ मांसौदनिकः॥ मांसिकः॥ ओदनिकः॥
भक्तादणन्यतरस्यां॥ पक्षे ठक्॥ भक्तमस्मै नियुक्तं दीयते भाक्तः॥ भाक्तिकः॥ तत्र नियुक्तः॥ आकरे नियुक्त आकरिकः॥ अगारान्ताट्ठन्॥ ॥१२४॥
देवागारे नियुक्तः देवागारिकः॥ अध्यायिन्यदेशकालात्॥ निषिद्धदेशकालवाचकात् ठक्स्यादध्येतरि॥ श्मशाने अधीते श्माशानिकः॥
चतुर्दश्यामधीते चातुर्दशिकः॥ कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति॥ तत्रेत्येव॥ वंशकठिने व्यवहरति वांशकठिनिकः॥ वंशाः वेण

वः॥ कठिना यस्मिन्देशे स वंशकठिनः॥ तस्मिन्देशे या क्रिया यथानुष्ठेया तां तथैवानुतिष्ठतीत्यर्थः॥ प्रास्तारिकः॥ सांस्थानिकः॥ निकटे वसति
नैकटिको भिक्षुः॥ आवसथात्ष्ठल्॥ आवसथे वसति आवसथिकः॥ षित्वान्ङीष्॥ आवसथिकी॥ ॥ आकर्षात्पर्पादेर्भस्त्रादिभ्यः कुसीद
सूत्राच्च॥ आवसथात्किसरादेः षितः षडेते ठगधिकारे॥ षडिति सूत्रषट्केन विहिता इत्यर्थः॥ प्रत्ययास्तु सप्त॥ ॥ ठकोऽवधिः समाप्तः॥
॥ ॥ प्राग्घिताद्यत्॥ तस्मै हितमित्यतः प्राग्यदधिक्रियते॥ तद्वहति रथयुगप्रासंगं॥ रथं वहति रथ्यः॥ युग्यः॥ वत्सानां दमनकाले स्कंधे
काष्ठमासज्यते स प्रासंगः॥ तं वहति प्रासंग्यः॥ धुरो यड्ढकौ॥ हलि चेति दीर्घे प्राप्ते॥ न भकुर्छुरां॥ तस्य कुर्छुरोश्चोपधाया दीर्घो न स्यात्॥
धुर्यः॥ धौरेयः॥ खः सर्वधुरात्॥ सर्वधुरं वहति सर्वधुरीणः॥ एकधुराल्लुक्च॥ एकधुरीणः॥ एकधुरः॥ शकटादण्॥ शकटं वहति शाकटो गौः॥
हलसीराट्ठक्॥ हलं वहति हालिकः॥ सैरिकः॥ संज्ञायां जन्या॥ जनी वधूः॥ तां वहति प्रापयति जन्या॥ विध्यत्यधनुषा॥ द्वितीयान्ताद्विध्यती
त्यर्थे यत्स्यान्न चेत्तत्र धनुष्करणं॥ पादौ विध्यन्ति पद्याः शर्कराः॥ धनगणं लब्धा॥ तृन्नन्तमेतत्॥ धनं ल[illegible]ब्धा धन्यः॥ गणं लब्धा गण्यः॥ अ
न्नाण्णः॥ अन्नं लब्धा आन्नः॥ वशं गतः॥ वश्यः परेच्छानुचारी॥ पदमस्मिन्दृश्यं॥ पद्यः कर्दमः॥ नातिशुष्क इत्यर्थः॥ मूलमस्याबर्हि॥ आबर्हण
माबर्हः उत्पाटनं॥ तदस्यास्तीति आबर्हि॥ मूलमस्याबर्हि येषां ते मूल्याः मुद्गाः॥ संज्ञायां धेनुष्या॥ धेनुशब्दस्य सुगागमो यत्प्रत्ययश्चस्यात्प

अ२

बंधनस्थाने वे
नुरित्यर्थः०
॥सि० पू०॥

॥१२९॥

निपात्यते संज्ञायां॥ धेनुष्या बंधके स्थिता॥ गृहपतिना संयुक्ते ञ्यः॥ गृहपतिर्यजमानस्तेन संयुक्तो गार्हपत्योग्निः॥ नौवयोधर्मविष प्राग्घि० त०
मूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु॥ नावा तार्यं नाव्यं॥ वयसा तुल्यो वयस्यः॥ धर्मेण प्राप्यं धर्म्यं॥ विष
णवध्यो विष्यः॥ मूलेनानाम्यो मूल्यं॥ मूलेन समो मूल्यः॥ सीतया समितं सीत्यं क्षेत्रं॥ तुलया संमितं तुल्यं॥ धर्मपथ्यर्थन्यायादनपेते॥
धर्मादनपेतं धर्म्यं॥ पथ्यं॥ अर्थ्यं॥ न्याय्यं॥ छंदसो निर्मिते॥ छंदसा निर्मितं छंदस्यं॥ इच्छया कृतमित्यर्थः॥ उरसोण् च॥ चाद्यत्॥ उरसा नि
र्मितः पुत्र औरसः॥ उरस्यः॥ हृदयस्य प्रियः॥ हृद्यो देशः॥ हृदयस्य हृल्लेखयदण्लासेष्विति हृदादेशः॥ बंधने चर्षौ॥ हृदयशब्दात्षष्ठ्यं
तात्बंधने यत्स्याद्वेदेति प्रत्यये॥ हृदयस्य बंधनो हृद्यो वशीकरणमंत्रः॥ मतजनहलात्करणजल्पकर्षेषु॥ मतं ज्ञानं॥ तस्य क
रणं भावः साधनं वा मत्यं॥ जनस्य जल्पो जन्यः॥ हलस्य कर्षो हल्यः॥ श्रीः॥ तत्र साधुः॥ अग्र्यः॥ सामसु साधुः सामन्यः॥
ये चाभावकर्मणोरिति प्रकृतिभावः॥ कर्मण्यः॥ शरण्यः॥ प्रतिजनादिभ्यः खञ्॥ प्रतिजनं साधुः प्रातिजनीनः॥ सांयुगीनः॥ सार्व ॥१२५॥
जनीनः॥ वैश्वजनीनः॥ भक्ताण्णः॥ भक्ते साधवो भाक्ताः॥ शालयः॥ परिषदो ण्यः॥ पारिषद्यः॥ परिषद इति योगविभागाण्णोपि॥
पारिषदः॥ कथादिभ्यष्ठक्॥ कथायां साधुः काथिकः॥ गुडादिभ्यष्ठञ्॥ गुडे साधुर्गौडिक इक्षुः॥ साक्तुको यवः॥ पथ्यतिथिवसति

स्वपतेर्ढञ्॥ पथि साधुः पाथेयं॥ आतिथेयः॥ वसनं वसतिः॥ तत्र साधुर्वासतेयी रात्रिः॥ स्वपतौ साधु स्वापतेयं धनं॥ सभाया यः॥
सभ्यः॥ समानतीर्थे वासी॥ साधुरिति निवृत्तं॥ वसतीति वासी॥ समानतीर्थे गुरौ वसतीति सतीर्थ्यः॥ समानोदरे शयित ओ चो
दात्तः॥ समाने उदरे शयितः स्थितः समानोदर्यो भ्राता॥ सोदराद्यः॥ सोदर्यः॥ अर्थः प्राग्वह॥ ॥ इति प्राग्घितीयाः॥ ॥
॥ प्राक्क्रीताच्छः॥ तेन क्रीतमित्यतः प्राक् छोधिक्रियते॥ उगवादिभ्यो यत्॥ प्राक्क्रीतादित्येव॥ उवर्णान्ताद्गवादिभ्यश्च यत्स्यात् छस्या
पवादः॥ नाभि नभं च॥ नभ्योक्षः॥ नभ्यमंजनं॥ रथनाभावेवेदं॥ शुनः संप्रसारणं वा च दीर्घत्वं॥ शून्यं॥ शुन्यं॥ ऊधसोऽनङ् च॥ ऊधन्यः॥
कंबलाच्च संज्ञायां॥ यत्स्यात्॥ कंबल्यमूर्णापलशतं॥ संज्ञायां किं॥ कंबलीया ऊर्णा॥ विभाषा हविरपूपादिभ्यः॥ आमिक्ष्यं दधि
आमिक्षीयं॥ पुरोडाश्यास्तंडुलाः पुरोडाशीयाः॥ अपूप्यं॥ अपूपीयं॥ ॥ तस्मै हितं॥ वत्सेभ्यो हितो वत्सीयो गोधुक्॥ शं
कव्यं दारु॥ गव्यं॥ हविष्यं॥ शरीरावयवाद्यत्॥ दंत्यं॥ कंठ्यं॥ नस्य नासिकायां यत्तस्क्षुद्रेषु॥ नस्यं॥ नसः॥ नास्यं॥ ये च तद्धिते॥
याद्यौ तद्धिते परे शिरःशब्दस्य शीर्षन्नादेशः स्यात्॥ शीर्षण्यः॥ तद्धिते किं॥ शिर इच्छति शिरस्यति॥ वा केशेषु॥ शीर्षण्याः शिरस्याः॥
केशाः॥ अचि शीर्ष इति वाच्यं॥ अजादौ तद्धिते शिरसः शीर्षादेशः॥ स्थूलशिरस इदं स्थौलशीर्षं॥ खलयवमाषतिलवृषब्रह्मणश्च॥

खलयवहितं खल्यं। यव्यं। ब्रह्मण्यं। वाह्या। अजाविभ्यां थ्यन्। अजथ्या यूथिः। अविथ्या। आत्मन्विश्वजनभोगोत्तरपदात्खः। त० ७४२
सि०१० आत्माध्वानौ खे। एतौ खे प्रकृत्या स्तः। आत्मने हितमात्मनीनं। विश्वजनीनं। कर्मधारयादेवेष्यते। षष्ठीतत्पुरुषाद्बहुव्रीहे
श्च छ एव। विश्वजनीयं। पंचजनादुपसंख्यानं। पंचजनीनं। सर्वजनाट्ठञ्खश्च। सार्वजनिकः। सर्वजनीनः। महाजनाट्ठञ्।
१२६ माहाजनिकः। मातृभोगीणः। पितृभोगीणः। राजभोगीणः। आचार्यादणत्वं च। आचार्यभोगीनः। सर्वपुरुषाभ्यां णढञौ।
सर्वाण्णो वेति वक्तव्यं। सर्वस्मै हितं सार्वं। सर्वीयं। पुरुषाद्वधविकारसमूहतेनकृतेषु। साध्यकारप्रयोगात्तेनेत्यस्य हृद
वधः मध्ये निवेशः। पुरुषस्य वधः पौरुषेयः। तस्येदमित्यणि प्राप्ते। पुरुषस्य विकारः पौरुषेयः। प्राणिरजतादिभ्योऽञित्यञि प्राप्ते।
समूहेप्यणि प्राप्ते। एकाकिनापि परितः पौरुषेया वृता इवेति माघः। तेन कृते तु ग्रंथे अणि प्राप्ते अग्रंथे तु प्रासादादौ अप्राप्ते।
वेति विवेकः। माणव[illegible]रकाभ्यां खञ्। माणवाय हितं माणवी[illegible]नं। चारकीणं। तदर्थं विकृतेः प्रकृतौ। विकृतिवाचकाच्चतुर्थ्यं। १२६
तात्तदर्थायां प्रकृतौ वाच्यायां प्रत्ययः स्यात्। अंगारेभ्यो हितानि अंगारीयाणि काष्ठानि। प्राकारीया इष्टकाः। शंकव्यं दारु।
छदिरुपधिबलेर्ढञ्। छादिषेयाणि तृणानि। बालेयास्तंडुलाः। उपधिशब्दात्स्वार्थे इष्यते। उपधीयत इत्युपधिः। रथांगं। त

दे औपधेयं। ऋषभोपानहोर्ञ्यः। छस्यापवादः। आर्षभ्यो वत्सः। औपानह्यो मुंजः। चर्मण्यप्ययमेव पूर्वविप्रतिषेधेन। औप
नह्यं। चर्मणोऽञ्। चर्मणो या विकृतिस्तद्वाचकादञ्स्यात्। वर्ध्र्यै इदं वार्ध्रं चर्म। वारत्रं चर्म। तदस्य तदस्मिन्स्यादिति। प्राकार आ
सामिष्टकानामस्यात्प्राकारीया इष्टकाः। प्रासादीयं दारु। प्राकारोऽस्मिन्स्यात्प्राकारीयो देशः। इति शब्दो लौकिकीं विवक्षामनुसार
यति। तेनेह न। प्रासादो देवदत्तस्य स्यादिति। परिखाया ढञ्। पारिखेयी भूमिः॥ ॥इति छयतोः पूर्णोऽवधिः॥ ॥प्राग्वतेष्ठञ्॥
तेन तुल्यमिति वतिं वक्ष्यति ततः प्राक् ठञधिक्रियते। आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्। तदर्हतीत्येतदभिव्याप्य ठगधिका
रमध्ये ठञोपवादः ठगधिक्रियते गोपुच्छादीन्वर्जयित्वा। असमासे निष्कादिभ्यः। आर्हादित्येतत्तेन क्रीतमिति यावत्सप्तदश
सूत्र्यामनुवर्तते। निष्कादिभ्यो समासे ठक् स्यादार्हीयेष्वर्थेषु। नैष्किकं। निष्केण क्रीतादि। समासे तु ठञ्। परिमाणांतस्यासं
ज्ञाशाणयोः। उत्तरपदवृद्धिः स्याञ्ञिदादौ। परमनैष्किकं। असंज्ञेति किं। पंचकलापैः क्रीतं पांचकलापिकं। असमासग्रहणं
ज्ञापकं भवतीतः प्राक्तदंतविधिरिति। तेन सुगव्यं यवाप्यमित्यादि। इतऊर्ध्वं तु संख्यापूर्वपदानां तदंतग्रहणं प्राग्वतेरिष्य
ते न तु लुकि। पारायणिकः। द्वैपारायणिकः। अलुकीति किं। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पं। द्विशूर्पेण क्रीतं शूर्पादञ्मात्सरः। किं।

॥सि॰पू॰॥ ॥१२८॥ न॰का॰ श्रीः ॥१२८॥

तुठञ्॥ द्विशौर्पिकं॥ द्विगुप्रतिनिमित्तत्वाभावाल्लुक्॥ अर्धात्परिमाणस्य पूर्वस्य तु वा॥ अर्धात्परिमाणवाचकस्योत्तरपदस्यादेरचो वृद्धिः
पूर्वपदस्य तु वा ञिति णिति किति च॥ अर्धद्रोणेन क्रीतमर्धद्रौणिकं॥ नातः परस्य॥ अर्धात्परस्य परिमाणाऽकारस्य वृद्धिर्न पूर्वपदस्य वा ञि
दादौ॥ अर्धप्रस्थिकं॥ आर्धप्रास्थिकं॥ अतः किं॥ आर्धकौडविकं॥ तपरः किं॥ अर्धखार्या सवा अर्धखारी॥ अर्धखारीमार्ध इत्यत्र वृद्धिनि
मित्तस्येति पुंवद्भावनिषेधो न स्यात्॥ शताच्च ठन्यतावशते॥ शतेन क्रीतं शातिकं॥ शत्यं॥ अशते किं॥ शतं परिमाणमस्य शतकः संघः॥
इह सत्प्रत्ययार्थे विरक्ततः प्रकृत्यर्थान्न भिद्यते तेन ठन्यतौ न॥ किं तु कन्नेव॥ असमास इत्येव॥ द्विशतेन क्रीतं द्विशतिकं॥ संख्याया अ
तिशदन्तायाः कन्॥ संख्यायाः कन् स्यादार्हीयेऽर्थे न तु त्यन्तशदन्तायाः॥ पंचभिः क्रीतः पंचकः॥ बहुकः॥ संतायास्तु साप्ततिकः॥ शदं
तायाश्चात्वारिंशत्कः॥ वतोरिड्वा॥ वत्वन्तात्कन इड्वा स्यात्॥ तावतिकः॥ तावत्कः॥ विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायां॥ योगविभागः कर्त
व्यः॥ आभ्यां कन्स्यात्॥ असंज्ञायां तु ड्वुन्स्यात्कनोऽपवादः॥ विंशकः॥ त्रिंशकः॥ संज्ञायां तु विंशतिकः॥ त्रिंशत्कः॥ कंसाट्टिठन्॥ टोन्त्य अव
र्थः इकार उच्चारणार्थः॥ कंसिकः॥ कंसिकी॥ अर्धाच्चेति वक्तव्यं॥ अर्धिकः॥ अर्धिकी॥ कार्षापणाट्टिठन्वक्तव्यः॥ प्रतिरादेशश्च वा
कार्षापणिकः॥ कार्षापणिकी॥ प्रतिकः॥ प्रतिकी॥ शूर्पादञन्यतरस्यां॥ शौर्पं॥ शौर्पिकं॥ शतमानविंशतिकसहस्रवस

सनादण्॥ एभ्योऽण् स्यादार्हीये ठञादीनामपवादः॥ शतमानेन क्रीतं शातमानं॥ वैंशतिकं॥ साहस्रं॥ वासनं॥ अध्यर्धपूर्वद्विगोर्लुगसंज्ञायां॥
अध्यर्धपूर्वाद्द्विगोश्च परस्यार्हीयस्य लुक् स्यात्॥ अध्यर्धकंसं॥ द्विकंसं॥ संज्ञायां तु पांचकलापिकं॥ विभाषा कार्षापणसहस्राभ्यां॥
लुग्वा स्यात्॥ अध्यर्धकार्षापणं॥ अध्यर्धकार्षापणिकं॥ द्विकार्षापणं॥ द्विकार्षापणिकं॥ औपसंख्यानिकस्य टिठनो लुक्पक्षे
अध्यर्धप्रतिकं॥ द्विप्रतिकं॥ अध्यर्धसहस्रं॥ अध्यर्धसाहस्रं॥ द्विसहस्रं॥ द्विसाहस्रं॥ द्वित्रिपूर्वान्निष्कात्॥ लुग्वा स्यात्॥ द्वि
निष्कं॥ द्विनैष्किकं॥ त्रिनिष्कं॥ त्रिनैष्किकं॥ बहुपूर्वाच्चेति वक्तव्यं॥ बहुनिष्कं॥ बहुनैष्किकं॥ बिस्ताच्च॥ द्वित्रिबहुपूर्वाद्बि
स्तादार्हीयस्य लुग्वा॥ द्विबिस्तं॥ द्विबैस्तिकमित्यादि॥ विंशतिकात्खः॥ अध्यर्धपूर्वद्विगोरित्येव॥ अध्यर्धविंशतिकीनं॥
द्विविंशतिकीनं॥ खार्या ईकन्॥ अध्यर्धखारीकं॥ द्विखारीकं॥ केवलायाश्चेति वक्तव्यं॥ खारीकं॥ काकिन्याश्चोपसंख्यानं॥
अध्यर्धकाकिनीकं॥ पणपादमाषशताद्यत्॥ अध्यर्धपण्यं॥ द्विपण्यं॥ अध्यर्धपाद्यं॥ द्विपाद्यं॥ इह पादः पद्भावेन॥ यस्येति
लोपस्य स्थानिवद्भावात्॥ पद्यत्यतदर्थे इत्यादिना॥ माष्यं गार्यस्येव तत्र ग्रहणात्॥ शाणाद्वा॥ यत्स्यात्॥ पक्षे ठञ्॥ तस्य लुक्॥
अध्यर्धशाण्यं॥ द्वित्रिपूर्वादण् च॥ शाणाद्वित्येव॥ चाद्यत्॥ तेन त्रैशाण्यं॥ परिमाणान्तस्यासंज्ञाशाणयोरिति पर्युदासादादि

४ तदस्य परिमाणमिति ठञि लुकि च आर्धपरिमाणांतस्येत्युत्तरपदवृद्धिः ४

लुक्तातृतलुकीतिलुक्प्रिमात्तेतरपवाद्नूपत्रसयोर्यंरत्प्रसयः

शाद्वैव॥ द्वैशाणं॥ द्विशाणं॥ द्विशाण्यं॥ ॥ इहडआदयखणोदशप्रत्ययाः कृताः॥ तेषांसमर्थविभक्तयोर्थाश्च आकांक्षितास्त इदानीमुच्यंते॥ अपेक्षिताः का॰ ५ प्र॰

॥सि॰कौ॰॥ १ ॥ तेनक्रीतं॥ ४।१।३७॥ गोपुच्छेनक्रीतंगौपुच्छिकं॥ साप्ततिकं॥ प्रास्थिकं॥ ४।४॥ नैष्किकं॥ इकोन्यत्र॥ गोण्याद्वृत्तलुकि॥ ६

कोपवादः॥ पंचभिर्गोणीभिः क्रीतः पटः पंचगोणिः॥ तस्यनिमित्तंसंयोगोत्पातौ॥ संयोगः॥ उत्पातः शुभाशुभसूचकं॥ शतिकः शतो

॥२२९॥ धनपतिसंयोगः॥ शतिकंशतस्यदक्षिणाक्षिस्पंदनं॥ शतस्यनिमित्तमित्यर्थः॥ वातपित्तश्लेष्मभ्यःशमनकोपनयोरुपसंख्यानं॥ वा

तस्यशमनंकोपनंवावातिकं॥ पैत्तिकं॥ श्लैष्मिकं॥ सन्निपाताच्चेतिवक्तव्यं॥ सांनिपातिकं॥ गोद्व्यचोसंख्यापरिमाणाश्वादेर्यत्॥

गोर्निमित्तंसंयोगउत्पातोवागव्यः॥ धन॥ धन्यः॥ यशस्यः॥ स्वर्ग्यः॥ गोद्व्यचः किं॥ वैजयिकः॥ असंख्येत्यादिकिं॥ पंचानां

पंचकं॥ सप्तकं॥ प्रास्थिकं॥ खारीकं॥ आश्विकं॥ आश्मिकं॥ ब्रह्मवर्चसी॥ ब्रह्मवर्चस्यं॥ पुत्राच्छ च॥ वा घत्॥ पुत्रीयः॥ पुत्र्यः॥ सर्वभू इपसंख्यानं ४ ।२२९॥

मिपृथिवीभ्यामणञौ॥ सर्वभूमेर्निमित्तंसंयोगउत्पातोवासार्वभौमः॥ पार्थिवः॥ सर्वभूमिशब्दोऽनुशतिकादिषुपठ्यते॥ तस्येश्व

रः॥ तत्रविदितइतिच॥ सर्वभूमेरीश्वरः सर्वभूमौविदितोवासार्वभौमः॥ पार्थिवः॥ लोकसर्वलोकाट्ठञ्॥ तत्रविदितइत्यर्थे॥ लौ

किकः॥ अनुशतिकादित्वादुभयपदवृद्धिः॥ सार्वलौकिकः॥ तस्यवापः॥ उप्यतेऽस्मिन्नितिवापःक्षेत्रं॥ प्रस्थस्यवापः प्रास्थिकं॥ द्रौणि

कं॥ खारीकं॥ पात्रात्ष्ठन्॥ पात्रस्यवापःपात्रिकं॥ पात्रिकीक्षेत्रभक्तिः॥ तदस्मिन्वृद्ध्यायलाभशुल्कोपदादीयते॥ ५।१।४७॥ इत्यतइत्या

दिक्रमेणप्रत्येकंसंबंधादेकवचनं॥ पंचास्मिन्वृद्धिः आयः लाभः शुल्कं उपदादीयते॥ पंचकः॥ शतिकः॥ शत्यः॥ साहस्रः॥ उत्तमर्णेनमू

लातिरिक्तंग्राह्यं वृद्धिः॥ ग्रामादिषुस्वग्राह्योभागः आयः॥ विक्रेत्रामूलादधिकंग्राह्यंलाभः॥ रक्षानिर्वेशोराजभागः शुल्कं॥ उ

त्कोच उपदा॥ चतुर्थ्यर्थ उपसंख्यानं॥ पंचास्मैदीयतेपंचकोदेवदत्तः॥ सप्तमी ब्राह्मणेदानमितिवदधिकरणविवक्षा वा॥ पूर

णार्धाट्ठन्॥ यथाक्रमंठक्ठनोरपवादः॥ द्वितीयोवृद्ध्यादिरस्मिन्दीयतेद्वितीयिकः॥ तृतीयिकः॥ अर्धशब्दोरूपकस्यार्धे

रूढः॥ भागाद्यच्च॥ चाट्ठन्॥ भागशब्दोपिरूपकस्यार्धे॥ भागोवृद्ध्यादिरस्मिन्भागिकं॥ भाग्यंशतं॥ भाग्या॥ भागिकाविंशतिः॥

॥ ॥ तद्धरतिवहत्यावहतिभाराद्वंशादिभ्यः॥ वंशादिभ्यः परोयोभारशब्दः तदंतंयत्प्रातिपदिकं तस्मात्किं द्वितीयांतादि

त्यर्थः॥ वंशभारंहरतिवहतिआवहतिवावांशभारिकः॥ कौटभारिकः॥ भाराद्वंशादिभ्य इतिअस्यव्याख्यांतरं॥ भारभूतेभ्यो

वंशादिभ्य इति॥ भावंशान्वाहतिवांशिकः॥ कौटिकः॥ वस्नद्रव्याभ्यांठन्कनौ॥ यथासंख्यंस्तः॥ वस्नंहरतिवहतिआवहति

वावस्निकः॥ द्रव्यकः॥ संभवत्यवहरतिपचति॥ प्रस्थंसंभवतिप्रास्थिकः कटाहः॥ प्रस्थस्यसमावेशयतीत्यर्थः॥ प्रास्थिकी ब्राह्मणी॥

प्रस्थमुपसंहरति पचति वेत्यर्थः ॥ तत्पचतीति द्रोणाड्ढञ्च ॥ चादण्‌ ॥ द्रोणं पचति द्रौणिकी ॥ द्रौणी ॥ आढकाचितपात्रात्खो ऽन्य खो
॥ सि० पू० तरस्याम्‌ ॥ पक्षे ठञ्‌ ॥ आढकं संभवति अवहरति पचति वा ॥ आढकीना ॥ आढकिकी ॥ आचितीना ॥ आचितिकी ॥ पात्रीणा ॥ पा न० क्र० पि०
त्रिकी ॥ द्विगोष्ठंश्च ॥ आढकाचितपात्रादित्येव ॥ आढकाद्यन्ताद्द्विगोः संभवत्यादिष्वर्थेषु ष्ठन् खौ वा स्तः ॥ पक्षे ठञ्‌ ॥ त
॥ १२९ ॥ स्यापि द्विगोर्लुक्‌ ॥ षित्वान्ङीष्‌ ॥ द्व्याढकिकी ॥ द्व्याढकीना ॥ द्विगोरिति ङीप्‌ ॥ द्व्याढकी ॥ द्व्याचितिकी ॥ द्व्याचितीना ॥ अप
रिमाणेति ङीप्प्रतिषेधः ॥ द्व्याचिता ॥ द्विपात्रिकी ॥ द्विपात्रीणा ॥ द्विपात्री ॥ कुलिजाल्लुक्खौ च ॥ कुलिजान्ताद्द्विगोः संभवत्या
दिष्वर्थेषु लुक्खौ वा स्तः ॥ चात्‌ ष्ठंश्च ॥ लुगभावे ठञ्‌ ॥ श्रवणं ॥ द्विकुलिजी ॥ द्विकुलिजीना ॥ द्विकुलिजिकी ॥ द्वैकुलिजिकी ॥
सोऽस्यांशवस्नभृतयः ॥ अंशो भागः ॥ वस्नं मूल्यं ॥ भृतिर्वेतनं ॥ पंच अंशो वस्नो भृतिर्वास्य पंचकः ॥ तदस्य परिमाणं ॥ प्रस्थः परि ॥ १२९ ॥
माणमस्य प्रास्थिको राशिः ॥ संख्यायाः संज्ञासंघसूत्राध्ययनेषु ॥ पूर्वसूत्रमनुवर्तते ॥ तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः ॥
यद्वा ॥ द्व्येकयोरितिवत्संख्यामात्रवृत्तेः परिमाणिनि प्रत्ययः ॥ पंचैव पंचकाः ॥ शकुनयः ॥ पंच परिमाणमेषामिति वा ॥ संघ
पंचकः ॥ सूत्रं अष्टकं पाणिनीयं ॥ संघशब्दस्य प्राणिसमूहे रूढत्वात्‌ सूत्रं रूपयुपात्तं ॥ पंचकमध्ययनं ॥ ॥ स्तोमे डविधिः ॥

द्वित्वैकत्वविशिष्टयोरितिवत्‌ २

संख्यायाः संज्ञेति सूत्रे सूत्रशब्दः रूपयुपात्तः गृहीत इत्यर्थः

डविधिर्नाम डप्रत्ययः कर्तव्य इत्यर्थः

पंचदशमंत्राः परिमाणमस्य पंचदशः ॥ सप्तदशः ॥ एकविंशः ॥ सोमयागेषु छंदोगैः क्रियमाणा स्तुतिः स्तोमः ॥ पंक्तिविंशति संज्ञिका
त्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशीतिनवतिशतं ॥ एते रूढिशब्दा निपात्यंते ॥ पंचद्दशतौ वर्गे वा ॥ पंचपरिमाणमस्य पंचद्वर्गः ॥ दश
दशकः ३ तः पक्षे पंचकः ॥ त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण्‌ ॥ त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि ॥ चात्वारिंशानि ॥ तद
र्हति ॥ लब्धुं योग्यो भवतीत्यर्थः ॥ द्वितीयांतादृश्याद्यः स्युः ॥ श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः ॥ छेदादिभ्यो नित्यं ॥ नित्यमावृत्तिं ॥ छेद
नित्यमर्हति छैदिकः वेतसः ॥ छिन्नप्रच्छलात्‌ ॥ विरागाद्विरंगं च ॥ विरागं नित्यमर्हति वैरंगिकः ॥ शीर्षच्छेदाद्यच्च ॥ चाट्ठक्‌ ॥ शिर
श्छेदं नित्यमर्हति शीर्षच्छेद्यः ॥ शैर्षच्छेदिकः ॥ यट्ठकोः संनियोगेन शिरसः शीर्षभावो निपात्यते ॥ दंडादिभ्यः ॥ एभ्यो यत्स्यात्‌ ॥ दंड
मर्हति दंड्यः ॥ अर्घ्यः ॥ वध्यः ॥ पात्राद्घंश्च ॥ चाद्यत्‌ ॥ तदर्हतीत्यर्थे ॥ पात्रियः ॥ पात्र्यः ॥ कडंकरदक्षिणाच्छ च ॥ चाद्यत्‌ ॥ कडंकरादिति वि
ग्रहे तत एव निपातनात्सत्वं ॥ कडंकरं माषमुद्गादिकाष्ठं अर्हतीति कडंकरीयो गौः ॥ कडंकर्यः ॥ दक्षिणामर्हतीति दक्षिणीयः ॥ दक्षि
ण्यः ॥ स्थालीबिलात्‌ ॥ स्थालीबिलमर्हंतीति स्थालीबिलीयास्तंडुलाः ॥ स्थालीबिल्याः ॥ पाकयोग्या इत्यर्थः ॥ यज्ञर्त्विग्भ्यां
घखञौ ॥ यथासंख्यं स्तः ॥ यज्ञकर्मार्हतीति यज्ञियः ॥ आर्त्विजीनो यजमानः ॥ यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानं ॥ ॥

यज्ञकर्म अ[illegible]र्हति याज्ञिकोदेशः॥ आर्त्विजीनो ऋत्विक्॥ ॥आर्हीयाणां ठगादीनां पूर्णोऽवधिः॥ अतः परं ठञेव॥ पारा त॰ का॰
॥सि॰पू॰॥ यणतुरायणचान्द्रायणं वर्त्तयति॥ पारायणं वर्त्तयति पारायणिकः [illegible] छात्रः॥ तुरायणं यज्ञविशेषस्तं वर्त्तयति तौरायणिको यज
२हेतुभूतइत्यर्थः मानः॥ चान्द्रायणिकः॥ संशयमापन्नः॥ संशयविषयीभूतोऽर्थः सांशयिकः॥ योजनं गच्छति॥ यौजनिकः॥ क्रोशशतयोजनशतयोरुपसं २संशयंप्राप्तइत्यर्थः
॥१३०॥ ख्यानं॥ क्रोशशतं गच्छति क्रौशशतिकः॥ यौजनशतिकः॥ ततोऽभिगमनमर्हतीति च वक्तव्यं॥ क्रोशशतादभिगमनमर्हति क्रौशश
तिको भिक्षुः॥ योजनशतादभिगमनमर्हति यौजनशतिकः आचार्यः॥ पथः ष्कन्॥ षोडीर्थः॥ पन्थानं गच्छति पथिकः॥ पथिकी॥
पन्थो ण नित्यं॥ पन्थानं नित्यं गच्छति पान्थः॥ पान्था॥ टाप्॥ ॥उत्तरपथेनाहृतं च॥ उत्तरपथेनाहृतं औत्तरपथिकं॥ उत्तरपथेन
गच्छति औत्तरपथिकः॥ आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वादुपसंख्यानं॥ वारिपथिकं॥ ॥कालात्॥ व्युष्टादि
भ्योण इत्यतः प्रागधिकारः॥ तेन निर्वृत्तं॥ अह्ना निर्वृत्तमाह्निकं॥ तमधीष्टो भृतो भूतो भावी॥ अधीष्टः सत्कृत्य व्यापारि ॥१३०॥
२स्वयमेवजातः तः॥ भृतो वेतनेन क्रीतः॥ भूतः स्वसत्तया व्याप्तकालः॥ भावी तादृश एवानागतः॥ मासमधीष्टः मासिकोऽध्यापकः॥ मासं भृ
तो मासिकः कर्मकरः॥ मासं भूतो मासिको व्याधिः॥ मासं भावी मासिक उत्सवः॥ मासाद्वयसि यत्खञौ॥ मासं भूतो मास्यः

परिमाणान्तस्य संज्ञाशाणयोः॥ द्वौ कुडवौ [illegible] द्विकौडविकः॥ [illegible] द्वैशाणिकं॥ त्रिनैष्किकं॥ असंज्ञायां॥ [illegible] परिमाण[illegible]
[illegible] द्विपाण्यं॥ [illegible] द्विकुडविकः॥

मासीनः॥ द्विगोर्यप्॥ मासाद्वयसीत्यनुवर्त्तते॥ द्वौ मासौ भूतो द्विमास्यः॥ षण्मासाण्ण्यच्च॥ वयसीत्येव॥ यबप्यनुवर्त्तते॥ [illegible]॥
षाण्मास्यः॥ षण्मास्यः॥ षाण्मासिकः॥ अवयसि ठंश्च॥ चाण्ण्यप्॥ षण्मासिकोऽवधिः॥ षाण्मास्यः॥ समायाः खः॥ समामधीष्टो भृ
तो भूतो भावी वा समीनः॥ द्विगोर्वा॥ समायाः ख इत्येव॥ तेन परिजय्यलभ्यकार्यसुकरेष्वित्यतः प्राक् निर्वृत्तादिषु पंचस्वर्थेषु प्रत्ययाः॥ द्विसमीनः॥ द्वैसमि
कः॥ रात्र्यहःसंवत्सराच्च॥ द्विगोरित्येव॥ द्विरात्रीणः॥ द्वैरात्रिकः॥ द्व्यहीनः॥ द्व्याह्निकः॥ समासान्तविधेरनित्यत्वान्नटच्॥ द्विसंवत्सरी
णः॥ संख्यायाः संवत्सरसंख्यस्य च॥ संख्याया उत्तरपदवृद्धिः स्यात् ञिति णिति किति॥ द्विसांवत्सरिकः॥ द्वे षष्टी भूतो द्विषाष्टिकः॥ संख्या
याः परिमाणान्तस्येत्येव सिद्धे संवत्सरग्रहणं परिमाणग्रहणे कालपरिमाणस्याग्रहणार्थं॥ तेन द्वैसमिक इत्यत्रोत्तरपदवृद्धिर्न॥ व
र्षाल्लुक् च॥ वर्षशब्दान्ताद्द्विगोर्वा खः॥ पक्षे ठञ्॥ वा लुक् च॥ त्रिणि रूपाणि॥ द्विवर्षीणो व्याधिः॥ द्विवर्षः॥ वर्षस्याभविष्यति॥ उत्त
रपदवृद्धिः स्यात्॥ द्विवार्षिकः॥ भविष्यति तु द्वैवार्षिकः॥ त्रीणि वर्षाणि भावी त्रैवार्षिकं॥ अधीष्टभृतयोरभविष्यतीति प्रतिषे
नतुभत्यर्थंभ धेन॥ गम्यते हि तत्र भविष्यत्तानलुता द्वितार्थः॥ द्विवर्षमधीष्टो भृतो वा कर्म करिष्यति इति द्विवार्षिको मनुष्यः॥ चित्तवति नि
विष्यदर्थः २ त्यं॥ वर्षशब्दान्ताद्द्विगोः प्रत्ययस्य नित्यं लुक् स्यात्॥ चेतनप्रत्ययार्थे॥ द्विवर्षो दारकः॥ षष्टिकाः षष्टिरात्रेण पच्यन्ते॥ बहुवचनमतं

१प्रस्थादिपरिमाणग्रहणे कालपरिमाणग्रहणं न भवतु॰५ पृ॰१

त्रं॥ भृष्टिको धान्यविशेषः॥ तृतीयांतात् अक्रनात्रराद्द्लोपश्च निपात्यते॥ तेन परिजय्यलभ्यकार्यसुकरं॥ मासेन परिजय्यो जेतुं त॰का॰
शक्यो मासिको व्याधिः॥ मासेन लभ्यं कार्यं सुकरं वा मासिकं॥ ॥ तदस्य ब्रह्मचर्यं॥ द्वितीयांतात्कालवाचिनोस्येत्यर्थे प्र
॥सि॰प्र॰॥ त्ययः स्यात्॥ अत्यंतसंयोगे द्वितीया॥ मासं ब्रह्मचर्यमस्य सः मासिको ब्रह्मचारी॥ आर्धमासिकः॥ यद्वा प्रथमांतादस्येत्यर्थे प
॥१३१॥ प्रत्ययः॥ मासोस्येति मासिकं ब्रह्मचर्यं॥ महानाम्न्यादिभ्यः षष्ठ्यंतेभ्य उपसंख्यानं॥ महानाम्न्यो नाम विदा मघवन्नित्या
द्या ऋचः॥ तासां ब्रह्मचर्यमस्य माहानाम्निकः॥ हरदत्तस्तु सस्याद् इति पुंवद्भावान्माहानाम्निक इत्याह॥ चतुर्मासाण्ण्यो यज्ञे॥
तत्र भवे इत्यर्थे॥ चतुर्मासेषु भवानि चातुर्मास्यानि यज्ञाः॥ संज्ञायामण्वक्तव्यः॥ चतुर्मासेषु भवति चातुर्मासी पौर्णमासी॥ आ
षाढी॥ तस्य च दक्षिणा यज्ञाख्येभ्यः॥ द्वादशाहस्य दक्षिणा द्वादशाहिकी॥ आख्याग्रहणादकालादपि॥ आग्निष्टोमिकी॥
वाजपेयिकी॥ तत्र च दीयते कार्यं भववत्॥ प्रावृषि दीयते कार्यं प्रावृषेण्यं॥ शारदं॥ ॥ इति कालाधिकारस्य पूर्णावधिः॥ ॥१३१॥
व्युष्टादिभ्योऽण्॥ व्युष्टे दीयते कार्यं वा वैयुष्टं॥ व्युष्ट॥ तीर्थ॥ संग्राम॥ प्रवास इत्यादि॥ तेन यथाकथाचहस्ताभ्यां णयतौ॥
यथाकथाचेत्यव्ययसंघातात् तृतीयांताद्धस्तशब्दाच्च यथासंख्यं णयतौ स्तः॥ अर्पणीयां तु यथासंख्यं तु नेष्यते॥ याथाक

थाचं दीयते कार्यं वा याथाकथाचं॥ अनादरेण देयं कार्यमित्यर्थः॥ हस्तेन दीयते कार्यं वा हस्त्यं॥ संपादिनि॥ तेनेत्येव॥ कर्णवेष्ट
काभ्यां संपादि मुखं कार्णवेष्टकिकं मुखं॥ कर्णालंकाराभ्यां भवश्यं शोभत इत्यर्थः॥ कर्मवेषाद्यत्॥ कर्मणा संपादि कर्मण्यं॥
शौर्यं॥ वेषेण संपादि वैष्यो नटः॥ वेषः कृत्रिम आकारः॥ तस्मै प्रभवति संतापादिभ्यः॥ संतापाय प्रभवति सांतापिकः॥ संग्रा
माय प्रभवति सांग्रामिकः॥ योगाद्यच्च॥ चाट्ठञ्॥ योगाय प्रभवति योग्यो रथः॥ यौगिकः॥ कर्मण उकञ्॥ कर्मणे प्रभवति कार्मु
कं॥ ॥ समयस्तदस्य प्राप्तं॥ समयः प्राप्तोस्य सामयिकं॥ ऋतोरण्॥ ऋतुः प्राप्तोस्य आर्त्तवं॥ कालाद्यत्॥ कालः प्राप्तोस्य
काल्यं शीतं॥ प्रकृष्टे ठञ्॥ कालादित्येव॥ प्रकृष्टो दीर्घः कालोस्येति कालिकं वैरं॥ प्रयोजनं॥ तदस्येत्येव॥ इंद्रमहः प्रयोजनमस्य
ऐंद्रमहिकं॥ प्रयोजनं फलं कारणं च॥ विशाखाषाढादण्मंथदंडयोः॥ आभ्यामण् स्यात् प्रयोजनमित्यर्थे क्रमान्मंथदंडयोरभि
धेये॥ विशाखा प्रयोजनमस्य वैशाखो मंथः॥ आषाढो दंडः॥ चूडादिभ्य उपसंख्यानं॥ चूडा॥ चौडं॥ श्रद्धा॥ श्राद्धं॥ अनुप्रवचनादि
भ्यश्छः॥ अनुप्रयोजनं प्रवचनमस्य अनुप्रवचनीयं॥ समापनात्सपूर्वपदात्॥ व्याकरणसमापनं प्रयोजनमस्य व्याकरणस
मापनीयं॥ ऐकागारिकट् चौरे॥ एकमसहायमगारं प्रयोजनमस्य मुमुषिषोः स ऐकागारिकश्चौरः॥ चौरे ऐकागारिकस्तेन

इत्यमरात्॥ आकालिकडाद्यंतवचने॥ समानकालावाद्यंतौ यस्येत्याकालिकः॥ समानकालस्याकालिकडादेशः॥ तद्धि०
आशुविनाशी सर्पः॥ पूर्वदिवसे मध्याह्नादावुत्पद्य दिनांतरे तत्रैव नश्यन्नित्यर्थः॥ अकालात्ठंश्च॥ आकालिकाविद्युत्॥
॥सि० पू०॥ ॥ ठञः पूर्णविधिः॥ ॥ तेन तुल्यं क्रिया चेद्वतिः॥ ब्राह्मणेन तुल्यं ब्राह्मणवदधीते॥ अत्र गुणतुल्यत्वात्तद्वा क्रिया
॥१२२॥ सत्त्वात् अध्ययनलक्षणक्रिया॥ तस्माद्ब्राह्मण इवाधीतेवामनोम्हदर्शितं॥ तथा वामावद्धावरति चरित्रं॥ देव इव पश्यति विना
श्मित्यादौ देववदित्यादि॥ क्रियाचेत्किं॥ गुणतुल्ये मा भूत्॥ पुत्रेण तुल्यः स्थूलः॥ तत्र तस्येव॥ मथुरायामिव मथुरावत्स्रुघ्ने
प्राकारः॥ चैत्रस्येव चैत्रवन्मैत्रस्य गावः॥ ॥तदर्हं॥ विधिमर्हतीति विधिवत्पूज्यते॥ क्रियाग्रहणं मंडूकप्लुत्यानुवर्त्तते॥ ते
नेह न॥ राजानमर्हति छत्रं॥ तस्य भावस्त्वतलौ॥ प्रकृतिजन्यबोधे प्रकारो भावः॥ गोर्भावः गोत्वं॥ गोता॥ त्वांतं क्लीबं॥ तलं
तं स्त्रियां॥ आचत्वात्॥ ब्रह्मणस्त्व इत्यतः प्राक् त्वतलावधिक्रियेते॥ अपवादैः सह समावेशार्थं गुणवचनादिभ्यः कर्मणि
विधानार्थं चेदं॥ चकारो नञ्स्नञ्भ्यामपि समावेशार्थः॥ स्त्रियाः भावः स्त्रैणं॥ स्त्रीत्वं॥ स्त्रीता॥ पौंस्नं॥ पुंस्त्वं॥ पुंस्ता॥ ननु ॥१२२॥
सूत्रात्तत्पुरुषाद् नञुत्तरसंगतलवणवदबुधकतरसलसेभ्यः॥ इतः परं ये भावप्रत्ययास्तेनञ्तत्पुरुषान्न स्युश्चतुरादी

नर्जयित्वा॥ अपतित्वं॥ अपटुत्वं॥ नञ्पूर्वात्किं॥ बार्हस्पत्यं॥ तत्पुरुषात्किं॥ नास्य पटवः संतीत्यपटुः॥ तस्य भावः आपट
वः॥ अचतुरेति किं॥ आचतुर्यं॥ आसंगत्यं॥ आलवण्यं॥ आवध्यं॥ आबुध्यं॥ आकत्यं॥ आरस्यं॥ आलस्यं॥ पृथ्वादिभ्य इम
निज्वा॥ वा वचनमणादिसमावेशार्थं॥ रऋतो हलादेर्लघोः॥ इष्ठेमेयस्सु॥ टेः॥ टेर्लोपः स्यादिष्ठेमेयस्सु॥ पृथोर्भावः प्रथि
मा॥ पार्थिवं॥ म्रदिमा॥ मार्दवं॥ वर्णदृढादिभ्यः ष्यञ्च॥ चादिमनिच्॥ शौक्ल्यं॥ शुक्लिमा॥ दार्ढ्यं॥ पृथुमृदुभृशकृशदृढपरिवृढ
नामेव रत्वं॥ द्रढिमा॥ चौडीवर्ण्यः॥ औचिती॥ याथाकामी॥ गुणवचनब्राह्मणादिभ्यः कर्मणि च॥ चाद्भावे॥ जडस्य कर्म भावो वा
जाड्यं॥ मौढ्यं॥ ब्राह्मण्यं॥ अर्हतो नुम् च॥ अर्हतो भावः कर्म वा आर्हंत्यं॥ आर्हंती॥ ब्राह्मणादिराकृतिगणः॥ ॥ यथातथ
यथापुरयोः पर्यायेण॥ नञः परयोरेतयोः पूर्वोत्तरपदयोः पर्यायेणादेरचो वृद्धिर्निदाहे॥ अयथातथाभावः आयथातथ्यं
अयाथातथ्यं॥ आयथापुर्यं॥ अयाथापुर्यं॥ आपादसमाप्तेः भावकर्माधिकारः॥ चतुर्वर्णादीनां स्वार्थ उपसंख्यानं॥ चत्वा
रो वर्णाश्चातुर्वर्ण्यं॥ चातुराश्रम्यं॥ त्रैस्वर्यं॥ षाड्गुण्यं॥ सैन्यं॥ सान्निध्यं॥ सामीप्यं॥ औपम्यं॥ त्रैलोक्यमित्यादि॥ सर्ववेदाः स
र्ववेदाः तानधीते सर्ववेदः॥ सर्वादेरिति लुक्॥ स एव सार्ववैद्यः॥ स्तेनाद्यन्नलोपश्च॥ चतुर्वेदस्योभयपदवृद्धिश्च॥ चतुरो वे

दानधीते चतुर्वेदः । स एव चातुर्वैद्यः । चतुर्विद्यस्येति पाठान्तरं । चतुर्विद्य एव चातुर्वैद्यः । स्तेनाद्यन्नलोपश्च । नेति संघातग्रहणं । स्तेन ८०
॥सि॰कौ॰॥ चौर्ये । पचाद्यच् । स्तेनस्य भावः कर्म वा स्तेयं । स्तेनादिति योगविभागः स्तैन्यमिति [illegible] ष्यञन्तमपि केचिदिच्छन्ति । सख्यु
र्यः । सख्युर्भावः कर्म वा सख्यं । दूतवणिग्भ्यां च । दूतस्य भावः कर्म वा दूत्यं । वणिज्यमिति काशिका । माधवस्तु वणिजो भावः
॥१२२॥ स्वभावात्स्त्रीलिंगः ॥ भाव एव चात्र प्रत्ययो न तु कर्मणीत्याह । भाष्ये तु दूतवणिग्भ्यां चेति नास्त्येव । ब्राह्मणादित्वाद्वाणिज्य
मपि । कपिज्ञात्योर्ढक् । कापेयं । ज्ञातेयं । पत्यन्तपुरोहितादिभ्यो यक् । सैनापत्यं । पौरोहित्यं । राजा से । राजशब्दः समासे
कं लभत इत्यर्थः । राज्ञो भावः कर्म वा राज्यं । समासे तु ब्राह्मणादित्वात् ष्यञ् । आधिराज्यं । प्राणिभृज्जातिवयोवचनोद्गात्रादि
भ्योऽञ् । प्राणिभृज्जातिः । आश्वं । औष्ट्रं । वयोवचनं । कौमारं । कैशोरं । औद्गात्रं । औन्नेत्रं । सौष्ठवं । दौष्ठवं । हायनान्तयुवादि
भ्योऽण् । द्वैहायनं । त्रैहायनं । यौवनं । स्थाविरं । श्रोत्रियस्य यलोपश्च । श्रौत्रं । कुशल । चपल । निपुण । पिशुन । कुतूहल । क्षेत्रज्ञ । यु ॥१२२॥
वादिषु ब्राह्मणादिषु च पठ्यन्ते । कौशलं । कौशल्यमित्यादि । इगन्ताच्च लघुपूर्वात् । शुचेर्भावः कर्म वा शौचं । मौनं । काषं । काव्यं । क
विशारदस्य ब्राह्मणादित्वात् । योपधाद्गुरूपोत्तमाद्वुञ् । रामणीयकं । आभिधानीयकं । सहायाद्वा । साहाय्यं । साहायकं । द्वंद्वमनो

द्वंद्वमनोज्ञादिभ्यश्च । शैष्योपाध्यायिका । मानोज्ञकं । गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु । अत्याकारोऽधिक्षेपः । तदवेतः । ते गोत्रचरण
योः सामान्यकर्मणी प्राप्तः । अवगतवान्वा । गार्गिकया श्लाघते । गार्ग्यत्वेन विकत्थत इत्यर्थः । गार्गिकया साऽकुरुते । गार्ग्यत्वेन परानधिक्षि
पतीत्यर्थः । गार्गिकामन्ववेतः । गार्ग्यत्वं प्राप्त इत्यर्थः । काठकेन श्लाघते । होत्राभ्यश्छः । होत्राशब्द ऋत्विग्वाची स्त्रीलिंगः । बहुवचना
द्विरेषणं । अच्छावाकस्य भावः कर्म वा अच्छावाकीयं । मैत्रावरुणीयं । ब्रह्मणस्त्वः । होत्रावाचिनो ब्रह्मशब्दात्त्वः स्याच्छस्यापवादः । ब्र
ह्मत्वं । नेतिवाच्ये ब्रह्मणस्त्व इति वचनं । तलो बाधनार्थं । ब्राह्मणपर्यायात् । ब्रह्मन्शब्दान्त्वतलौ । ब्रह्मत्वं । ब्रह्मता । इति नञ्
स्नञोरधिकारः ॥ ॥ धान्यानां भवने क्षेत्रे खञ् । भवत्यस्मिन्निति भवनं । मुद्गानां भवनं क्षेत्रं मौद्गीनं । व्रीहिशाल्योर्ढक् । व्रैहेयं ।
शालेयं । यवयवकषष्टिकाद्यत् । यवानां भवनं क्षेत्रं यव्यं । यवक्यं । षष्टिक्यं । ॥ विभाषा तिलमाषोमाभंगाणुभ्यः ॥ [illegible]
तिल्यं । तैलीनं । माष्यं । माषीणं । उम्यं । औमीनं । भंग्यं । भांगीनं । अणव्यं । आणवीनं । सर्वचर्मणः कृतः खखञौ । असामर्थ्येऽपि निपा
तनात्समासः । सर्वश्चर्मणा कृतः सर्वचर्मीणः । सार्वचर्मीणः । यथामुखसंमुखस्य दर्शनः खः । मुखस्य सदृशं यथामुखं प्रतिबिंबं
निपातनात्सादृश्येऽव्ययीभावः । समं सर्वं मुखं संमुखं । समशब्दस्यान्तलोपो निपात्यते । यथामुखं दर्शनः यथामुखीनः । सर्वस्य दर्शी

॥ सि॰ पू॰ ॥ नस्य दर्शनः संमुखीनः ॥ तत्सर्वादेः पथ्यंगकर्मपत्रपात्रं व्याप्नोति ॥ सर्वादेः पथ्याद्यंताद्द्वितीयांतात्खः स्यात् ॥ सर्वपथान्व्याप्नोति सर्वप त॰ मल॰
थीनः ॥ सर्वांगीणः ॥ सर्वकर्मीणः ॥ सर्वपत्रीणः ॥ सर्वपात्रीणः ॥ आप्रपदं प्राप्नोति ॥ पदस्याग्रे प्रपदं ॥ तन्मर्यादीकृत्य आप्रपदं ॥ आप्रपदीनः ॥
अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ॥ अनुरायामे सादृश्ये वा ॥ अनुपदं बद्धा अनुपदीना उपानत् ॥ सर्वान्नानि भक्षयति स
र्वान्नीनो भिक्षुः ॥ अयानयः खलविशेषः ॥ तं नेयः अयानयीनः शारः ॥ परोवरपरंपरपुत्रपौत्रमनुभवति ॥ परांश्च अवरांश्चानुभवति
॥ १२५ ॥ परोवरीणः ॥ अवरस्योत्वं निपात्यते ॥ परांश्च परतरांश्चानुभवति परंपरीणः ॥ प्रकृतेः परंपरभावो निपात्यते ॥ पुत्रपौत्राननुभवति पु
त्रपौत्रीणः ॥ परंपराशब्दस्त्वव्युत्पन्नं शब्दांतरं स्त्रीलिंगं ॥ तस्मादेव स्वार्थे ष्यञि पारंपर्यं ॥ कथं पारोवर्यविदिति ॥ असाधुरेवायं ॥
खप्रत्ययसंनियोगेनैव परोवरेति निपातनात् ॥ अवारपारात्यंतानुकामं गामी ॥ अवारपारं गामी अवारपारीणः ॥ अवारी
णः ॥ पारीणः ॥ पारावारीणः ॥ अत्यंतं गामी अत्यंतीनः ॥ भृशं गंतेत्यर्थः ॥ अनुकामीनः ॥ यथेष्टं गंता ॥ समांसमां विजायते ॥ यलो ॥ १२५ ॥
पोवशिष्टविभक्तेरलुक् च पूर्वपदे निपात्यते ॥ समांसमीना गौः ॥ समां समीनात् सायैव प्रतिवर्षं प्रसूयते ॥ खमत्यय अनुत्पत्तौ य
लोपो वा वक्तव्यः ॥ समांसमां विजायते ॥ सभायां समायां वा ॥ अद्यश्वीनावष्टब्धे ॥ अद्यश्वो वा विजायते ॥ अद्यश्वीना वडवा ॥ आ

गोष्ठस्य भूतपूर्वः गोष्ठीनो देशः ॥ अह्नस्यैकाहगमः एकाहेन गम्यते इति एकाहगमः ॥ आश्वीनोध्वा ॥ ४ ॥
अनुगवीनो गोपालः ॥ अध्वनो यत्खौ ॥ अध्वानमलंगामी
शालीनकौपीने अधृष्टाकार्ययोः ॥ ४

सन्नप्रसवेत्यर्थः ॥ केचित्तु विजायत इति नानुवर्तयंति ॥ अद्यश्वीनं मरणं ॥ आसन्नमित्यर्थः ॥ आगवीनः ॥ आङ्गोः कर्मकरे खप्रत्ययो नि द्वा॰
पात्यते ॥ गोः प्रत्यर्पणपर्यंतं यः कर्म करोति स आगवीनः ॥ अनुग्वलंगामी ॥ अनुगु गोः पश्चात्पर्याप्तं गच्छति ॥ अध्वन्यः ॥ अध्वनीनः ॥
येनाताव कर्मणो ॥ आत्माध्वानौ ख इति प्रकृतिभावः ॥ अभ्यमित्राच्छ च ॥ चाद्यत्खौ ॥ अभ्यमित्री ॥ अभ्यमित्र्यः ॥ अभ्यमित्रीणः ॥ अमि
त्राभिमुखं सुष्ठु गच्छतीत्यर्थः ॥ गोष्ठात्खञ् भूतपूर्वे ॥ शालाप्रवेशमर्हति शालीनः ॥ अधृष्टः ॥ कूपपतनमर्हति कौपीनं पापं ॥ तत्साधनता
त्तद्वलोप्यत्वाद्धा पुरुषलिंगमपि ॥ तत्संबंधात्तदाच्छादनं दृमपि ॥ व्रातेन जीवति ॥ व्रातेन शरीरायासेन जीवति नतु बुद्धिवैभवेन सः व्रातीनः ॥
साप्तपदीनं सख्यं ॥ सप्तभिः पदैरवाप्यते साप्तपदीनं ॥ हैयंगवीनं संज्ञायां ॥ ह्योगोदोहस्य हियंगुरादेशः ॥ विकारार्थे खञ् च निपात्य
ते ॥ दुह्यत इति दोहः क्षीरं ॥ ह्योगोदोहस्य विकारः ॥ हैयंगवीनं नवनीतं ॥ तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ॥ पी
लूनां पाकः पीलुकुणः ॥ कर्णस्य मूलं कर्णजाहं ॥ पक्षात्तिः ॥ मूलग्रहणं मात्रमनुवर्तते ॥ पक्षस्य मूलं पक्षतिः ॥ तेन वित्तश्चुंचुप्चणपौ ॥
प्रसिद्धः यकारः प्रत्यययोरादौ लुप्तो निर्दिष्टः ॥ तेन न स्यन्ते संज्ञा ॥ विद्यया वित्तः विद्याचुंचुः ॥ विद्याचणः ॥ विनञ्भ्यां नानाञौ नसह ॥ असहार्थे
पृथग्भावे वर्तमानाभ्यां स्वार्थे प्रत्ययौ ॥ विना ॥ नाना ॥ वेः शालच्छंकटचौ ॥ कृमाविशिष्टस्य वाचकात्स्वार्थे ॥ विस्तृतं विशालं विशंक

विलपिलादेशौलमस्यचक्षुषीस्यर्थे॰

टं॥ संप्रोदश्च कटच्॥ संकटं॥ प्रकटं॥ उत्कटं॥ वाद्धिकटं॥ अलाबूतिलोमाभंगाभ्यो रजस्युपसंख्यानं॥ अलाबूनां रजः अलाबूकटं॥ त॰मल॰
तिलकटं॥ गोष्ठजादयः स्थानादिषु पशुनामभ्यः॥ गवां स्थानं गोगोष्ठं॥ अश्वगोष्ठं॥ संघाते कटच्॥ अवीनां संघातो ऽविकटः॥ विस्ता
॥सि॰पू॰॥ रे पटच्॥ अविपटः॥ द्वित्वे गोयुगच्॥ द्वौ उष्ट्रौ उष्ट्रगोयुगं॥ षट्त्वे षड्गवच्॥ स्नेहे तैलच्॥ तिलतैलं॥ सर्षपतैलं॥ भवने क्षेत्रे शाकटशाकि अश्वपद्मनं॰२
नौ॥ इक्षुशाकटं॥ इक्षुशाकिनं॥ अवात्कुटारच्॥ वाल्कटच्॥ अवाचीनः॥ अवकुटारः॥ अवकुटः॥ नते नासिकायाः संज्ञायां
॥१२३१॥ टीटञ्नाटज्भ्रटचः॥ अवात् इत्येव॥ नतं नमनं॥ नासिकाया नतं अवटीटं॥ अवनाटं॥ अवभ्रटं॥ तद्योगान्नासिका अवटीटा॥ पुरुषोऽ
वटीटः॥ नेर्बिडज्बिरीसचौ॥ निबिडं॥ निबिरीसं॥ इनच्पिटच्चिकचि च॥ नेरित्येव॥ नासिकाया नतं अस्ति येषु इनच्पिटौ नाम्नस्य
प्रकृतेश्चिकचिचइत्यादेशौ॥ कप्रत्ययचिकादेशौ च वक्तव्यौ॥ चिकिनं॥ चिपिटं॥ चिक्कं॥ क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी
क्लिन्ने चक्षुषी अस्य चिल्लः॥ पिल्लः॥ चुल्लः॥ उपाधिभ्यां त्यकन्नासन्नारूढयोः॥ संज्ञायामित्यनुवर्तते॥ पर्वतस्यासन्नं स्थलं ॥१२४॥
उपत्यका॥ आरूढं स्थलमधित्यका॥ कर्मणि घटोऽठच्॥ घटत इति घटः॥ पचादयच्॥ कर्मणि घटते कर्मठः पुरुषः॥ तदस्य संजा
तं तारकादिभ्य इतच्॥ तारकाः संजाता अस्य तारकितं नभः॥ आकृतिगणोऽयं॥ प्रमाणे द्वयसज्दघ्नञ्मात्रचः॥ तदस्येत्यनुवर्तते
ऊरुप्रमाणमस्य ऊरुद्वयसं॥ ऊरुदघ्नं॥ ऊरुमात्रं॥ प्रमाणे लः॥ शमः॥ दिष्टिः॥ वितस्तिः॥ द्विगोर्नित्यं॥ द्वौ शमौ प्रमाणमस्य द्विशमं॥
लुकः एषां पूर्वाचार्यसंज्ञाप्रमाणशब्देन येषु प्रसिद्धा दिष्टिहस्त्यादिष्वपरस्यैवायं लुक्॥ शमो दिष्टिर्वितस्तिरिति एषु मात्रचो लुक् इतरयोरसंभवात् शमादीनामनप्रमानत्वात्॰

प्रमाणपरिमाणाभ्यां संख्यायाश्च संशये मात्रज्वक्तव्यः॥ शममात्रं॥ प्रस्थमात्रं॥ पंचमात्रं॥ वत्वंतात्स्वार्थे द्वयसज्मात्रचौ॥ तावदेव ता
वद्द्वयसं॥ तावन्मात्रं॥ पुरुषहस्तिभ्यामण् च॥ पुरुषः प्रमाणमस्य पौरुषं॥ पुरुषद्वयसं॥ यत्तदेतेभ्यः परिमाणे वतुप्॥ यत्परिमाण
मस्य यावान्॥ तावान्॥ एतावान्॥ किमिदंभ्यां वो घः॥ आभ्यां वतुप् स्याद्वस्य च घः॥ इदंकिमोरीश्की॥ इदं हश वतुप्॥ यस्येति लोति
लोपः॥ कियान्॥ इयान्॥ किमः संख्यापरिमाणे डति च॥ संख्यायाः परिमाणं परिच्छेदः॥ तस्मिन् कर्तव्ये यः प्रश्नस्तत्र वर्तमानात् कि
मः अस्येति षष्ठ्यर्थे डतिः स्यात्॥ चाद्वतुप्॥ तस्य वस्य च घः स्यात्॥ का संख्या येषां ते कति॥ कियंतः॥ संख्याया अवयवे तयप्॥
पंच अवयवा यस्य पंचतयं॥ द्वित्रिभ्यां तयस्यायज्वा॥ द्वयं॥ द्वितयं॥ त्रयं॥ त्रितयं॥ उभादुदात्तो नित्यं॥ उभशब्दात्तयपो ऽयच्स्यात्
स चाद्युदात्तः॥ उभयं॥ तदस्मिन्नधिकमिति दशांताड्डः॥ एकादश अधिका अस्मिन्नेकादशं॥ शतसहस्रयोरेवेष्यते॥ नेह॥
एकादश अधिका अस्यां त्रिंशत्यां॥ प्रकृतिप्रत्ययार्थयोः समानजातीयत्वएवेष्यते॥ तेनेह न॥ एकादश माषा अधिका अस्मिन् सु तोऽलक॰२
र्णशते॥ शांतदंतविंशतेश्च॥ डः स्याद् उक्तेऽर्थे॥ त्रिंशदधिका अस्मिन् त्रिंशं शतं॥ विंशं॥ संख्याया गुणस्य निमाने मयट्॥ भागस्य मूल्ये
ता वर्तमानात्प्रथमांतात्संख्यावाचिनः षष्ठ्यर्थे मयट् स्यात् यवानां द्वौ भागौ निमानमस्योदश्वितो भागस्य द्वियं मयमुदश्विद्यवानां॥ गुणस्य

एकादशोत्तरं शतं सहस्रं चेत्यर्थः॥४

तिकिं॥ द्वौ त्रीन्हि येषां निमानमस्योदश्वितः॥ निमानेर्किं॥ द्वौ गुणौ क्षीरस्य॥ एकस्तैलस्य॥ द्विगुणं तैलं पच्यते क्षीरेण॥ तस्य पूरणे डट्॥ त०म०त०
॥सि०पू०॥ एकादशानां पूरण एकादशः॥ नान्तादसंख्यादेर्मट्॥ डटो मडागमः स्यात्॥ पंचानां पूरणः पंचमः॥ नान्तात्किं॥ विंशः॥ असंख्यादेः॥ ए किं०२
कादशः॥ षट्कतिकतिपयचतुरां थुक्॥ एषां थुगागमः स्याड्डटि॥ षण्णां पूरणः षष्ठः॥ कतिथः॥ कतिपयशब्दस्य असंख्यात्वेपि अतए
॥१२८॥ व ज्ञापकाड्डट्॥ क[illegible]तिपयथः॥ चतुर्थः॥ चतुरश्छयतावाद्यक्षरलोपश्च॥ तुरीयः॥ तुर्यः॥ बहुपूगगणसंघस्य तिथुक्॥ डटीत्येव॥ पू
गसंख्ययोरसंख्यात्वेपि अतएव डट्॥ बहुतिथः॥ इत्यादि॥ वतोरिथुक्॥ डटीत्येव॥ यावतिथः॥ द्वेस्तीयः॥ डटोपवादः॥ द्वयोः पू
रणो द्वितीयः॥ त्रेः संप्रसारणं च॥ तृतीयः॥ हलङ इति दीर्घो न॥ द्वितीयतृतीयेत्यादिनिर्देशात्॥ विंशत्यादिभ्यस्तमडन्यतरस्यां॥
एभ्यो डटस्तमडागमो वा स्यात्॥ विंशतितमः॥ विंशः॥ एकविंशतितमः॥ ॥नित्यं शतादिमासार्धमाससंवत्सराच्च॥ शतस्य पूरणः
शततमः॥ एकशततमः॥ मासादेरत एव डट्॥ मासतमः॥ षष्ट्यादेश्चासंख्यादेः॥ षष्ठ्याः षष्टितमः॥ संख्यादेस्तु विंशत्यादिभ्य इति ॥१२८॥
विकल्प एव॥ एकषष्टः॥ एकषष्टितमः॥ मतौ छः सूक्तसाम्नोः॥ मत्वर्थे छः स्यात्॥ अछावाकशब्दोस्मिन्नस्ति अछावाकीयं सूक्तं॥
वारवंतीयं साम॥ अध्यायानुवाकयोर्लुक्॥ मत्वर्थस्य छस्य॥ अतएव ज्ञापकात्तत्र छः॥ विधानसामर्थ्याच्च विकल्पेन लुक्॥ गर्द

भांडः॥ गर्दभांडीयः॥ विमुक्तादिभ्योण्॥ मत्वर्थे ण्स्यादध्यायानुवाकयोः॥ विमुक्तशब्दोस्मिन्नस्ति वैमुक्तः॥ दैवासुरः॥ गोषदादिभ्यो वुन्॥
मत्वर्थेध्यायानुवाकयोः॥ गोषदकः॥ इषेत्वकः॥ तत्रकुशलः पथः॥ पूर्वसूत्रमनुवर्तते॥ वुन्स्यात्॥ पथिकुशलः पथकः॥ आकर्षादिभ्यः कन्॥ आ
कर्षे कुशलः आकर्षकः॥ आकर्षादिभ्य इति रेफरहितो मुख्यः पाठः॥ आकषो निकषः॥ धनहिरण्यात्कामे॥ कामइच्छा॥ धने कामो यस्य सोध
नको देवदत्तः॥ हिरण्यकः॥ स्वांगेभ्यः प्रसिते॥ केशेषु प्रसितः केशकः॥ तद्रचनायां तत्पर इत्यर्थः॥ उदराट्ठगाद्यूने॥ अविजिगीषोठक्स्यात्क प्रसि०ः४
नोपवादः॥ बुभुक्षया अतिपीडित उदरे प्रसित औदरिकः॥ आद्यूने किं॥ उदरकः॥ उदरपरिमार्जनादौ प्रसक्त इत्यर्थः॥ सस्येन परिजातः॥ क
न्स्मर्यते॥ नलुक्॥ सस्यशब्दो गुणवाची न तु धान्यवाची॥ शस्येनेति पाठांतरं॥ सस्येन गुणेन परिजातः संबद्धः शस्यकः साधुः॥ अंशंहारी
हंतीत्यावश्यके णिनिः॥ अतएव तद्योगे षष्ठी न॥ अंशको दायादः॥ तंत्रादचिरापहृते॥ तंत्रकः पटः॥ प्रत्यग्र इत्यर्थः॥ ब्राह्मणकोष्णिके संज्ञायां
॥र॥ आयुधजीविनो ब्राह्मणा यस्मिन्देशे स ब्राह्मणकः॥ अल्पमन्नं यस्यां सा उष्णिका यवागूः॥ अन्नशब्दस्य उष्णादेशो निपात्यते॥ शीतो
ष्णाभ्यां कारिणि॥ शीतं करोति शीतकः॥ अलसः॥ उष्णं करोति उष्णकः शीघ्रकारी॥ अधिकं॥ अध्यारूढशब्दात्कन् उत्तरपदलोपश्च॥ अ
नुकाभिकाभीकः कमिता॥ अन्वभिभ्यां कन् अभेः पाक्षिको दीर्घश्च॥ अनुकामयते अनुकः॥ अभिकामयते अभिकः॥ अभीकः॥ पार्श्वेना
न्विच्छति॥ अनृजुरुपायः पार्श्वं तेन अन्विच्छति पार्श्वकः॥ अयःशूलदंडाजिनाभ्यां ठक्ठञौ॥ तीक्ष्णउपायोयःशूलं॥ तेनान्विच्छति आयःशू

लिकः॥ माहसिकः॥ दांडाजिनं दंभः॥ तेनान्विच्छतीति दांडाजिनिकः॥ तावतिथं ग्रहणमिति लुग्वा॥ कस्यापूरणप्रत्ययस्य लुग्वा लुकि॥ द्वितीय त०मत०
सि०कृ० कं॥ द्वैकं वा ग्रहणं देवदत्तस्य॥ द्वितीयेन रूपेण ग्रहणमित्यर्थः॥ तावतिथेन गृह्णातीति कन्नित्यं॥ नित्यं लुक्॥ षष्ठेन रूपेण गृह्णाती
ति षट्को देवदत्तकः॥ पंचकः॥ सप्तम्यां ग्रामणीः॥ देवदत्तो मुख्यो येषां ते देवदत्तकाः॥ त्वं मुख्यो येषां ते त्वत्काः॥ अहं मुख्यो येषां ते मत्काः॥ शृंखल
१२७ मस्य बंधनं करभे॥ शृंखलः करभः॥ उत्क उन्मनाः॥ उद्गतमनस्क इत्ते रुत्क्षात्त्वार्थे कन्॥ उत्क उत्कंठितः॥ कालप्रयोजनाद्रोगे॥ कालमस्यना
न्यो ज्वरो नव नाशकं स्याद्रोगे॥ द्वितीयेऽहनि भवो द्वितीयको ज्वरः॥ प्रयोजनं कारणं रोगस्य फलं वा॥ विषपुष्पैर्जनितो विषपुष्पकः॥ उष्ण
कार्यमस्य उष्णकः॥ रोगविशेषः॥ द्वितीयो दिवसोऽस्य॥ तस्मिन्नन्नं प्राये संज्ञायां॥ अथ मासास्तस्मिन्नपर्येकन्स्यात्॥ यत्र प्रमांतमन्नं तमाय
विषयं [illegible] तत्र॥ गुडापूपाः प्रायेणान्नमस्यां गुडापूपिका पौर्णमासी॥ वटकेभ्य इनिर्वाच्यः॥ वटका अन्नमस्यां वटकि[illegible]नी॥ कुल्माषात्त्व
कुल्माषाः प्रायेणान्नमस्यां कौल्माषी॥ श्रोत्रियं छंदोऽधीते॥ श्रोत्रियः॥ वेत्त्यनुवृत्तेश्छांदसः॥ श्राद्ध[illegible]मनेन भुक्तमिनिठनौ॥ श्राद्धी॥ श्राद्धि
श्रुकं॰ कः॥ पूर्वादिनिः॥ पूर्वं कृतमनेन पूर्वी॥ सपूर्वाच्च॥ कृतपूर्वी॥ इष्टादिभ्यश्च॥ इष्टमनेन इष्टी॥ अधीती॥ छंदसि परिपंथिपरि[illegible]परिणोपर्य १२७
वस्थातरि॥ ओकेतु परिपंथिशब्दो नन्याय्यः॥ अनुपद्यन्वेष्टा॥ अनुपदमन्वेष्टा अनुपदी गवां॥ साक्षाद्द्रष्टरि संज्ञायां॥ साक्षाद्द्रष्टा साक्षी॥
क्षेत्रियच्परक्षेत्रे चिकित्स्यः॥ क्षेत्रियो व्याधिः शरीरांतरे चिकित्स्यः॥ अप्रतीकार्य इत्यर्थः॥ इंद्रियमिंद्रलिंगमिंद्रदृष्टमिंद्रसृष्टमिंद्र

जुष्टमिंद्रदत्तमिति वा॥ इंद्र आत्मा तस्य लिंगं करणेन कर्तुरनुमानात्॥ इतिकरणः प्रकारार्थः॥ इंद्रेण दुर्जयमिंद्रियं॥ ॥ तदस्या
स्त्यस्मिन्निति मतुप्॥ गावो यस्यास्मिन्वा संति स गोमान्॥ भूमनिंदाप्रशंसासु नित्ययोगेऽतिशायने॥ संबंधेऽस्ति विवक्षायां भवंति
मतुबादयः॥ रसादिभ्यश्च॥ मतुप्॥ रसवान्॥ रूपवान्॥ अन्यमत्वर्थीयनिवृत्त्यर्थं वचनं॥ रूप॥ रस॥ वर्ण॥ गंध॥ स्पर्श॥ शब्द॥ स्नेह॥ गु
णादेकाचः॥ स्ववान्॥ गुणग्रहणं रसादीनां विशेषणं॥ तसौ मत्वर्थे॥ तांतसांतौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे॥ वसोः संप्रसारणं॥
विदुष्मान्॥ गुणवचनेभ्यो मतुपो लुगिष्टः॥ शुक्लो गुणोऽस्यास्ति शुक्लः पटः॥ कृष्णः॥ मादुपधायाश्च मतोर्वोऽयवादिभ्यः॥ मवर्णावर्णांता
न्मवर्णावर्णोपधाश्च यवादिवर्जितात्परस्य मतोर्मस्य वः स्यात्॥ किंवान्॥ ज्ञानवान्॥ विद्यावान्॥ लक्ष्मीवान्॥ यशस्वान्॥ भास्वान्॥
यवादेस्तु यवमान्॥ भूमिमान्॥ झयः॥ झ[illegible]यंतान्मतोर्मस्य वः स्यात्॥ अपदांतत्वान्न जश्त्वं॥ विद्युत्वान्॥ संज्ञायां॥ मतोर्मस्य
श्री वः॥ आहीवती॥ शरादीनां च दीर्घः॥ मुनीवती॥ आसंदीवदष्ठीव[illegible]च्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती॥ एते षट् संज्ञायां निपात्यंते॥ आ
सन्नशब्दस्यासंदीभावः॥ आसंदीवान्ग्रामः॥ अन्यत्रासन्नवान्॥ अष्ठिशब्दस्याष्ठीभावः॥ अष्ठीवान्॥ अस्थिमानन्यत्र॥ चक्रशब्द
स्य चक्रीभावः॥ चक्रीवान्नाम राजा॥ चक्रवानन्यत्र॥ कक्ष्यायाः संप्रसारणं॥ कक्षीवान्नाम ऋषिः॥ कक्ष्यावानन्यत्र॥ लवणशब्दस्य रुम

॥ सि०कौ० ॥ …प्ताव॥ रुमण्वान्नामपर्वतः॥ लवणवानन्यत्र॥ नर्मणोनलोपाभावोणत्वंच॥ नर्मण्वतीनामनदी॥ नर्मवत्यन्यत्र॥ उदन्वानुद त०म०
धौच॥ उदकस्यउदन्भावोमतौउदधौसंज्ञायांच॥ उदन्वान्समुद्रः॥ ऋषिश्च॥ राजन्वान्सौराज्ये॥ राजन्वतीभूः॥ राजवानन्यत्र॥ प्राणिस्था
दातोलजन्यतरस्यां॥ चूडालः॥ चूडावान्॥ प्राणिस्थात्किं॥ शिखावान्दीपः॥ आतःकिं॥ हस्तवान्॥ प्राण्यंगादेवनेह॥ मेधावान्॥
॥१३९॥ प्रत्ययस्वरेणैवसिद्धेअंतोदात्तत्वेचूडालोसीत्यादौस्वरितोवानुदात्तेपदादावितिस्वरितबाधनार्थश्चकारः॥ सिध्मादिभ्यश्च॥ लजन्यतर
स्यां॥ सिध्मलः॥ सिध्मवान्॥ अन्यतरस्यांग्रहणंमतुप्समुच्चयार्थंनतुप्रत्ययविकल्पार्थं॥ तेनाकारांतेभ्यइनिठनौन॥ वातदंत
बलललाटानामूङ्च॥ वातूलः॥ वत्सांसाभ्यांकामबले॥ आभ्यांलज्वास्याद्यथासंख्यंकामवतिबलवतिचार्थे॥ वत्सलः॥ अंसलः॥ फे
नादिलच्च॥ चाल्लच्॥ अन्यतरस्यांग्रहणंमतुप्समुच्चयार्थमनुवर्त्तते॥ फेनिलः॥ फेनलः॥ फेनवान्॥ लोमादिपामादिपिछादिभ्यःशनेल
चः॥ लोमादिभ्यःशः॥ लोमशः॥ लोमवान्॥ पामादिभ्योनः॥ पामनः॥ अंगात्कल्याणे॥ अंगना॥ लक्ष्म्याअच्च॥ लक्ष्मणः॥ विष्वगित्यु ॥१३९॥
त्तरलोपश्चाकृतसंधेः॥ विषुणः॥ पिछादिभ्यइलच्॥ पिछिलः॥ पिछवान्॥ उरसिलः॥ उरस्वान्॥ प्रज्ञाश्रद्धार्चाभ्योणः॥ प्राज्ञःश्राद्धः
आर्चः॥ वृत्तेश्च॥ वार्त्तः॥ तपःसहस्राभ्यांविनीनी॥ विनीन्योरिकारोनकारपरित्राणार्थः॥ तपस्वी॥ सहस्री॥ असं

तलादंतत्वाच्चसिद्धेपुनर्वचनमणाबाधामाभूदिति॥ सहस्राच्चठनोपिबाधनार्थं॥ अण्च॥ योगविभागउत्तरार्थः॥ तापसः॥ साहस्रः॥
ज्योत्स्नादिभ्यउपसंख्यानं॥ ज्यौत्स्नः॥ तामिस्रः॥ सिकताशर्कराभ्यांच॥ सैकतोघटः॥ शार्करः॥ देशेलुबिलचौच॥ चादण्मतुप्च॥ सि
कताःसंत्यस्मिन्देशेसिकताः॥ सिकतिलः॥ सैकतः॥ सिकतावान्॥ एवंशर्कराइत्यादि॥ दंतउन्नतउरच्॥ उन्नताःदंताःसंत्यस्यदंतु
उषादीनांसंख्या सुषिरश्छिद्रे ४ रः॥ ऊषसुषिमुष्कमधोरः॥ ऊषरः॥ सुषिरः॥ मुष्कोंडः॥ मुष्करः॥ मधुमाधुर्यंमधुरः॥ रप्रकरणेखमुखकुंजेभ्यउपसंख्यानं॥ खरः॥ मुखरः॥ खंनभःकर्णविवरं तद्वान्खरः ४
कुंजोहस्तिहनुः॥ कुंजरः॥ नगपांसुपांडुभ्यश्च॥ नगरं॥ पांसुरः॥ पांडुरः॥ पांडुराष्ट्रक्रमव्युत्पन्नएव॥ कच्छ्वाह्रस्वत्वंच॥ कच्छुरः॥ कच्छूर्नाम ५कच्छूरपरोगविशेषः
मः॥ द्युमः॥ द्रुमः॥ केशाद्वोन्यतरस्यां॥ प्रकृतेनान्यतरस्यांग्रहणेनमतुपिसिद्धेपुनर्ग्रहणमिनिठनोःसमावेशार्थं॥ केशवः॥ केशी॥
केशिकः॥ केशवान्॥ अन्येभ्योपिदृश्यते॥ मणिवोनागविशेषः॥ हिरण्यवोनिधिविशेषः॥ अर्णसोलोपश्च॥ अर्णवः॥ गांड्यजगात्सं
ज्ञायां॥ ह्रस्वदीर्घयोर्यणातंत्रेणनिर्देशः॥ गांडिवं॥ गांडीवं॥ अर्जुनस्यधनुः॥ अजगवंपिनाकः॥ कांडांडादीरन्नीरचौ॥ कांडीरः॥ आंडी
रः॥ रजःकृष्यासुतिपरिषदोवलच्॥ रजस्वलास्त्री॥ कृषीवलः॥ वलइतिदीर्घः॥ आसुतीवलः॥ शौंडिकः॥ परिषद्वलः॥ पर्षदितिपाठांत
रं॥ पर्षद्वलः॥ अन्येभ्योपिदृश्यते॥ भ्रातृवलः॥ शत्रुवलः॥ वलइत्यत्रसंज्ञायामित्यनुवृत्तेर्नेहदीर्घः॥ दंतशिखात्संज्ञायां॥ दंतावलो

हस्ती॥ शिखावलः केकी॥ ज्योत्स्नातमिस्राशृंगिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः॥ मत्वर्थे निपात्यंते॥ ज्योतिष उ त॰ मत॰
॥सि॰ पू॰॥ पधालोपो नश्च प्रत्ययः॥ ज्योत्स्ना॥ तमस उपधाया इत्वं रश्च॥ तमिस्रा॥ स्त्रीत्वमविवक्षितं॥ तमिस्रं॥ शृंगादिनच्॥ शृंगिणः॥ ऊर्ज
सो वलच्॥ तेन बाधा मा भूदिति विनिरपि॥ ऊर्जस्वी॥ ऊर्जस्वलः॥ ऊर्जो ऽसुगागम इति वृत्तिकारोक्तं॥ ऊर्जस्वती रीतिवत्॥ असुन्नंत
॥१३९॥ नैवोपपत्तेः॥ गोशब्दाद्ग्मिनिः॥ गोमी॥ मलशब्दादिनच्॥ मलिनः॥ ईमसच्॥ मलीमसः॥ अत इनिठनौ॥ दंडी॥ दंडिकः॥ व्रीह्यादिभ्य
श्च॥ व्रीही॥ व्रीहिकः॥ न सर्वेभ्यो व्रीह्यादिभ्य इनिठनाविष्येते॥ ॥ केतर्हि शिखामालासंज्ञादिभ्य इनिः॥ यवखदादिभ्य इकः॥ अन्ये
भ्य उभयं॥ तुंदादिभ्य इलच्च॥ चादिनिठनौ मतुप् च॥ तुंदिलः॥ तुंदी॥ तुंदवान्॥ उदर॥ पिचंड॥ यव॥ व्रीहि॥ स्वांगाद्विवृद्धौ॥ एकगो
पूर्वाट्ठञ्नित्यं॥ एकशतमस्यास्तीति ऐकशतिकः॥ ऐकसहस्रिकः॥ गौशतिकः॥ गौसहस्रिकः॥ शतसहस्रांताच्च निष्कात्॥ निष्का
त्परौ यौ शतसहस्रशब्दौ तदंतात्प्रातिपदिकाट्ठञ् स्यान्मत्वर्थे॥ नैष्कशतिकः॥ नैष्कसहस्रिकः॥ रूपादाहतप्रशंसयोर्यप्॥ आहतं रू ॥१३९॥
पमस्यास्तीति रूप्यः कार्षापणः॥ प्रशस्तं रूपमस्यास्तीति रूप्यो गौः॥ आहते किं॥ रूपवान्॥ अन्येभ्योपि दृश्यते॥ हिम्याः पर्वताः॥
गुण्याः ब्राह्मणाः॥ अस्मायामेधास्रजो विनिः॥ यशस्वी॥ यशस्वान्॥ मायावी॥ व्रीह्यादिपाठादिनिठनौ॥ मायी॥ मायिकः॥ क्लिन्नांत

त्वाल्लुः॥ स्रग्वी॥ आमयस्योपसंख्यानं दीर्घश्च॥ आमयावी॥ शृंगवृंदाभ्यामारकन्॥ शृंगारकः॥ वृंदारकः॥ फलबर्हाभ्यामि
नच्॥ फलिनः॥ बर्हिणः॥ हृदयाच्चालुरन्यतरस्यां॥ हृदयालुः॥ हृदयी॥ हृदयिकः॥ हृदयवान्॥ शीतोष्णतृप्रेभ्यस्तन्न सहते॥ शीतं न स
हते शीतालुः॥ उष्णालुः॥ स्फायितंचीति रक्॥ तृप्रः पुरोडाशः॥ तन्न सहते तृप्रालुः॥ तृप्रं दुःखमिति माधवः॥ हिमाच्चेलुः॥ हिमं
न सहते हिमेलुः॥ बलादूलः॥ बलूलः॥ वातात्समूहे च॥ वातं न सहते वातस्य समूहो वा वातूलः॥ तप्पर्वमरुद्भ्यां॥ पर्वतः॥ मरुत्तः॥
ऊर्णाया युस्॥ सित्वात्पदत्वं॥ ऊर्णायुः॥ अत्र छंदसीति केचिदनुवर्तयंति॥ युक्तं चैतत्॥ अन्यथा हि॥ अहंशुभमोरित्यत्रैवोर्णा
ग्रहणं कुर्यात्॥ वाचो ग्मिनिः॥ वाग्मी॥ आलजाटचौ बहुभाषिणि॥ कुत्सित इति वक्तव्यं॥ कुत्सितं बहु भाषते वाचालः॥ वाचाटः॥
यस्तु सम्यग्बहु वदति तत्र वाग्मीत्येव॥ स्वामिन्नैश्वर्ये॥ ऐश्वर्यवाचकात्स्वशब्दान्मत्वर्थे आमिनच्॥ स्वामी॥ ॥ अर्शआ
दिभ्योच्॥ अर्शांस्यस्य विद्यंते अर्शसः॥ आकृतिगणोयं॥ ॥ द्वंद्वोपतापगर्ह्यात्प्राणिस्थादिनिः॥ द्वंद्व॥ कटकवलयिनी॥ शंख
नूपुरिणी॥ उपतापो रोगः॥ कुष्ठी॥ किलासी॥ गर्ह्यं निंद्यं॥ ककुदावर्ती॥ काकतालुकी॥ प्राणिस्थात्किं॥ पुष्पफलवान् घटः॥
प्राण्यंगान्न॥ पाणिपादवती॥ अत इत्येव॥ चित्रकललाटिकावती॥ सिद्धे प्रत्यये पुनर्वचनं ठनादिबाधनार्थं॥ वातातीसारा

वातिकी॰ ॥ श्यांककुदः । वातादिनिः । अतीसारकी । रोगे चायमिष्यते । नेह । वातवती गुहा । पिशाचाच्च । पिशाचकी । वयसि पूरणात् । पूरणप्रत्ययां त॰ मत॰
॥ सि॰ पू॰ ॥ तान्मत्वर्थे इनिः स्यात् वयसि द्योत्ये । मासः संवत्सरो वा पंचमोऽस्यास्तीति पंचमी उष्ट्रः । इन्वाध्यर्थं । वयसि किं । पंचवान् ग्रामः । सुखादि
भ्यश्च । इनिर्मत्वर्थे । सुखी । दुःखी । मालाक्षेपे । माली । धर्मशीलवर्णान्ताच्च । धर्माद्यन्तादिनिर्मत्वर्थे । ब्राह्मणधर्मः । ब्राह्मणशीली ॥
॥१४०॥ ब्राह्मणवर्णी । हस्ताज्जातौ । हस्ती । जातौ किं । हस्तवान् पुरुषः । वर्णाद्ब्रह्मचारिणी । वर्णी । पुष्करादिभ्यो देशे । पुष्करिणी । पद्मि
नी । देशे किं । पुष्करवान् हस्ती । बाहूरुपूर्वपदाद्बलात् । बाहुबली । उरुबली । सर्वादेश्च । सर्वधनी । सर्वबीजी । अर्थाच्चासन्निहि
ते । अर्थी । सन्निहिते तु अर्थवान् । तदन्ताच्च । धान्यार्थी । हिरण्यार्थी । बलादिभ्यो मतुबन्यतरस्यां । बलवान् । बली । उत्साहवान् ।
उत्साही । संज्ञायां मन्माभ्यां । मन्नन्तान्मान्ताच्चेनिर्मत्वर्थे । प्रथिमिनी । दामिनी । होमिनी । सोमिनी । संज्ञायां किं । सोमवान् । कं पृथिवी पद्मादिभ्यः
शंभ्यां बभयुस्तितुतयसः । कशाभ्यां मतौ । कमिति कदकसुखयोः । शमिति सुखे । आभ्यां सप्त प्रत्ययाः स्युः । युस्तियसोः सका ॥१४०॥
सः पदत्वार्थः । कंबः । कंभः । कंयुः । कंतिः । कंतुः । कंतः । कंयः । शंबः । शंभः । शंयुः । शंतिः । शंतुः । शंतः । शंयः । अनुस्वारस्य वैकल्पि
कः परसवर्णो वकार यकार परस्यानुनासिकौ यवौ । तुंदिवलिवटेर्भः । वृद्धा नाभिस्तुंदिः । स्तुंडिः । मूर्धन्योयमिति माधवः । तुंदिभः ।
वलिभः । वटिभः । नाभादित्वात् वलिनोपि । अहंशुभमोर्युस् । अहमिति मव्ययमहंकारे । शुभमिति शुभे । अहंयुः । अहंकारवान् । शुभंयुः शुभान्वितः ॥

॥ ॥ इति मत्वर्थीयाः ॥ ॥ प्राग्दिशो विभक्तिः ॥ ॥ दिक्शब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः ॥ ॥ अथ स्वार्थिकाः ॥ समर्थाना
मिति च निवृत्तं ॥ वेति त्वनुवर्त्तत एव । किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ॥ किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधिक्रियते ॥ इदम इश् ॥ प्राग्दिशी
ये परे ॥ एतेतौ रथोः ॥ इदम्शब्दस्य एत इत् इत्यादेशौ स्तो रेफादौ थकारादौ च प्राग्दिशीये परे । इशोऽपवादः ॥ एतदोऽन् । योगविभागः कर्त्तव्यः ॥ एतदः ।
एतेतौ स्तो रथोः ॥ अन् एतद इत्येव । अनेकाल्त्वात्सर्वादेशः ॥ नलोपः प्रातिपदिकान्तस्य । सर्वस्य सोऽन्यतरस्यां दि ॥ प्राग्दिशीये दकारादौ प्रत्यये प
रे सर्वस्य सो वा स्यात् । पंचम्यास्तसिल् ॥ पंचम्यन्तेभ्यः किमादिभ्यस्तसिल् वा स्यात् ॥ कु तिहोः ॥ किमः कुः स्यात्तादौ हादौ च विभक्तौ परतः ॥ कुतः ।
कस्मात् ॥ यतः ॥ ततः ॥ इतः ॥ एतदोऽस्य अतः ॥ अमुतः ॥ बहुतः ॥ द्व्यादेस्तु द्वाभ्यां ॥ तसेश्च ॥ किंसर्वनामबहुभ्यः परस्य तसिलादेशः स्यात् । स्वरार्थं
विभक्त्यर्थवचनं ॥ पर्यभिभ्यां च ॥ आभ्यां तसिल् स्यात् ॥ सर्वोभयार्थाभ्यामेव ॥ परितः सर्वत इत्यर्थः ॥ अभितः उभयत इत्यर्थः ॥ सप्तम्या
स्त्रल् ॥ कुत्र ॥ यत्र ॥ तत्र ॥ बहुत्र ॥ इदमो हः ॥ त्रलोऽपवादः ॥ इशादेशः ॥ इह ॥ किमोऽत् ॥ वाग्रहणमपकृष्यते ॥ सप्तम्यन्तात्किमोऽद्वा स्यात् ॥ पक्षे त्रल् ॥
क्वाति ॥ किमः क्वादेशः स्यादति ॥ क्व ॥ कुत्र ॥ वा ह च छन्दसि ॥ कुह स्थः कुह जग्मथुः ॥ एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ॥ अन्वादेशविषये एतद इश्
स्यात् स चानुदात्तः त्रतसोः परतः तौ चानुदात्तौ स्तः ॥ एतस्मिन् ग्रामे सुखं वसामः ॥ अथो अत्राधीमहे ॥ अथो नगं तासमः ॥ इतराभ्योऽपि दृश्यन्ते ॥
पंचमीसप्तमीतरविभक्त्यन्तादपि तसिलादयो दृश्यन्ते । दृशिग्रहणाद्भवदादियोग एव ॥ स भवान् ॥ ततो भवान् ॥ तत्र भवान् ॥ तं भवंतं ॥ ततो भवं

॥सि॰कौ॰॥ तं ॥ तत्रभवंतं ॥ एवंदीर्घायुः ॥ देवानांप्रियः ॥ आयुष्मान् ॥ सर्वैकान्यकिंयत्तदः काले दा ॥ सप्तम्यंतेभ्य एभ्यः कालेर्थे स्वार्थे दा स्यात् ॥ सर्वस्मिन्काले स त॰स्वा॰
र्वदा ॥ सर्वस्य सोन्यतरस्यां दि ॥ सदा ॥ एकदा ॥ अन्यदा ॥ कदा ॥ यदा ॥ तदा ॥ काले किं ॥ सर्वस्मिन्देशे ॥ इदमोर्हिल् ॥ सप्तम्यंतात्काले इदम हल्यापवादः
अस्मिन्काले एतर्हि ॥ काले किं ॥ इह देशे ॥ अधुना ॥ इदमः सप्तम्यंतात्कालवाचिनः स्वार्थेधुना प्रत्ययः स्यात् ॥ इदम इश्य इति लोपः ॥ अधुना ॥
॥१५९॥ दानीं च ॥ इदानीं ॥ तदो दा च ॥ सदादीनां नः ॥ तदा ॥ तदानीं ॥ तदो दा वचनं अर्थेन कां विहितत्वात् ॥ अनद्यतने र्हिलन्यतरस्यां ॥ कर्हि ॥ कदा ॥ यर्हि सर्वैकान्य ४
यदा ॥ तर्हि ॥ तदा ॥ एतस्मिन्काले एतर्हि ॥ सद्यः परुत्परार्यैषमः परेद्यव्यद्य पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः
स
तरं कृते निपात्यंते ॥ समानस्य सभावो द्यस्त्वं चाहनि ॥ समानेऽहनि सद्यः ॥ पूर्वपूर्वतरयोः परः ॥ उदारी न संवत्सरे ॥ पूर्वस्मिन्वत्सरे परुत्
हः ॥ पूर्वतरे वत्सरे परारि ॥ इदम इश् ॥ समण्प्रत्ययश्च संवत्सरे ॥ अस्मिन्वत्सरे ऐषमः ॥ परस्मादेद्यव्य हनि परस्मिन्नहनि परेद्यवि ॥ इद
मोश्य द्यश्च ॥ अस्मिन्नहनि अद्य ॥ पूर्वादिभ्योष्टभ्यः अहन्येद्युस् ॥ पूर्वस्मिन्नहनि पूर्वेद्युः ॥ उभयोरह्नोः उभयेद्युः ॥ द्युश्चोभयाद्वक्तव्यः ॥ उभय
द्युः ॥ प्रकारवचने थाल् ॥ प्रकारवृत्तिभ्यः किमादिभ्य स्थाल् स्यात्सर्वे त्वार्थे ॥ तेन प्रकारेण तथा ॥ येन प्रकारेण यथा ॥ इदमस्थमुः ॥ थालो ॥१५१॥
एतौतौरयोः २ अपवादः ॥ एतदोपि वाच्यः ॥ अनेन एतेन प्रकारेण इत्थं ॥ किमश्च ॥ केन प्रकारेण कथं ॥ ॥प्राग्दिशो विभक्तिः ॥ ॥ दिक्छब्देभ्यः सप्तमीपंचमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ॥ ॥ किंकिमः का २
॥ ॥दिक्छब्देभ्यः सप्तमीपंचमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ॥ सप्तम्याद्यंतेभ्यो दिशि रूढेभ्यो दिग्देशकालवृत्तिभ्यः स्वार्थे अस्ताति

प्रत्ययः स्यात् ॥ पूर्वाधरावराणामसि पुरधवश्चैषां ॥ एभ्योस्तात्यर्थे असि प्रत्ययः स्यात् तद्योगे चैषां क्रमात् पुर् अध् अव् इत्यादेशाः स्युः ॥
अस्ताति च ॥ अस्तातौ परे पूर्वादीनां पुरादयः स्युः ॥ पूर्वस्यां पूर्वस्याः पूर्वा वा दिक् पुरः ॥ पुरस्तात् ॥ अधः ॥ अधस्तात् ॥ अवः ॥ विभाषावरस्य
अवरस्यास्तातौ परे अव् स्याद्वा ॥ अवस्तात् ॥ अवरस्तात् ॥ एवं देशे काले च ॥ दिशि रूढेभ्यः किं ॥ ऐंद्र्यां वसति ॥ सप्तम्याद्यंतेभ्यः किं ॥ पूर्वं
ग्रामं गतः ॥ दिगादिवृत्तिभ्यः किं ॥ पूर्वस्मिन्गुरौ वसति ॥ अस्ताति चेति ज्ञापकादसिरस्तातिं न बाधते ॥ दक्षिणोत्तराभ्यामतसुच् ॥ अ
स्तातेरपवादः ॥ दक्षिणतः ॥ उत्तरतः ॥ विभाषा परावराभ्यां ॥ परतः ॥ अवरतः ॥ परस्तात् ॥ अवरस्तात् ॥ अंचेर्लुक् ॥ अंचत्यंताद्दिक्श
ब्दादस्तातेर्लुक् स्यात् ॥ लुक् तद्धितलुकि ॥ प्राच्यां प्राच्याः प्राची वा दिक् प्राक् ॥ उदक् ॥ एवं देशे काले च ॥ उपर्युपरिष्टात् ॥ अस्तात
विषये ऊर्ध्वशब्दस्योपादेशः स्याद् रिल् रिष्टातिलौ च प्रत्ययौ ॥ उपरि ॥ उपरिष्टात् ॥ आगतो रमणीयं वा ॥ पश्चात् ॥ अपरस्य
पश्चभावः ॥ आतिश्च प्रत्ययः ॥ अस्तातिविषये ॥ उत्तराधरदक्षिणादातिः ॥ उत्तरात् ॥ अधरात् ॥ दक्षिणात् ॥ एनबन्यतरस्यामदूरेऽ
पंचम्याः ॥ उत्तरादिभ्य एनप्वा स्यादवध्यवधिमतोः सामीप्ये पंचमीं विना ॥ उत्तरेण ॥ अधरेण ॥ दक्षिणेन ॥ पक्षे यथास्वं प्रत्ययाः ॥ एनपा द्वितीया
इह केचिदुत्तरादीननुवर्त्य दिक्शब्दमात्रादेनप् ॥ पूर्वेण ग्रामं ॥ अपरेण ग्रामं ॥ दक्षिणादाच् ॥ अस्तातिविषये ॥ दक्षिणावत् दक्षिणस्याः सा दृष्टिः २

ति॥ अपंचम्या इत्येव॥ दक्षिणादागतः॥ आहि च दूरे॥ दक्षिणाहि आहिः स्यात्॥ चादाच्॥ दक्षिणाहि॥ दक्षिणा॥ उत्तराच्च॥ उत्त त॰स्वा॰
॥सि॰कौ॰॥ राहि॥ उत्तरा॥ संख्याया विधार्थे धा॥ क्रियाप्रकारे वर्तमानात्संख्याशब्दात्स्वार्थे धा स्यात्॥ चतुर्धा॥ पंचधा॥ अधिकरणविचाले च॥
द्रव्यस्य संख्यांतरापादने संख्याया धा स्यात्॥ एकं राशिं पंचधा कुरु॥ एकाद्धो ध्यमुञन्यतरस्यां॥ एकस्य॥ एकधा॥ द्वित्र्योश्च धमुञ्
॥१४८॥ आभ्यां धा इत्यस्य धमुञ्वा स्यात्॥ द्वैधं॥ द्विधा॥ त्रैधं॥ त्रिधा॥ धमुञंतात्स्वार्थे अ[ण्] दर्शनं॥ पर्यद्वैधानि॥ एधाच्च॥ द्वेधा॥ त्रेधा॥
कृत्ति याप्ये पाशप्॥ कुत्सितो भिषक् भिषक्पाशः॥ पूरणाद्भागे तीयादन्॥ द्वितीयो भागो द्वितीयः॥ स्वरे विशेषः॥ तीयादीकक्स्वार्थे
वाच्यः॥ द्वैतीयीकः॥ द्वितीयः॥ तार्त्तीयीकः॥ तृतीयः॥ न विद्यायाः॥ द्वितीयात्तृतीया विद्येत्येव॥ प्रागेकादशभ्योछंदसि॥ पूरण
प्रत्ययांताद्भागे अन्॥ चतुर्थः॥ पंचमः॥ षष्ठाष्टमाभ्यां ञ च॥ चादन्॥ षष्ठो भागो षाष्ठः॥ षाष्ठः॥ अष्टमः॥ आष्टमः॥ मानपश्वंगयोः
कन्लुकौ च॥ षष्ठाष्टमशब्दाभ्यां क्रमेण कन्लुकौ स्तो माने पश्वंगे च वाच्ये॥ षष्ठको भागः॥ मानं चेत्॥ अष्टमो भागः पश्वंगं चे ॥१४८॥
त्॥ अस्य अनो वा लुक्॥ चकाराद्यथाप्राप्तं॥ षष्ठः॥ षाष्ठः॥ अष्टमः॥ आष्टमः॥ महाविभाषया सिद्धे पुनर्लुग्वचनं पूर्वत्रानो
नित्यत्वं ज्ञापयति॥ एकादाकिनिच्चासहाये॥ चात्कन्लुकौ॥ एकः॥ एकाकी॥ एककः॥ भूतपूर्वे चरट्॥ आढ्यो भूतपूर्वः आढ्यचरः॥

षष्ठ्या रूप्य च॥ षष्ठ्यंताद्भूतपूर्वेर्थे रूप्यः स्याच्चरट् च॥ कृष्णस्य भूतपूर्वः॥ गौः कृष्णरूप्यः॥ कृष्णचरः॥ तसिलादिषु रूप्यस्याप
रिगणितत्वान्न पुंवत्॥ शुभ्राया भूतपूर्वः शुभ्रारूप्यः॥ अतिशायने तमबिष्ठनौ॥ अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः॥ अय
मेषामतिशयेनाढ्यः आढ्यतमः॥ लघुतमो लघिष्ठः॥ तिङश्च॥ तिङंतादतिशये द्योत्ये तमप् स्यात्॥ तरप्तमपौ घः॥ एतौ घसंज्ञौ स्तः॥
किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे॥ किम एदंतात्तिङोऽव्ययाच्च यो घस्तदंतादामुः स्यान्न तु द्रव्यप्रकर्षे॥ किंतमां॥ प्राह्णेतमां॥ प
चतितमां॥ उच्चैस्तमां॥ द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः॥ द्विवचनविभज्योपपदे तरबीयसुनौ॥ द्वयोरेकस्यातिशये विभक्तव्ये चोपप
दे सुप्तिङंतादेतौ स्तः॥ पूर्वयोरपवादः॥ अयमनयोरतिशयेन लघुः॥ लघुतरो लघीयान्॥ उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसः॥
अजादी गुणवचनादेव॥ इष्ठन्नीयसुनौ गुणवचनादेव स्तः॥ नेह॥ पाचकतरः॥ पाचकतमः॥ तुश्छंदसि॥ तृन्नतृजंताविष्ठन्नीय
सुनौ स्तः॥ टेरिष्ठेमेयस्सु॥ तुरादस्य लोपः स्यादिष्ठेमेयस्सु॥ अतिशयेन कर्ता करिष्ठः॥ दोहीयसी धेनुः॥ प्रशस्यस्य श्रः॥ अस्य श्रा
देशः स्यादजाद्योः॥ प्रकृत्यैकाच्॥ इष्ठादिष्वेकाच् प्रकृत्या॥ श्रेष्ठः॥ श्रेयान्॥ ज्य च॥ प्रशस्यस्य ज्यादेशः स्यादिष्ठेयसोः॥ ज्येष्ठः॥ ज्या
दादीयसः॥ आदेः परस्य॥ ज्यायान्॥ वृद्धस्य च॥ ज्यादेशः स्यादजाद्योः॥ ज्येष्ठः॥ ज्यायान्॥ अंतिकबाढयोर्नेदसाधौ॥ अजाद्योः॥

नेदिष्ठः॥ नेदीयान्॥ साधिष्ठः॥ साधीयान्॥ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः॥ एषां यणादि परं लुप्यते पूर्व तद्धि॰स्वा॰
स्य च गुण इष्ठादिषु॥ स्थविष्ठः॥ दविष्ठः॥ यविष्ठः॥ ह्रसिष्ठः॥ क्षेपिष्ठः॥ क्षोदिष्ठः॥ एवमीयसुन्॥ ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वादिम
॥सि॰कौ॰॥ मा॥ ह्रसिमा॥ क्षेपिमा॥ क्षोदिमा॥ प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः॥ प्रिया
दीनां क्रमात् प्रादयः स्युरिष्ठादिषु॥ प्रेष्ठः॥ स्थेष्ठः॥ स्फेष्ठः॥ वरिष्ठः॥ बंहिष्ठः॥ गरिष्ठः॥ वर्षिष्ठः॥ त्रपिष्ठः॥ द्राघिष्ठः॥ वृन्दिष्ठः॥ एवमीयसुन्
॥१४३॥ प्रियोरुगुरुबहुलदीर्घाणां पृथ्वादित्वात्प्रेमेत्यादि॥ बहोर्लोपो भू च बहोः॥ बहोः परयोरिमेयसोर्लोपः स्याद्बहोश्च भूरादेशः स्यात्॥
भूमा॥ भूयान्॥ इष्ठस्य यिट् च॥ बहोः परस्य इष्ठस्य लोपः स्याद्यिडागमश्च॥ भूयिष्ठः॥ युवाल्पयोः कनन्यतरस्यां॥ एतयोः कनादेशो
वा स्यादिष्ठेयसोः॥ कनिष्ठः॥ कनीयान्॥ पक्षे यविष्ठः॥ अल्पिष्ठ इत्यादि॥ विन्मतोर्लुक्॥ विनो मतुपश्च लुक् स्यादिष्ठेयसोः॥ अतिश
येन स्रग्वी स्रजिष्ठः॥ स्रजीयान्॥ अतिशयेन त्वग्वान् [illegible] त्वचिष्ठः॥ त्वचीयान्॥ प्रशंसायां रूपप्॥ सुबन्तात् तिङन्ताच्च॥ प्रशस्तः प
टुः पटुरूपः॥ प्रशस्तं पचति पचतिरूपं॥ ईषदसमाप्तौ कल्पब्देश्यदेशीयरः॥ ईषदूनो विद्वान् विद्वत्कल्पः॥ विद्वद्देश्यः॥ विद्वद्देशीयः॥ ॥१४३॥
यशस्कल्पं॥ पचतिकल्पं॥ विभाषा सुपो बहुच् पुरस्तात्तु॥ ईषदसमाप्तिविशिष्टेऽर्थे सुबन्ताद्बहुज्वा स्यात्स च प्रागेव न तु परतः॥
ईषदूनः पटुः बहुपटुः॥ पटुकल्पः॥ सुपः किं॥ यजतिकल्पं॥ प्रकारवचने जातीयर्॥ प्रकारवति चायं॥ थाल् तु प्रकारमात्रे॥ पटुप्र

कारः पटुजातीयः॥ प्रागिवात्कः॥ इवे प्रतिकृतावित्यतः प्राक् काधिकारः॥ अव्ययसर्वनाम्नामकच् प्राक् टेः॥ तिङश्चेत्यनुवर्तते॥ कस्य
च दः॥ कान्ताव्ययस्य दकारोऽन्तादेशः स्यादकच्॥ अज्ञाते॥ कः स्यात्॥ कस्यायमश्वोऽश्वकः॥ उच्चकैः॥ नीचकैः॥ सर्वके॥ विश्वके॥ ओ
कारसकारभकारादौ सुपि सर्वनाम्नष्टेः प्रागकच्॥ युवकयोः॥ आवकयोः॥ युष्मकासु॥ अस्मकासु॥ युष्मकाभिः॥ अस्मकाभिः॥
ओकारेत्यादि किं॥ त्वयका॥ मयका॥ अकच्प्रकरणे तूष्णीमः काम्वक्तव्यः॥ मित्वादन्त्यादचः परः॥ तूष्णीकामास्ते॥ शीलिको कः प्रत्यय इत्यर्थः॥४
मलोपश्च॥ तूष्णींशीलः॥ तूष्णीकः॥ पचतकि॥ जल्पतकि॥ धिक्कृत्॥ हिरुकृत्॥ कुत्सिते॥ कुत्सितोऽश्वोऽश्वकः॥ संज्ञायां कन्॥
कुत्सिते कन्स्यात्तदन्तेन चेत्संज्ञा गम्यते॥ शूद्रकः॥ राधकः॥ स्वार्थे वचनं॥ अनुकम्पायां॥ पुत्रकः॥ अनुकम्पितः पुत्र इत्यर्थः॥ नीतौ च
तद्युक्तात्॥ सामदानादिरुपायो नीतिः॥ तस्यां गम्यमानायामनुकम्पायुक्तात्प्रत्ययः स्यात्॥ हन्त ते धानकाः॥ गुडकः॥ एहकि॥ अ एहीत्यस्य
द्धकि॥ पूर्वेणानुकम्प्यमानात्प्रत्ययः॥ अनेन तु परम्परासम्बन्धेऽपीति विशेषः॥ बह्वचो मनुष्यनाम्नष्ठज्वा॥ पूर्वसूत्रद्वयविषये॥ घनि
दस्मिन्नर्थे २ लचौ च॥ ठाजादावूर्ध्वं द्वितीयादचः॥ अस्मिन्प्रकरणे यो ठ अजादिप्रत्ययश्च तस्मिन्परे प्रकृतेर्द्वितीयादच ऊर्ध्वं सर्वं लुप्य
अनुकंपितः ते॥ अनुकम्पितो देवदत्तः देविकः॥ देवियः॥ देविलः॥ देवदत्तकः॥ अनुकम्पितो वायुदत्तो वायुकः॥ ठग्रहणमुको द्वितीयत्वे कविधानार्थं
पितृदत्तः पितृकः॥ चतुर्थादूर्ध्वस्य लोपो वाच्यः॥ अनुकम्पितो बृहस्पतिदत्तो बृहस्पतिकः॥ अनजादौ च विभाषा लोपो वक्तव्यः॥ देवदत्तकः॥

देवकः॥ ओपः पूर्वपदस्य च॥ दत्तिकः॥ दत्तियः॥ दत्तिलः॥ दत्तकः॥ विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः॥ देवदत्तः॥ दत्तः॥ देवः॥ ग०स्वा०
॥सि०कौ०॥ सत्यभामा॥ भामा॥ सत्या॥ उवर्णाल्ल इलस्य च॥ आदेः परस्य॥ भानुदत्तः॥ भानुलः॥ [illegible]॥
[illegible] ऋवर्णादपि॥ सवित्रियः॥ सावित्रिलः॥ चतुर्थादनजादौ च लोपः पूर्वपदस्य च॥ अप्रत्यये तथैवेष्टउवर्णाल्ल इलस्य च॥ १॥ प्राचा
॥१४४॥ मुपादेरडज्वुचौ च॥ उपडः॥ पूर्वाभ्यां प्रातिपदिकात् पूर्वविषये अडज्वुचौ एतौ स्तः॥ बाधपाप्राप्तं॥ प्राचांग्रहणं पूजार्थं॥ अनुकंपितः बाधग्रहणादुक्तेः
उपेंद्रदत्तः॥ उपडः॥ उपकः॥ उपिकः॥ उपियः॥ उपिलः॥ उपेंद्रदत्तकः॥ षड्गुपाणि॥ जातिनाम्नः कन्॥ मनुष्यजातिनाम्न इत्येव॥ जाति
शब्देभ्यो मनुष्यनामधेयं तस्मात्कन्॥ अनुकंपायांनीतौ च॥ सिंहकः॥ शरभकः॥ रासभकः॥ द्वितीयं संध्यक्षरं चेत्तदादेर्लोपो व
ओकारः संध्यक्षरं तत्सहितस्य लोपः २ कर्ष्यः॥ कहोडः॥ कहिकः॥ एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः॥ वागाशीर्दत्तः वाचिकः॥ षडंगुलिदत्तः षडिकः इति॥
षष्ठ्यादिवर्जनात् सिद्धं॥ शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात्॥ एषां मनुष्यनाम्नः ठजादौ परे तृतीयादेरूर्ध्वं लो
पः स्यात्॥ पूर्वस्यापवादः॥ अनुकंपितः शेवलदत्तः शेवलिकः॥ शेवलिलः॥ सुपरिकः॥ विशालिकः॥ वरुणिकः॥ अ[illegible]मकः॥ अजि ॥१४४॥
नांतस्योत्तरपदलोपश्च॥ अजिनांतान्मनुष्यनाम्नोऽनुकंपायां कन् तस्य चोत्तरपदलोपः॥ अनुकंपितो व्याघ्राजिनो व्याघ्रकः॥
तैलकः ८ सिंहकः॥ अल्पे॥ अल्पं तैलं अल्पकं॥ ह्रस्वे॥ ह्रस्वो वृक्षो वृक्षकः॥ संज्ञायां कन्॥ ह्रस्वहेतुकायां संज्ञायां तस्यां गम्यायां [illegible] कन्

पूर्वस्यापवादः॥ वंशकः॥ वेणुकः॥ कुटीशमीशुंडाभ्यो रः॥ ह्रस्वा कुटी कुटीरः॥ शमीरः॥ शुंडारः॥ कुत्वा डुपच्॥ ह्रस्वा कुतूः कुतुपः
कुतूः स्नेहपात्रं ह्रस्वा सा कुतपः पुमान्॥ कासूगोणीभ्यां ष्टरच्॥ आयुधविशेषः कासूः ह्रस्वा सा कासूतरी॥ गोणीतरी॥ व
त्सोक्षाश्वर्षभेभ्यश्च तनुत्वे॥ वत्सतरः॥ द्वितीयं वयः प्राप्तः॥ उक्षतरः॥ अश्वतरः॥ ऋषभतरः॥ प्रवृत्तिनिमित्ततनुत्वे ए [illegible]॥ किंयत्त
दो निर्धारणे द्वयोरेकस्य डतरच्॥ अनयोः कतरो वैष्णवः॥ यतरः॥ ततरः॥ महाविभाषया॥ कः॥ यः॥ सः॥ वा बहूनां जातिपरिप्रश्ने डतमच्॥
बहूनां मध्ये निर्धारणे डतमच् वा स्यात्॥ जातिपरिप्रश्न इति प्रत्याख्यातमाकरे॥ कतमो भवतां कठः॥ यतमः॥ ततमः॥ वाग्रहणमक
जर्थं॥ यकः॥ सकः॥ महाविभाषया॥ यः॥ सः॥ किमोऽस्मिन्विषये डतरजपि॥ कतरः॥ एकाच्च प्रा[illegible]चां॥ डतरच् डतमच् च स्यात्॥ अनयो
रेकतरो मैत्रः॥ एषामेकतमः॥ अवक्षेपणे कन्॥ व्याकरणकेन गर्वितः॥ येनेतरः कुत्स्यते तदिहोदाहरणं॥ स्वतः कुत्सितं तु कुत्सिते
इत्यस्य॥ ॥इति प्रागिवीयानामवधिः॥ ॥इवे प्रतिकृतौ॥ कन् स्यात्॥ अश्व इव प्रतिकृतिरश्वकः॥ प्रतिकृतौ किं॥ गो
सदृशो गवयः॥ संज्ञायां च॥ इवार्थे कन् स्यात्॥ समुदायश्चेत्संज्ञा॥ अप्रतिकृत्यर्थ आरंभः॥ अश्वसदृशस्य संज्ञा अश्वकः॥ उष्ट्रकः॥ लुम्
नुष्ये॥ संज्ञायां विहितस्य कनो लुप् स्यात्॥ मनुष्ये वाच्ये॥ चंचा तृणमयः पुमान्॥ चंचेव मनुष्यश्चंचा॥ वध्रिका॥ जीविकार्थे चाप
ण्ये॥ जीविकार्थं यद्विक्रीयमाणं तस्मिन्वाच्ये कनो लुप्॥ वासुदेवः॥ शिवः॥ स्कंदः॥ देवलकानां जीविकार्थासु देवप्रतिकृतिष्विदं॥

अपण्येति किं॥ हस्तिकान्विक्रीणीते॥ देवपथादिभ्यश्च॥ कनो लुप्स्यात्॥ देवपथः॥ हंसपथः॥ आकृतिगणोयं॥ वस्तेर्ढञ्॥ इवेत्यनुवर्त्तते॥ त॰स्वा॰
प्रतिकृतावितिनिवृत्तं॥ वस्तिरिव वास्तेयं॥ वास्तेयी॥ शिलायाढः॥ शिलाया इतियोगविभागाड्ढञपीत्येके॥ शिलेवशिलेयं॥ शैलेयं
सि॰कौ॰ शाखादिभ्यो यः॥ शाखेव शाख्यः॥ मुख्यः॥ जघन्यः॥ अग्र्यः॥ शरण्यः॥ द्रव्यं च भव्ये॥ द्रव्यमयं ब्राह्मणः॥ कुशाग्राच्छः॥ कुशाग्रमिव कुशा
ग्रीया बुद्धिः॥ समासाच्च तद्विषयात्॥ इवार्थविषयात्समासाच्छः स्यात्॥ काकतालीयो देवदत्तस्य वधः॥ इह काकतालसमागमसदृशो
॥१४२॥ वृत्तसमागम इति समासार्थः॥ तत्प्रयुक्तः काकमरणसदृश इति प्रत्ययार्थः॥ अजाकृपाणीयः॥ अतर्कितोपनत इति फलितार्थः॥ शर्करादि प॰
भ्योऽण्॥ शर्करेव शार्करं॥ अंगुल्यादिभ्यष्ठक्॥ अंगुलीव आंगुलिकः॥ भरुजेव भारुजिकः॥ एकशालायाष्ठजन्यतरस्यां॥ एकशा
लाशब्दादिवार्थे ठञ्वा स्यात्॥ पक्षे ठक्॥ एकशालेव एकशालिकः॥ ऐकशालिकः॥ कर्कलोहितादीकक्॥ कर्कः शुक्लोऽश्वः॥ स इव का
र्कीकः॥ लौहितीकः स्फटिकः॥ पूगाञ्ञ्योऽग्रामणीपूर्वात्॥ इवार्थो निवृत्तः॥ नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः संघाः॥
पूगास्तद्वाचकात्स्वार्थे ञ्यः स्यात्॥ लौहितध्वज्यः॥ अग्रामणीपूर्वात्किं॥ देवदत्तो ग्रामणीर्देवदत्तकः॥ स एषां ग्रामणी[illegible]कन्॥ व्रा ॥१४५॥
तच्फञोरस्त्रियां॥ व्रातः॥ कापोतपाक्यः॥ च्फञ्॥ कौञ्जायन्यः॥ ब्राध्नायन्यः॥ आयुधजीविसंघाञ्ञ्यड्वाहीकेष्वब्राह्मणराज
न्यात्॥ वाहीकेषु य आयुधजीविसंघस्तद्वाचिनः स्वार्थे ञ्यट्॥ क्षौद्रक्यः॥ मालव्यः॥ टित्वान्ङीप्॥ क्षौद्रकी॥ आयुधेति किं॥ मल्लाः॥ सं

२४ [illegible]कात्स्वार्थे॰ वार्केण्यं॰ आयुधेति किं॰ जातिरा[illegible]॰ दामन्यादित्रिगर्त्तषष्ठाच्छः॰ दामन्यादिभ्यस्त्रिगर्त्तषष्ठेभ्यश्चायुध
जीविसंघवाचिभ्यः स्वार्थे छः स्यात्॰ २४
संघेति किं॥ सम्राट्॥ वाहीकेषु किं॥ शबराः॥ अब्राह्मणेति किं॥ गोपालवाः॥ शालंकायनाः॥ ब्राह्मणतद्विशेषग्रहणं॥ राजन्यस्व
रूपग्रहणं॥ हैका हैक्यपण॥ आयुधजीविसंघवा[illegible]॥ त्रिगर्त्तः षष्ठो वर्गो येषां ते त्रिगर्त्तषष्ठाः॥ आहुस्त्रिगर्त्त
षष्ठांस्तु कौण्डोपरथदाण्डकी॥ क्रौष्टुकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जानकिः॥ दामनीयः॥ दामनीयौ॥ दामन[illegible]औलपीयः॥
त्रिगर्त्तषष्ठाः॥ कौण्डोपरथीयः॥ दाण्डकीयः॥ पर्श्वादियौधेयादिभ्यामणञौ॥ आयुधजीविसंघवाचिभ्यः एभ्यः क्रमादण्
ञौ स्तः स्वार्थे॥ पार्शवः॥ पार्शवौ॥ यौधेयः॥ यौधेयौ॥ यौधेयाः॥ अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमदणो
यञ्॥ अभिजिदादिभ्योऽणन्तेभ्यः स्वार्थे यञ्॥ अभिजितोपत्यमाभिजितः॥ वैदभृतः॥ शालावत्यः॥ शैखावत्यः॥ शा
मीवत्यः॥ और्णावत्यः॥ श्रौमत्यः॥ ञ्यादयस्तद्राजाः॥ पूगाञ्ञ्य इत्यारभ्योक्ता एते तत्संज्ञाः स्युः॥ तेनास्त्रियां बहुषु लुक्॥
लोहितध्वजाः॥ कपोतपाकाः॥ कौञ्जायनाः॥ ब्राध्नायना इत्यादि॥ पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च॥ लोपव
चनमनैमित्तिकार्थं॥ अतो नस्थानिवत्॥ पादः पत्॥ तद्धितार्थ इति समासः कृते प्रत्ययः॥ वुन्नन्तास्त्रियामेव॥ द्वौद्वौ पादौ
ददाति द्विपदिकां॥ द्विशतिकां॥ पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात्॥ द्विमोदकिकां॥ दण्डव्यवसर्गयोश्च॥ वुन्

स्यात् ॥ अवीसार्थमिदं ॥ द्वौ पादौ दंडितः द्विपदिकां ॥ द्विशतिकां व्यवसृजति ॥ द्विशतीसार्थः ॥ स्थूलादिभ्यः प्रकारवचने कन् ॥ त०स्त्रा०
जातीयरोपवादः ॥ स्थूलप्रकारः स्थूलकः ॥ अणुकः ॥ चंचद्बृहतोरुपसंख्यानं ॥ चंचत्कः ॥ बृहत्कः ॥ सुराया अहौ ॥ सुरावर्णोऽहिः
॥सि०पू०॥ सुरकः ॥ अनत्यंतगतौ क्तात् ॥ छिन्नकं ॥ भिन्नकं ॥ न सामिवचने ॥ सामिपर्याय उपपदे क्तान्तान्न कप् ॥ सामिकृतं
॥१२४६॥ अर्द्धकृतं ॥ अनत्यंतगतेरिह प्रकृत्यैवाभिधानात् ॥ पूर्वेण वन्नप्राप्तदृश्येवानिषेधस्तत्र मत्यंतस्वार्थिकमपि कन्न प्रा
प्यते ॥ बृहत्तरकं ॥ बृहत्या आच्छादने ॥ कन्स्यात् ॥ द्वौ प्रावारोत्तरासंगौ समौ बृहतिका तथा ॥ आच्छादने किं ॥ बृहती
छंदः ॥ अषडक्षाशितंग्वलंकर्मालंपुरुषाध्युत्तरपदात्खः ॥ स्वार्थे ॥ अषडक्षीणो मंत्रः ॥ द्वाभ्यामेव कृत इत्यर्थः ॥ आशिता
गावोऽस्मिन्निति आशितंगवीनं अरण्यं ॥ निपातनात्पूर्वस्य मुम् ॥ अलंकर्मणे अलंकर्मीणः ॥ अलंपुरुषीणः ॥ ईश्वरा
धीनः ॥ नित्योऽयं खः ॥ उत्तरसूत्रे विभाषाग्रहणात् ॥ अन्येऽपि केचित्स्वार्थिकाः नित्यमिष्यंते ॥ तमबादयः प्राक्कनः ॥ ञ्याद
यः प्राग्वुनः ॥ आमादयः प्राङ्मयटः ॥ बृहतीजात्यंताः समासांताश्चेति ॥ विभाषांचेरदिक्स्त्रियां ॥ अदिक्स्त्रीवृत्तेर ॥१२४६॥
चत्यंतात्प्रातिपदिकात्खः स्याद्वा स्वार्थे ॥ प्राक् ॥ प्राचीनं ॥ प्रत्यक् ॥ प्रतीचीनं ॥ अवाक् ॥ अर्वाचीनं ॥ निकृष्टप्रतिकृष्ट

इति कोशान्निकृष्टपर्यायेषु अर्वन्शब्दस्य पाठादर्वाचीनं निकृष्टमित्यर्थः ॥

वरेफयाप्यावमाधमाः ॥ अर्वंतमंचतीत्यर्वाक् ॥ अर्वाचीनः ॥ अदिक्स्त्रियां ॥ प्राची दिक् ॥ उदीची दिक् ॥ स्त्रीग्रह
प्राचीनामका किं ॥ प्राची ब्राह्मणी ॥ स्त्रीग्रहणं ॥ प्राचीनं ग्रामादागतः ॥ जात्यंताच्छ बंधुनि ॥ ब्राह्मणजातीयः ॥ बंधुनि किं ॥ ब्राह्म
विस्त्रानतुसि णजातिः शोभना ॥ जातेर्व्यंजकं द्रव्यं बंधु ॥ स्थानांताद्विभाषा सस्थानेनेति चेत् ॥ सस्थानेन तुल्येन चेत्स्थानांतमर्थ
पितृतुल्यः पुत्र अर्थः ४ वदित्यर्थः ॥ पितृस्थानीयः ॥ पितृस्थानः ॥ सस्थानेनेति किं ॥ गोस्थानं ॥ अनुगादिनष्ठक् ॥ अनुवदतीत्यनुगादी ॥ स
एवानुगादिकः ॥ णचः स्त्रियामञ् ॥ णजंतात्स्वार्थे स्त्रियामञ् ॥ न कर्मव्यतिहारे ॥ अत्र ऐचून ॥ व्यावक्रोशी ॥ अणि
नुणः ॥ इनुणंतात्स्वार्थे अण् ॥ इनण्यनपत्ये ॥ सांराविणं ॥ वैसारिणो मत्स्यः ॥ अण्स्यात् ॥ वैसारिणः ॥ मत्स्ये किं ॥ विसारी
देवदत्तः ॥ संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ॥ अभ्यावृत्तिर्जन्म क्रियाजन्मगणनावृत्तेः संख्यायाः स्वार्थे
कृत्वसुच्स्यात् ॥ पंचकृत्वो भुंक्ते ॥ संख्यायाः किं ॥ भूरिवारान्भुंक्ते ॥ द्वित्रिचतुर्भ्यः सुच् ॥ कृत्वसुचोपवादः ॥ द्विर्भुंक्ते ॥ त्रिर्भुं
क्ते ॥ रात्सस्य ॥ चतुः ॥ एकस्य सकृच्च ॥ सकृदित्यादेशः स्याच्चात्सुच् ॥ सकृद्भुंक्ते ॥ संयोगांतस्येति सुचो लोपः ॥ नतु हल्ङ्या
भ्यो दीर्घादिति ॥ अनुवृत्ती दित्यत्रासिन इत्यसुचापित इत्यपात् ॥ विभाषा बहोर्धा विप्रकृष्टकाले ॥ अविप्रकृष्टे आसन्ने बधा

बऊकलोवादिवसस्यपुंक्ते॥ आसन्नकालेकिं॥ बऊकलोमासस्यपुंक्ते॥ तस्मकृतवचनेमयट्॥ प्राचूर्येणप्रस्कृतं त॰ स्वा॰
प्रकृतंतस्यवचनंप्रतिपादनं॥ तावेअधिकरणेल्युट्॥ आद्ये॥ प्रकृतमन्नमन्नमयं॥ अपूपमयं॥ यवागूमयी॥ द्विती
॥सि॰ पू॰॥ ये॥ अन्नमयोयज्ञः॥ अपूपमयंपर्व॥ समूहवद्वबऊषु॥ साम्हिका॥ प्रस्यपाअतिदिश्यतेवान्मयट्॥ मोदकाःप्रकृ
॥१४७॥ ताः मोदकिकं॥ मोदकमयं॥ शाष्कुलिकं॥ शष्कुलीमयं॥ द्वितीयेऽर्थे॥ मोदकिकोयज्ञः॥ मोदकमयः॥ अनंतावस
थेतिहपेभेषजाञ्ञ्यः॥ अनंतएवानंत्यं॥ आवसथएवावसथ्यं॥ इतिहेतिनिपातसमुदायः॥ ऐतिह्यं॥ भैषज्यं॥ देव
तांतात्तादर्थ्येयत्॥ तदर्थएवतादर्थ्यं॥ स्वार्थेष्यञ्॥ अग्निदेवतायैइदमग्निदेवत्यं॥ पितृदेवत्यं॥ पादार्घाभ्यांच॥ पा
दार्थमुदकंपाद्यं॥ अर्घ्यं॥ नवस्यनूआदेशस्त्नप्तनप्खाश्चप्रत्ययावक्तव्याः॥ नूत्नं॥ नूतनं॥ नवीनं॥ नश्चपुरा ॥१४७॥
णप्रात्॥ पुराणेवर्त्तमानात्प्रशब्दान्नोवक्तव्यः॥ वात्सूर्वीकाः॥ प्रणं॥ प्रत्नं॥ प्रतनं॥ प्रीणं॥ भागरूपनामभ्योधेयः॥ भा
गधेयं॥ रूपधेयं॥ नामधेयं॥ आग्नीध्रसाधारणादञ्॥ आग्नीध्रंसाधारणं॥ स्त्रियांङीप्॥ आग्नीध्री॥ साधारणी॥
अतिथेर्ञ्यः॥ तादर्थ्यइत्येव॥ अतिथयेइदमातिथ्यं॥ देवात्तल्॥ देवएवदेवता॥ अवेःकः॥ अविरेवअविकः॥ यावादि

लिंगमलयवाधनंनामपूर्वेङीपिततःकन्२ दः
का दिभ्यःकन्॥ यावएवयावकः॥ मणिकः॥ लोहितान्मणौ॥ लोहितएवमणिर्लोहितकः॥ वर्णेचानित्ये॥ लोहितःकोपेन॥ लो ङीपिवर्णादनुदात्तहितनः२
तकालिंगबाधनंवा॥ लोहितिका॥ लोहिनिकाकोपेन॥ रक्ते॥ लाक्षादिनारक्तेयोलोहितशब्दस्तस्मात्कन्॥ लिंगबाधनंवेत्येव॥ लो
हितिकालोहिनिकाशाटी॥ कालाच्च॥ वर्णेचानित्येरक्तेइतिद्वयमनुवर्त्तते॥ कालकंमुखंवैलक्ष्येण॥ कालकः [illegible] पटः॥ का
लिकाशाली॥ विनयादिभ्यष्ठक्॥ विनयएववैनयिकः॥ सामयिकः॥ उपायएवलंघ॥ औपयिकः॥ वाचोव्याहृतार्थायां॥ संदि
ष्टार्थांयांवाचिविद्यमानाद्वाक्शब्दात्स्वार्थेठक्॥ ॥संदेशवाग्वाचिकंस्यात्॥ तद्युक्तात्कर्मणोऽण्॥ कर्मैवकार्मणं॥ वाचि
कंप्रकृत्याक्रियमाणंकर्मेत्यर्थः॥ ओषधेरजातौ॥ स्वार्थे॥ औषधंपिबति॥ अजातौकिं॥ ओषधयःक्षेत्रेरूढाः॥ प्रज्ञादिभ्य
श्च॥ प्रज्ञएवप्राज्ञः॥ प्राज्ञीस्त्री॥ दैवतः॥ बांधवः॥ मृदस्तिकन्॥ मृदेवमृत्तिका॥ सस्नौप्रशंसायां॥ रूपपोपवादः॥ प्रशस्तामृद
मृत्सा॥ मृत्स्ना॥ उत्तरत्रान्यतरस्यांग्रहणान्नित्योयं॥ बह्वल्पार्थाच्छस्कारकादन्यतरस्यां॥ बहूनिददातिबहुशः॥ अल्पा
निददातिअल्पशः॥ बह्वल्पार्थान्मंगलामंगलवचनं॥ अल्पशअनिष्टेषु॥ बहुशआभ्युदयिकेषु॥ नेह॥ बहूनिदास्यनिष्टेषु
अल्पमाभ्युदयिकेषु॥ संख्यैकवचनाच्चवीप्सायां॥ द्वौद्वौददातिद्विशः॥ माषंमाषंमाषशः॥ प्रस्थशः॥ परिमाणशब्दादेवनां
कार्याएव॥ संख्यैकवचनात्किं॥ घटंघटंददाति॥ वीप्सायांकिं॥ द्वौददाति॥ कारकादित्येव॥ द्वयोर्द्वयोःस्वामी॥ प्रतिभोगपंच

ष्यास्तसिः॥ प्रतिनाकर्मप्रवचनीयेनयोगेयापंचमीविहितातदंतात्तसिःस्यात्॥ प्रद्युम्नःकृष्णतःप्रति॥ आदिरादिभ्यउपसं म०चि०
॥सि०कौ०॥ ख्यानं॥ आदौ॥ आदितः॥ मध्यतः॥ अंततः॥ पृष्ठतः॥ पार्श्वतः॥ आकृतिगणोयं॥ स्वरेणस्वरतः॥ वर्णतः॥ अपादानेयापंचमी
तदंतात्तसिःस्यात्॥ ग्रामादागच्छतिग्रामतः॥ अहीयरुहोःकिं॥ स्वर्गाद्धीयते॥ पर्वतादवरोहति॥ अतिग्रहाव्यथनक्षेपेष्व
॥२४८॥ कर्त्तरितृतीयायाः॥ अकर्त्तरितृतीयांताद्वातसिः॥ अतिक्रम्यग्रहोतिग्रहः॥ चारित्रेणातिगृह्यते॥ चारित्रतोतिगृह्यते॥ चारित्रेणा
न्यानतिक्रम्यवर्त्ततइत्यर्थः॥ अव्यथनमचलनं॥ वृत्तेननव्यथते॥ वृत्ततोनव्यथते॥ वृत्तेननचलतीत्यर्थः॥ क्षेपे॥ वृत्तेनक्षिप्तः॥ वृ
त्ततःक्षिप्तः॥ वृत्तेननिंदितइत्यर्थः॥ अकर्त्तरिकिं॥ देवदत्तेनक्षिप्तः॥ हीयमानपापयोगाच्च॥ हीयमानपापयुक्तादकर्त्तरितृतीयां
ताद्वातसिः॥ वृत्तेनहीयतेवृत्ततोहीयते॥ वृत्तेनपापः॥ वृत्ततःपापः॥ क्षेपस्याविवक्षायामिदं॥ क्षेपेतुपूर्वेणसिद्धं॥ अकर्त्तरिकिं॥
देवदत्तेनहीयते॥ षष्ठ्याव्याश्रये॥ षष्ठ्यंताद्वातसिर्नानापक्षसमाश्रये॥ देवाअर्जुनतोऽभवन्॥ अर्जुनस्यपक्षइत्यर्थः॥ आ
दित्याःकर्णतोऽभवन्॥ कर्णस्यपक्षइत्यर्थः॥ व्याश्रयेकिं॥ वृक्षस्यशाखा॥ रोगाच्चापनयने॥ रोगवाचिनःषष्ठ्यंताद्वातसिश्चि ॥२४८॥
कित्सायां॥ प्रवाहिकातःकुरु॥ प्रतीकारमस्याःकुर्वित्यर्थः॥ अपनयनेकिं॥ प्रवाहिकायाःप्रकोपनंकरोति॥ कृभ्वस्तियो
गेसंपद्यकर्त्तरिच्विः॥ अभूततद्भावइतिवक्तव्यं॥ विकारात्मतांप्राप्नुवत्यांप्रकृतौवर्त्तमानाद्विकारशब्दात्स्वार्थेच्विर्वास्यात्क

करोत्यादिभिर्योगे॥ अस्यच्वौ॥ अवर्णस्यईत्स्यात्च्वौ॥ वेर्लोपः॥ च्व्यंतत्वादव्ययत्वं॥ अकृष्णःकृष्णःसंपद्यतेतंक
रोतिकृष्णीकरोति॥ ब्रह्मीभवति॥ गंगीस्यात्॥ अव्ययस्यच्वावीत्त्वंनेतिवाच्यं॥ दोषाभूतमहः॥ दिवाभूतारात्रिः॥ एत
द्वाप्ययंतावच्चीतिसूत्रेभाष्येउक्तं॥ क्यच्व्योश्च॥ हलःपरस्यसस्ययकारस्यलोपःस्यात्च्वौचपरतः॥ गार्गीभवति॥ च्वौच॥
च्वौपरेपूर्वस्यदीर्घःस्यात्॥ शुचीभवति॥ पटूस्यात्॥ अव्ययस्यदीर्घत्वंनेतिवाच्यंकेचित्॥ तन्निर्मूलं॥ स्वस्तिस्यादि
तितुमहाविभाषयाच्वेरभावसिद्धं॥ स्वस्तीस्यादित्यपिपक्षेस्यादितिवदंति॥ यदिनेष्यतेतर्ह्यनभिधानात्॥ च्विरे
वनोत्पद्यतेइत्युक्तं॥ शीघ्रकृतः॥ मात्रीकरोति॥ अरुर्मनश्चक्षु[illegible]श्चेतोरहोरजसांलोपश्च॥ एषांलोपःस्यात्
च्विश्च॥ अरूकरोति॥ उन्मनीस्यात्॥ उच्चक्षूकरोति॥ विचेतीकरोति॥ विरहीकरोति॥ विरजीकरोति॥ विभाषासा
तिकार्त्स्न्ये॥ च्विविषयेसातिर्वास्यात्साकल्ये॥ सात्पदाद्योः॥ सस्यषत्वंनस्यात्॥ दधिसिंचति॥ कृत्स्नंशस्त्रमग्नि
संपद्यतेअग्निसाद्भवति॥ अग्नीभवति॥ महाविभाषयावाक्यमपि॥ कार्त्स्न्येकिं॥ एकदेशेनशुक्लीभवतिपटः॥ अ
भिविधौसंपदाच॥ संप[illegible]दाकृभ्वस्तिभिश्चयोगेसातिर्वास्यादभिव्याप्तौ॥ पक्षेकृभ्वस्तियोगेच्विः॥ संपदातुवा

त्स्नमेव॥ अग्निसात्संपद्यते॥ अग्निसाद्भवति शस्त्रं अग्नीभवति॥ जलसात्संपद्यते जलीभवति लवणं॥ एकस्याः त॰प्र॰
॥सि॰पू॰॥ व्यक्तेः सर्वावच्छेदेनान्यथाभावः कार्त्स्न्यं॥ बहूनां व्यक्तीनां किंचिदवयवावच्छेदेनान्यथात्वं त्वस्ति विधिः॥ तदधी
नवचने॥ साति स्यात्कृभ्वस्तिभिः संपद्यतेश्च योगे॥ राजसात्संपद्यते॥ राजाधीनमित्यर्थः॥ देये त्रा च॥ तदधीने देये त्रा ने॰
॥२४५॥ स्यात् साति श्च कृञादियोगे॥ विप्राधीनं देयं करोति विप्रत्रा करोति॥ विप्रत्रा संपद्यते॥ पक्षे विप्रसात्करोति॥ देयाः किं
राजसाद्भवति राष्ट्रं॥ देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलं॥ एभ्यो द्वितीयान्तेभ्यः सप्तम्यन्तेभ्य
श्च त्रा स्यात्॥ देवत्रा वंदे रमे वा॥ बहुलोक्तेरन्यत्रापि॥ बहुत्रा जीवतो मनः॥ अव्यक्तानुकरणाद्व्यजवरार्धादनि
तौ डाच्॥ द्व्यजवरं न्यूनं न तु ततो न्यूनं अनेकाजिति यावत्॥ तादृशमर्धं यस्य तस्माड्डाच् स्यात्कृभ्वस्तिभिर्योगे
डाचि विवक्षिते द्वे बहुलं॥ नित्यमाम्रेडिते डाचीति वक्तव्यं॥ डाच्परं यदाम्रेडितं तस्मिन्परे पूर्वपरयोः पररूपं ॥२४५॥
स्यादित्यर्थः॥ इति तकारपकारयोः पकारः॥ पटपटेति स्थिते॥ पटपटाकरोति॥ अव्यक्तानुकरणात्किं॥ दृषत्
करोति॥ द्व्यजवरार्धात्किं॥ श्रत्करोति॥ अवरेति किं॥ खरटखरटाकरोति॥ त्रपटत्रपटाकरोति॥ अनेकाच्

इत्येव सूत्रयितुं युक्तं॥ एवं हि डाचीति परसप्तम्येव द्विर्वचनेत्यवधेयं॥ अनितौ किं॥ पटिति करोति॥ कृञो द्वितीयतृ
तीयशम्बबीजात्कृषौ॥ द्वितीयादिभ्यो डाच्स्यात्कृञ एव योगे कर्षणेऽर्थे॥ बहुलोक्तेरव्यक्तानुकरणादन्यस्य डाचि न द्वित्वं॥ द्वि
तीयं तृतीयं कर्षणं करोति द्वितीयाकरोति॥ तृतीयाकरोति॥ शम्बशब्दः प्रतिलोमे॥ अनुलोमाकृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षति
शम्बाकरोति॥ बीजेन सह कर्षति बीजाकरोति॥ संख्यायाश्च गुणान्तायाः॥ कृञो योगे कृषौ डाच् स्यात्॥ द्विगुणाकरोति क्षेत्रं॥ क्षेत्रकर्षणं
द्विगुणं करोतीत्यर्थः॥ समयाच्च यापनायां॥ कृष्याविति निवृत्तं॥ कृञो योगे डाच् स्यात्॥ यापनेऽर्थे॥ समयाकरोति॥ कालं यापयतीत्य
र्थः॥ सपत्त्रनिष्पत्त्रादतिव्यथने॥ सपत्राकरोति मृगं॥ सपुंखस्य शरस्य प्रवेशनेन सपत्रं करोतीत्यर्थः॥ निष्पत्राकरोति॥ सपुंखस्य शरस्यापर
पार्श्वे निर्गमान्निष्पत्रं करोतीत्यर्थः॥ अतिव्यथने किं॥ सपत्रं निष्पत्रं वा करोति भूतलं॥ निष्कुलान्निष्कोषणे॥ निष्कुलाकरोति दाडि
मं॥ निर्गतं कुलमन्तरवयवानां समूहो यस्मादिति बहुव्रीहेर्डाच्॥ सुखप्रियादानुलोम्ये॥ सुखाकरोति॥ प्रियाकरोति गुरुं॥ अनु
कूलाचरणेनानन्दयतीत्यर्थः॥ दुःखात्प्रातिलोम्ये॥ दुःखाकरोति स्वामिनं पीडयतीत्यर्थः॥ शूलात्पाके॥ शूलाकरोति मांसं॥ शूलेन
पचतीत्यर्थः॥ सत्यादशपथे॥ सत्याकरोति भाण्डं वणिक्॥ केतव्यमिति तथ्यं करोतीत्यर्थः॥ शपथे तु सत्यं करोति विप्रः॥ मद्रात्परिवाप

णे॥ मद्रशब्दो मंगलार्थः॥ परिवापणं मुंडनं॥ मद्राकरोति कुमारं॥ मंगल्यमुंडनेन संस्करोतीत्यर्थः॥ भद्राच्चेति वक्तव्यं॥ भद्राकरोति॥ तद्धित॰
॥सि॰कौ॰॥ अर्थः प्राग्वत्॥ परिवापणे किं॥ मद्रं करोति॥ भद्रं करोति॥ ॥इति तद्धितप्रक्रिया समाप्ता॥ श्रीः॥ सर्वस्य द्वे॥ इत्यधि
कृत्य॥ नित्यवीप्सयोः॥ आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्विर्वचनं स्यात्॥ आभीक्ष्ण्यं तिङंतेष्वव्ययसंज्ञककृदंतेषु च॥
॥१५०॥ पचति पचति॥ भुक्त्वा भुक्त्वा॥ वीप्सायां॥ वृक्षं वृक्षं सिंचति॥ ग्रा मो ग्रामो रमणीयः॥ परेर्वर्जने॥ परि परि वंगेभ्यो वृष्टो देवः॥ वंगा
न्परिहृत्येत्यर्थः॥ परेर्वर्जने वा वचनं॥ परि वंगेभ्यो वृष्टो देवः॥ उपर्यध्यधसः सामीप्ये॥ उपर्युपरि ग्रामं॥ ग्रामस्योपरिष्टात्समीप
देश इत्यर्थः॥ अध्यधि सुखं॥ सुखस्योपरिष्टात्समीपकाले दुःखमित्यर्थः॥ अधोऽधो लोकं॥ लोकस्याधस्तात्समीपदेश इत्यर्थः॥ वा
क्यादेरामंत्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु॥ असूयायां॥ सुंदर सुंदर वृथा ते सौंदर्यं॥ संमतौ॥ देव देव वंद्योऽसि॥
कोपे॥ दुर्विनीत दुर्विनीत इदानीं ज्ञास्यसि॥ कुत्सने॥ धानुष्क धानुष्क वृथा ते धनुः॥ भर्त्सने॥ चोर चोर घातयिष्यामि त्वां॥ एकं ॥१५०॥
बहुव्रीहिवत्॥ द्विरुक्त एकशब्दो बहुव्रीहिवत्स्यात्॥ तेन सुब्लोपपुंवद्भावौ॥ एकैकमक्षरं॥ इह द्वयोरपि सुपो लुकि प्रसक्ते बहुव्री
हिवद्भावात्प्रातिपदिकत्वात्समुदायात्सुप्॥ एकैकयाहुत्या॥ इह पूर्वभागे पुंवद्भावाद्विग्रहविशेषः॥ न बहुव्रीहावित्यत्र पुनर्बहु-

व्रीहिग्रहणं मुख्यबहुव्रीहिलाभार्थं॥ तेनातिदिष्टबहुव्रीहौ सर्वनामताऽस्त्येवेति प्राञ्चः॥ वस्तुतस्तु भाष्यमते प्रत्याख्यातमेवैतत्
सूत्रं मतेऽपि बहुव्रीहिसूत्रे लौकिकविग्रहे निषेधकं॥ न बहुव्रीहाविति त्विहातिदेशशंकैव नास्ति॥ एकैकस्मै देहि॥ आबाधे च॥ पीडायां
द्योत्यायां द्वे स्तो बहुव्रीहिवच्च॥ गतगतः॥ विरहात्पीड्यमानस्येयमुक्तिः॥ बहुव्रीहिवत्त्वात्सुब्लुक्॥ गतगता॥ इह पुंवद्भावः॥ कर्मधा
रयवदुत्तरेषु॥ इह उत्तरेषु द्विर्वचनेषु कर्मधारयवत्कार्यं॥ प्रयोजनं सुब्लोपपुंवद्भावांतोदात्तत्वानि॥ प्रकारे गुणवचनस्य॥ सादृश्य
द्योत्ये गुणवचनस्य द्वे स्तः तच्च कर्मधारयवत्॥ कर्मधारयवदुत्तरेष्वित्यधिकारात्॥ तेन पूर्वभागस्य पुंवद्भावः॥ समासस्येत्यंतोदा
त्तत्वं॥ पटुपट्वी॥ पटुपटुः॥ पटुसदृशः॥ ईषत्पटुरित्यर्थः॥ गुणोपसर्जनद्रव्यवाचिनः केवलगुणवाचिनश्च द्वे स्तः॥ शुक्लशुक्लं रूपं॥
शुक्लशुक्लः पटः॥ आनुपूर्व्ये द्वे वाच्ये॥ मूले मूले स्थूलः॥ ॥ संभ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः॥ सर्पः २ बुध्यस्व न
सर्पः २ बुध्यस्व २॥ क्रियासमभिहारे च॥ लुनीहि लुनीहीत्येवायं लुनाति॥ नित्यवीप्सयोरिति सिद्धेऽत्यर्थे द्वित्वार्थमिदं॥ पौनः
पुन्येऽपि लोपासहस्रमुत्पितघातकतालक्ष्यं वा॥ कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये॥ समासवच्च बहुलं॥ बहुलग्रहणादन्यपरयो
र्न समासवत्॥ इतरशब्दस्य तु नित्यं॥ असमासवद्भावे पूर्वपदस्य सुपः सुर्वक्तव्यः॥ अन्योन्यं विप्रा नमंति॥ अन्योन्यौ॥ अन्योन्यान्॥

॥ ॥अन्योन्येन कृतं ॥ अन्योन्यस्येदत्तमित्यादि ॥ अन्योन्येषां पुष्करैराम्नशंत इति माघः ॥ एवं परस्परं ॥ अत्र कस्कादित्वात्सत्वं ॥ द्विरु०
नीयस्यस ॥ इतरेतरं ॥ इतरेतरेण सादि ॥ स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वाच्यः ॥ अन्योन्यां ॥ अन्योन्यं ॥ परस्परां
सि०पू० परस्परं ॥ इतरेतरामितरेतरं वा ॥ इमे ब्राह्मण्यौ कुलं वा भोजयत ॥ अन्नकं वित ॥ आमादेशो द्वितीयायाएव ॥ स्यादीतयंतोदाह तत्ता
॥१५२१॥ ह ॥ तेन स्त्रीनपुंसकयोरपि तृतीयादि षु पुंवद्रूपमित्याहु ॥ अन्ये तूदाहरणस्यादृष्टान्तत्वात्सर्वविभक्तीनामादेशमाहु ॥ द्वंद्व
यटाबसावः ॥ क्लीबेवाद्द्विरहः स्वमो ॥ समासस्तेतर लुक्वेति सिद्धबाकुलकात्रयं ॥ १ ॥ ॥ तथाहि ॥ अन्योन्यं परस्परमित्यत्र द्व
द्वयेपि टाप्प्राप्तः ॥ न तु सर्वनाम्नो वृत्तिमात्रे इति पुंवद्भावः ॥ अन्यपरयोरसमासवद्भावात् ॥ न च द्विर्वचनमेव वृत्तिः ॥ पांथां प्रियः स्त्रै
ष्ट तकातराम्नीसासाक्रियानम्र सुरवीबस्त्रवेत्याहवति प्रसंगात् ॥ अन्योन्यमितरेतरमित्यत्र [illegible] चाइतरादित्यद्ड प्राप्तः ॥ अन्योन्य
संसकमह स्त्रियामं ॥ अन्योन्याश्रयः ॥ परस्पराक्षिसाहश्यं ॥ अदृष्टपरस्परै [illegible] रित्यादे सोर्लुक् च प्राप्तः ॥ सर्वथा ऊलकबकेनसूत्रा
धेयं ॥ अकृत वार्तिकं भाष्योदाहरणं स्त्रियामिति सूत्रे अन्योन्यसंश्रयत्वेनादिति भाष्यं चात्र प्रमाणमिति ॥ आह श्रूप्रिय सुखयोर ॥१५१॥
न्यतरस्यां ॥ प्रियप्रियेण ददाति प्रियेण वा ॥ सुखसुखेन ददाति सुखेन वा ॥ द्विर्वचने कर्मधारयवद्भावात्सुप ॥ लुकिपु नत्त्वद्व
चनं ॥ अतिप्रियमपि वस्तु अनायासेन ददातीत्यर्थः ॥ यथास्वे यथायथं ॥ यथास्वमिति वीप्सायामव्ययीभावः ॥ यो य आत्मा

यद्यदात्मीयं तद्यथास्वं ॥ तस्मिन् यथाशब्दस्य द्वे क्लीबत्वं च निपात्यते ॥ यथायथं ज्ञाता यथास्वभावमित्यर्थः ॥ यथात्मी
सि०पू० यमितिवा ॥ द्वंद्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु ॥ द्विशब्दस्य द्विर्वचनं पूर्वपदस्याम्भावो अत्वं
चोत्तरपदस्य नपुंसकत्वं च निपात्यते एष्वर्थेषु ॥ तत्र रहस्यं द्वंद्वशब्दस्य वाच्यं इतरे विषयभूताः ॥ द्वंद्वं मंत्रयते ॥ रहस्यमित्य
॥१५२॥ र्थः ॥ मर्यादा ॥ स्थित्यनतिक्रमः ॥ आचतुरं हीमे पशवो द्वंद्वं मिथुनायंते ॥ माता पुत्रेण मिथुनं गच्छति पौत्रेण प्रपौत्रेणा
पीत्यर्थः ॥ व्युत्क्रमणं पृथग्वस्थानं ॥ द्वंद्वं व्युत्क्रांताः ॥ द्विवर्गसंबंधेन पृथगवस्थिताः ॥ द्वंद्वं यज्ञपात्राणि प्रयुनक्ति ॥ द्वंद्वं
संकर्षणवासुदेवौ ॥ अभिव्यक्तौ साहचर्येणेत्यर्थः ॥ योगविभागादन्यत्रापि द्वंद्वमिष्यते ॥ ॥ इति द्विरुक्तप्रक्रिया ॥
॥ ॥ इति श्री भट्टोजिदीक्षितविरचितायां सिद्धांतकौमुद्यां पूर्वार्द्धं समाप्तं ॥ श्रीमद्गुरुदेवतार्पणमस्तु ॥ ॥
॥ ॥ वाक्यकारं वररुचिं भाष्यकारं पतंजलिं ॥ पाणिनिं सूत्रकारं च प्रणतोस्मि मुनित्रयं ॥ १ ॥ श्रीशिवार्पणमस्तु ॥ ॥१५२॥